CC-0. In Public Domain. Digitization by eGangotri

...sity, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह.नं. १६८०३

ग्रन्थ नं. ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इ.नं. १६३०३

मूल्यरु
१५।-

॥ * ॥ अथादिपुराणं प्रारभ्यते ॥ * ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिपुराणस्थविषयाणामनुक्रमणिका ।

अध्यायाः	विषयाः
१	नैमिषारण्यमहिमप्रदर्शनपुरस्सरं द्वादशाब्दिकसत्रे मुनिवृन्दमध्यगताय शौनकाय सूतस्य प्रणतिः आदिपुराणकथाप्रसङ्गश्च ।
२	सूतशौनकयोः संलापे शौनकेन शान्तिविनयशिष्टाचारादिवर्णनपुरस्सरं सन्ध्यातत्कालकर्तव्यकर्मणां कीर्तनम् ।
३	शौनकेन कलियुगदोषवर्णनं श्रीकृष्णचरित्रश्रवणप्रश्नकरणञ्च ।
४	दाल्भ्यवत्सपादादिमहर्षिभिः सत्कथाहरिभक्त्यादीनां स्वरूपकथनं तदवसाने सूतेन हरिलीलामयादिपुराणकथनोपक्रमकरणम् ।
५	नारदमुखाद्व्यासेनादिपुराणश्रवणं मायातिरस्कारः कथन्नु स्यादिति मुनिगणप्रश्ने नारदस्य रूपपरिग्रहपूर्वकं हरिनामस्मरणान्मोक्ष इति समाधानम् ।
६	वसुदेवदेवकीपाणिपीडनमारभ्य कृत्स्नकृष्णावतारलीलानां संक्षेपेण वर्णनम् ।
७	अवास्तविकस्त्रीपुत्रादिषु प्रसक्तस्य जीवस्य 'ईशः सर्वत्र रक्षकः' इति विस्तार्य दर्शनम् ।
८	हरिभक्तलक्षणकर्ममाहात्म्यवर्णनम् ।
९	माथुरमण्डले वृन्दावनादिद्वादशवनकथनादि ।
१०	श्रीकृष्णलीलया मानसरसि स्नानेन नारदस्य स्त्रीत्वप्राप्तिः सकलप्रियापरिवृतस्य श्रीकृष्णस्य पुरो दूतेन तन्निवेदनं सप्रियस्य भगवतस्तद्दर्शनौत्सुक्यप्रथनञ्च ।
११	जगत्संहृत्य क्षीराब्धौ सुप्तस्य विष्णोर्नाभिकमलादुद्भूतस्य ब्रह्मणोऽसहायस्य चिन्तां विज्ञाय भृङ्गरूपिविष्णुना तन्नामादिप्रकटनपुरस्सरं स्वस्य सृष्टिविहारप्रवर्तकद्विधारूपकीर्तनम् ।
१२	वृन्दावने श्रीकृष्णस्य पत्नीसख्यादिनामप्रदर्शनपुरस्सरं रासलीलावर्णनम् ।
१३	श्रीकृष्णस्य मातापितृसखिपरिवारादीनां नामाख्यानम् ।
१४	कन्यारूपिनारदेन श्रीकृष्णदर्शनकरणं राधिकामानवर्णने दूतीकर्मादिनैपुण्यञ्च ।
१५	दूत्या कृष्णराधिकयोः सम्मेलनं श्रीकृष्णाख्यनदीस्नानेन नारदस्य पुंस्त्वप्राप्तिर्व्रजे कृष्णदर्शनं तद्द्वारा बहुमानप्राप्तिः प्रसङ्गात्कलियुगदोषकीर्तनञ्च ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिपुराणस्थविषयाणामनुक्रमणिका ।

अध्यायाः	विषयाः
१	नैमिषारण्यमहिमप्रदर्शनपुरस्सरं द्वादशाब्दिकसत्रे मुनिवृन्दमध्यगताय शौनकाय सूतस्य प्रणतिः आदिपुराणकथाप्रसङ्गश्च ।
२	सूतशौनकयोः संलापे शौनकेन शान्तिविनयशिष्टाचारादिवर्णनपुरस्सरं सन्ध्यातत्कालकर्तव्यकर्मणां कीर्तनम् ।
३	शौनकेन कलियुगदोषवर्णनं श्रीकृष्णचरित्रश्रवणप्रश्नकरणञ्च ।
४	दाल्भ्यवत्सपादादिमहर्षिभिः सत्कथाहरिभक्त्यादीनां स्वरूपकथनं तदवसाने सूतेन हरिलीलामयादिपुराणकथनोपक्रमकरणम् ।
५	नारदमुखाद्व्यासेनादिपुराणश्रवणं मायातिरस्कारः कथन्नु स्यादिति मुनिगणप्रश्ने नारदस्य स्त्र्यपरिग्रहपूर्वकं हरिनामस्मरणान्मोक्ष इति समाधानम् ।
६	वसुदेवदेवकीपाणिपीडनमारभ्य कृत्स्नकृष्णावतारलीलानां संक्षेपेण वर्णनम् ।
७	अवास्तविकस्त्रीपुत्रादिषु प्रसक्तस्य जीवस्य 'ईशः सर्वत्र रक्षकः' इति विस्तार्य दर्शनम् ।
८	हरिभक्तलक्षणकर्ममाहात्म्यवर्णनम् ।
९	माथुरमण्डले वृन्दावनादिद्वादशवनकथनादि ।
१०	श्रीकृष्णलीलया मानसरसि स्नानेन नारदस्य स्त्रीत्वप्राप्तिः सकलप्रियापरिवृतस्य श्रीकृष्णस्य पुरो दूतेन तन्निवेदनं सप्रियस्य भगवतस्तद्दर्शनौत्सुक्यप्रथनञ्च ।
११	जगत्संहृत्य क्षीराब्धौ सुप्तस्य विष्णोर्नाभिकमलादुद्भूतस्य ब्रह्मणोऽसहायस्य चिन्तां विज्ञाय भृङ्गरूपिविष्णुना तन्नामादिप्रकटनपुरस्सरं स्वस्य सृष्टिविहारप्रवर्तकद्विधारूपकीर्तनम् ।
१२	वृन्दावने श्रीकृष्णस्य पत्नीसख्यादिनामप्रदर्शनपुरस्सरं रासलीलावर्णनम् ।
१३	श्रीकृष्णस्य मातापितृसखिपरिवारादीनां नामाख्यानम् ।
१४	कन्यारूपिनारदेन श्रीकृष्णदर्शनकरणं राधिकामानवर्णने दूतीकर्मादिनैपुण्यञ्च ।
१५	दूत्या कृष्णराधिकयोः सम्मेलनं श्रीकृष्णाख्यनदीस्नानेन नारदस्य पुंस्त्वप्राप्तिर्व्रजे कृष्णदर्शनं तद्द्वारा बहुमानप्राप्तिः प्रसङ्गात्कलियुगदोषकीर्तनञ्च ।

अध्यायाः विषयाः	
१६	संक्षेपेण कृष्णजन्मचरिताख्यानम् ।
१७	श्रीनन्देन श्रीकृष्णजन्मोत्सवकरणं स्वप्ने भगवदास्याद्रामावतारचरित्रवर्णनश्रवणम् ।
१८	श्रीकृष्णवधार्थं कंसेन गोकुले पूतनायाः प्रेषणं कृष्णद्वारा तस्या वधश्च ।
१९	कक्षीवद्द्विजपत्नीचारुमतीचरित्रदोषाद्भर्तृद्वारा तस्याः शापस्ततश्च जन्मान्तरे पूतनारूपेण तस्या उत्पत्तिः कृष्णपीतस्तन्यायास्तस्या मुक्तिः । च्यवनध्यानभञ्जकासुराणां जन्मान्तरे बालरूपेण व्रज उत्पत्तिः कंसेन तद्घातः कृष्णजन्मदिवसोत्सववर्णनञ्च ।
२०	भूम्युद्धारार्थं कृष्णावतारं विज्ञाय श्रीमहादेवेन व्रजवासिनां भाग्यप्रशंसनं तद्दर्शनाय तस्य विष्ण्वादिदेवानां च व्रजे गमनम्; श्रीकृष्णेन स्वबाललीलावर्णनमघवकासुराभ्यां कंसस्य मन्त्रणञ्च ।
२१	कंसेन तृणावर्तस्य व्रजे प्रेषणं तृणमादाय वायुरूपिणस्तस्य व्रजे गमनं तत्पूर्वभववृत्तवर्णनादिवधान्तं वृत्तकथनञ्च ।
२२	तृणावर्तवधं निशम्य कंसेन दैवायत्ततप्रथनं महामायायाः पोथनं वसुदेवदेवकीसमाश्वासनम् । प्रसङ्गतो नारदाय श्रीकृष्णेन स्वजन्मबालचारित्रादिवर्णनम् ।

अध्यायाः विषयाः	
२३	गर्गेण रहो रामश्रीकृष्णयोर्नामकर्मादिसंस्कारकरणं श्रीकृष्णस्य दधिनवनीतादिभक्षणविकिरणभाण्डस्फोटनादिनानाबाललीलावर्णनम् ।
२४	गोपीगृहेषु श्रीकृष्णस्यातीवौद्धत्यकरणं ताभिश्च तस्य निरोधो हेलयैव तत्पलायनञ्च ।
२५	वल्लवीगृहेषु स्वसखैर्बालनैश्च सह कृष्णेन दध्यादेश्चौर्यकरणम् ।
२६	श्रीकृष्णौद्धत्यपीडितगोपीनां यशोदाया आक्रोशस्तया बोधितेन कृष्णेन तदन्यथा समाधानम् ।
२७	कृष्णौच्छृङ्खल्यख्यापिकगोपीर्निर्भर्त्स्य देवपूजासम्भारसाधनचित्तायां देवक्यां बहिर्गतायां कृष्णेन स्वसखैर्बालनैश्च सह स्वगृहसञ्चितदध्यादेर्विकिरणं, प्रविश्य गृहं पूजयामि देवमिति मात्रुक्त्या तस्यै रोषः स्वमहिमदर्शनस्य प्रतिज्ञानञ्च ।
२८	रामकृष्णयोर्मल्लयुद्धं कृष्णमृद्भक्षणलीलावर्णनं यशोदायै कृष्णेन स्वमुखे ब्रह्माण्डस्थवस्तुदर्शनञ्च ।
२९	श्रीकृष्णस्योलूखलबन्धनलीलावर्णनम् ।
३०	नलकूवरयोर्विष्णुभक्तिं विहाय नन्द्युपदेशाच्छिवभक्तिस्वीकारः; नारदशापवशात्तयोर्यमलार्जुनता कृष्णान्मोक्षश्च ।

इति आदिपुराणविषयानुक्रमणिका समाप्ता ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ❀ ॥ श्रीगणेशाय नमः ॥ ❀ ॥ ॐ नमो भगवते वासुदेवाय ॥ ❀ ॥ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ॥ देवीं सरस्वती ञ्चैव ततो जयमुदीरयेत् ॥ १ ॥ ❀ ॥ रजोजुषे जन्मानि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमस्पृशे ॥ रवीन्दुनेत्राय च लोकसाक्षिणे चिन्मात्ररूपाय परात्मरूपिणे ॥ १ ॥ ब्रह्मेति यस्य निगमैर्विवृतश्चिदंशो मायेश्वरः पुरुषरूपधरो यदंशः ॥ प्राणो दको बलधियां परमो विशुद्धः आनन्दसत्यवपुषे प्रणमामि तस्मै ॥ २ ॥ जीवो रहस्येव विधाय पापं न निष्कृतिं प्रैति हि विश्वमूर्त्तेः ॥ सदात्मरूपोऽन्तरतो हि शश्वत् पापञ्च पश्यत्यथ पुण्यकृत्यम् ॥ ३ ॥ पापात्मभिस्तन्निभृते कृतेऽपि पापेऽनुतापा नलतस्त एव ॥ दग्धा भवेयुः सततं नु येन नमामि तं सत्पुरुषं परेशम् ॥ ४ ॥ अविद्यान्धा अरे जीवाः प्राणवायुः कदा तु वः ॥ निर्गमिष्यति सहसा नास्ति तस्य विनिश्चयः ॥ ५ ॥ आयुर्हरति वै पुंसामुद्यन्नस्तञ्च यन्नविः ॥ असदालापतापैश्च क्षीणंक्षीणं प्रतिक्षणम् ॥ ६ ॥ अतो भगवतो विष्णोः पुण्यश्लोकस्य पावनम् ॥ साफल्यमायुषः कुर्य्यात्पीत्वा तु चरितामृतम् ॥ ७ ॥ अज्ञानान्धजनानां यो मोहान्धतमसं मुनिः ॥ निराचिकीर्षुर्वासव्यां व्यासरूपेण गर्भतः ॥ ८ ॥ पवित्रे रत्नगर्भाया अवतीर्य युगे युगे ॥ वेदमंत्रपुराणादिपूर्णेन्दुं काशयत्युत ॥ ९ ॥ कवीश्वरं तं हि वन्दे प्रवरं वै तपस्विनाम् ॥ तत्त्वज्ञानवतां श्रेष्ठं कृष्णद्वैपायनं मुनिम् ॥ १० ॥ वेदवृक्षं प्रविभज्य स्वशिष्येभ्यः प्रदाय च ॥ इतिहासं तदन्तःस्थं समुद्धृत्य मनीषया ॥ ११ ॥ पुराणसंहिता श्चक्रे पुराणर्थविशारदः ॥ तदर्थानां निर्णयाय ब्रह्मसूत्रमकल्पयत् ॥ तद्भाष्यभूतं पुराणं भागवतं वै विदुर्बुधाः ॥ १२ ॥ तत्सर्वं सारभूतं हि पुराणन्त्वादिसंज्ञितम् ॥ विदधे परमेशांशः व्यासरूपी सनातनः ॥ १३ ॥ आख्यानञ्चात्र विवृतं सर्वं हि वेदसम्मितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभलौकिकशान्त्यर्थं नृणां धर्मादिवर्गयुक् ॥ १४ ॥ यदधीत्य हि लोकानां ज्ञानविज्ञानमेव च ॥ वर्द्धते चोपजायेत सन्मार्गायणवृत्तिता ॥ १५ ॥ आयासेन विनान्तेऽथ पुरुषार्थागमो भवेत् ॥ पठनेन भवेत्सद्यः कोऽप्यपूर्वो हि नन्दथुः ॥ १६ ॥ तीव्रेण भक्तियोगेन पुराणं प्रपठेन्नरः ॥ श्रद्धयामर्षरहितः व्यासादेशेन मुक्तिभाक् ॥ १७ ॥ धर्माणाञ्च यथाऽहिंसाऽभयदानं वरेण्यकम् ॥ समस्तप्रियवस्तूनां श्रेष्ठ आत्मा यथा स्वकः ॥ १८ ॥ सुखस्पर्शेषु द्रव्येषु गरीयांश्च यथात्मजः ॥ इन्द्रियेषु मनो वर्य्यं गुणेषु विनयो यथा ॥ १९ ॥ सात्त्विकेषु च भावेषु यथा श्रद्धा गिरीयसी ॥ भूरिपावनतीर्थेषु क्षेत्रेषु नैमिषं तथा ॥ २० ॥ घूर्णन्मनोमयं चक्रं शीर्य्यतेऽस्मिन्नरण्यके ॥ अतः पूतं विष्णुवनं नैमिषञ्चेति विश्रुतम् ॥ २१ ॥ प्रशस्तं तपसः स्थानं शौनकाद्यैः समाश्रितम् ॥ कलिमागतमाज्ञाय यज्ञाय कृतमानसैः ॥ २२ ॥ शान्तेरुदयतो यद्वद्धृदयं राजते नृणाम् ॥ विनयस्योदयेनैव शोभन्ते सद्गुणा यथा ॥ २३ ॥ नीतेरुदयतो यादृक् प्रवृत्तेर्गौरवं भवेत् ॥ सत्यस्योदयतो धर्मो यथा स्याद्गौरवान्वितः ॥२४॥ एतेषामृषिमुख्यानां पूर्वोक्तानां समागमात ॥ तथैव नैमिषक्षेत्रं गतं शोभासमृद्धिताम् ॥ २५ ॥ छाया लोकमिवान्वेति सद्गुणैश्चैव सद्गुणः ॥ नद्योऽब्धिं यान्ति वै हित्वा शतशोऽन्यजलाशयान् ॥ २६ ॥ ज्योतिष्वन्येषु बहुषु वर्त्तमानेषु कैरवम् ॥ कथं विकाशं नाप्नोति नैव दृष्ट्वा कलानिधिम् ॥ २७ ॥ इत्याकृष्यत एवेह मनो नृणां महात्मभिः ॥ सामान्यानां यथा लौहमयस्कान्तेन सत्वरम् ॥ महात्मानः परेशांशा ईशशक्तिसमन्विताः ॥ ॥ २८ ॥ तदेकधा महाभागः प्रकृत्याशेषसद्गुणः ॥ महर्षिकल्पः सूतस्तु व्यासशिष्यः स्वतृतये ॥ २९ ॥ पक्षपाती गुणस्याटञ्शौनकस्य यदृच्छया ॥ अगात् कुलपतेः सद्म दर्शनाय मुनेः सुधीः ॥ ३० ॥ सत्प्रसंगानुवृत्तिभ्यां धर्मचर्चा यतः सदा ॥ तत्रालौकि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कता याहक् तथैव शौनकाश्रमे ॥ ३१ ॥ महर्षिरथ यत्रासौ द्वादशाब्दिकसत्रतः ॥ ऋषीणां समितावास्ते साक्षाच्छान्तिस्तपोऽथ वा ॥ ३२ ॥ सूतस्तत्रोपसंगम्य कृताञ्जलिपुटस्तदा ॥ पादयोः प्रणिपत्याथ ववन्दे च महामुनिम् ॥ ३३ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके अनुक्रमणिकाभिधेयः प्रथमोऽध्यायः ॥ १ ॥ ॥ अशेषशेमुषीविद्याविशिष्टे ज्ञानविद्वरे ॥ व्यासान्तेवासिनि सूते परिविज्ञानशालिनि ॥ १ ॥ यथाविधि प्रणम्येति साक्षाद्विनयभक्तिवत् ॥ स्थिते तमवलोक्याथ जाताह्लादो महामुनिः ॥ २ ॥ शौनको बह्वृचः शान्तः स्वस्वभावगुणेन हि ॥ प्रददावभिवाद्यास्मै सूतायासनमासितुम् ॥ ३ ॥ अन्ये च ऋषयश्चैतद्दृष्ट्वा तुल्यसमादरैः ॥ सूतस्य सत्कृतिं चक्रुर्यथोचितविधानतः ॥ ४ ॥ सूतोऽपि प्रतिजग्राह विनयेनाभिवाद्य च ॥ प्रीत्या भक्त्या समानन्द्य तस्मिन्नुपविवेश वै ॥ ५ ॥ शान्तेरुदयतो यद्वत्सन्तापोऽपसरेत्खलु ॥ विनयोपचयाद्याहगौद्धत्यं याति संक्षयम् ॥ ६ ॥ सद्बुद्धेरुदये न स्याद्दुष्प्रवृत्तिर्यथा हता ॥ तिरोभवेद्यथा मोहतमः सञ्ज्ञानसम्भवात् ॥ ७ ॥ भक्तिप्रेमोदयादन्तर्मलश्चोपरमेद्यथा ॥ दूरमस्येदुरदृष्टं सदाचारचितिर्यथा ॥ ८ ॥ आत्मशुद्ध्युदयाद्याहक्पापं याति पराभवम् ॥ विज्ञानोदयतो यद्वदसन्तोषोऽवधूयते ॥ ९ ॥ अन्तर्दध्याद्यथाज्ञानं विद्याया उदयेन च ॥ ऋषिदेवमिष्टदेवं वीक्ष्यैव शौनकन्तथा ॥ १० ॥ सूतस्य धीमतः सद्यः ग्लानिश्चैव श्रमः क्लमः ॥ सर्वं दूरमगाद्दुःखं शांतिं स परमां गतः ॥ ११ ॥ अथ तद्गतचित्तोऽसौ यथैव तन्निदेशकृत् ॥ शौनकाभिमुखदृष्टिः कृताञ्जलिरवस्थितः ॥ १२ ॥ तं तथाविधमालक्ष्य शौनकोऽथ महामुनिः ॥ सम्मानयन्व्यासशिष्यं गिरा सूनृतया ब्रुवन् ॥ १३ ॥ सूतसूत महाभागः तत्त्वज्ञानैकभाजन ॥ यथा श्रमफलं लोके सुखमेव सदातनम् ॥ १४ ॥ लोकानुरागसम्प्राप्तिर्विनयस्य फलं यथा ॥ सारल्यस्य फलं यद्वद्विश्रम्भो विश्वतंत्रकः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरहंकाररूपस्य मैत्र्यलाभः फलं यथा ॥ आत्मोन्नतिर्ज्ञानफलं चेष्टा सिद्धिफला यथा ॥ १६ ॥ प्रतिपत्तिः फलं साध्वी शिष्टाचा
रस्य सर्वतः ॥ संसारे च यशोऽवाप्तिः सत्कार्यस्य फलं यथा ॥ १७ ॥ यथा मोक्षफला शान्तिस्तपस्यायाः फलं यथा ॥ भवा
दृशस्य संसर्गः साक्षात्कारश्च पुण्यदः ॥ १८ ॥ प्राणिनां द्विपदः श्रेष्ठो जीवेषु ब्राह्मणस्तथा ॥ विप्राणां ज्ञानिनः श्रेष्ठा विज्ञानी च ततः परः ॥ १९ ॥
भगवद्भक्तिरसिकं भवन्तं प्रविलोक्य वै ॥ चिरार्जिततपःपुण्यफलमद्य ममागतम् ॥ २० ॥ नराणां सन्ति सर्वेषां नेत्रादीनीन्द्रियाणि हि ॥ तानि
येषां न सार्थानि नरास्ते मृण्मयाः परम् ॥ २१ ॥ विद्या च विद्यते येषां ज्ञानं नो विद्यते पुनः ॥ धनानि दानहीनानि शक्तिश्च कार्य्यतो विना ॥ २२ ॥
तेषां विडम्बनार्थाय सर्वाणि विफलानि वै ॥ भवादृशास्तु विद्यादेर्लेभिरे सफलतां शुभाम् ॥ २३ ॥ भगवत्करुणाभाजां भवतां दर्शना
दिकम् ॥ करोति जन्म सफलं जीवितञ्च पुनाति हि ॥ २४ ॥ इदानीमागता सन्ध्या कार्य्यञ्चोपासनादिकम् ॥ गमिष्यामो वह्निगृहं
पश्य कालगतिं पुनः ॥ २५ ॥ अस्तं गच्छति वै काले परान्सन्तापयन्रविः ॥ नलिनीकोमलमतिर्विषण्णास्ते सरोवरे ॥ २६ ॥
महात्मानो न त्यजन्ति स्वभावं पतनेऽपि हि ॥ इति दर्शयितुं पश्य भास्करो भास्करच्छविः ॥ २७ ॥ महतोऽस्तमनं साक्षाद्विश्वस्यामङ्गलं
परम् ॥ अन्धकारसमाच्छन्ना धरित्री रविणा विना ॥ २८ ॥ कृतज्ञा मृगपतगाः स्वोपकारांश्च चिन्तयन् ॥ प्रकाशयन्ति दुःखानि
रवैरस्तमने हरेः ॥ २९ ॥ पतनात्परमुत्थानमुत्थानात्पतनं तथा ॥ इत्थं संसारचक्रस्य भ्रमणस्य विधिर्भवेत् ॥ ३० ॥ नावसीदेदथो
लोको नाधीरो वा भवेदतः ॥ अन्यस्यावनातिं दृष्ट्वा पतनञ्च तथैव हि ॥ उपदेष्टुमिवेत्येव सन्ध्या धीरं समागता ॥ ३१ ॥ यथा पापा
त्मनां स्वान्तमज्ञानतमसा वृतम् ॥ लीयन्तेऽहानि सर्वाणि तमसि क्रमशस्तथा ॥ ३२ ॥ तपस्यानन्तरं शान्तेरुदयेन सुसङ्गवत् ॥
सन्ध्यागमे समीरश्च वाति शीतं सुखङ्करः ॥ ३३ ॥ तपसोऽन्ते सिद्धिलाभे मुखकान्तिर्यथा सतः ॥ कुमुदिन्यस्तथा फुल्लाः सुधाकर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समागमे ॥३४॥दुःखस्यासह्यतां वृक्षाः प्रदर्शयितुमेव वा ॥ प्रतीक्षन्ते स्पन्दहीना अन्धकारं सुदारुणम् ॥ ३५ ॥ नियतं प्रभुसेवायां याप यन्तः स्वजीवनान् ॥ प्राणिनः शङ्कितोद्विग्ना आश्रयन्ते गृहान्सुखम् ॥ ३६ ॥ सूर्य्यस्यास्तमने लोकाः क्षीणाः केचित्सुवर्द्धिताः ॥ प्रफुल्ला विरसाः केचित्स्तम्भिताः शब्दिताः परे ॥ ३७ ॥ दिवाचरा निशाकाले सुविषण्णा भवन्ति हि ॥ निशाचरा निशालोके जाताह्लादा विधे र्गतिः ॥३८॥ सूत लोकालयान्पश्य रुचिभिन्नक्रियापरान् ॥ निशागमे नरा नार्य्यः स्वस्वकार्ये व्रते रताः ॥३९॥ सुखानुध्याननिरता जीवा विमोहिताः ॥ यथार्थसुखहेतुं न ध्यायन्ति जगदीश्वरम् ॥ ४० ॥ इत्युक्त्वा शौनकः सूतं विश्रामाय नियोजयन् ॥ प्रविवेमायाशाग्नि शरणं सायंकृत्यं समाहितुम् ॥४१॥ अन्ये च मुनयः सर्वे सन्ध्योपासनतत्पराः ॥ वेदमंत्रैस्तदारण्यं देवक्षेत्रमकल्पयन् ॥ ४२ ॥ तद्दर्श नाह्लादपरिप्लुतान्तरः सूतो हि सङ्कीर्त्तनरागसङ्गतान् ॥ चराचरांस्तारकनामगानैस्तुतोष वै तापसवृन्दवर्द्धितैः ॥ ४३ ॥ इति श्रीसकल पुराणसारभूते आदिपुराणे वैयासिकै शौनकसूतसङ्गमे द्वितीयोऽध्यायः ॥ २ ॥ सूते निवृत्ते ऋषिभिः सात्त्विकवृत्तिभिः सह ॥ भगवत्तत्त्वरसिके प्रोवाच शौनकस्तदा ॥ १ ॥ सन्न्यासिनो वयं तात यज्ञेऽस्मिंस्तु सुदुष्करे ॥ बह्वायासेन कष्टेन लोकानां शर्म्मका म्यया ॥ २ ॥ लोकेऽस्मिन्नात्मनि यथा ईश्वरे च तथा परे ॥ त्रिविधं साधनं दृष्टं साधूनाममलात्मनाम् ॥ ३ ॥ अयं हि शास्त्रसिद्धान्तो मुनीनाञ्चानुमोदितः ॥ आत्मार्थं परिपालानां स्वार्थसिद्धेरधोगतिः ॥ ४ ॥ विशेषतः समायातो घोरः कलियुगोऽप्ययम् ॥ अधर्मः प्रबलो यत्र जनानां कलिवर्द्धके ॥ ५ ॥ अधुनैव कालिबलं दृश्यते लोकमोहनम् ॥ तथादरो न धर्म्मस्य नानुरागोऽस्ति देहिनः ॥ ६ ॥ शालग्रामो मानपिण्डः सर्वे नास्तिकवृत्तयः ॥ पितृभक्तिर्मातृभक्तिर्गता दूरतरं कलौ ॥ ७ ॥ पाण्डित्यमानिनो मूढास्तथा धार्मिकमानिनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुकर्म्मणि समासक्ताः सदाऽधर्मपरायणाः ॥ ८ ॥ वरं द्विजेभ्यश्चाण्डालो यत्र धर्म्मः प्रदृश्यते ॥ ब्राह्मणा ब्राह्मण्यहीना लोभोपहतचेतसः ॥ ९ ॥ नराः शिश्नोदरपरा योन्याहारविधिच्युताः ॥ इन्द्रियाणां वशीभूताः स्त्रीणां क्रीडामृगा इव ॥ १० ॥ देववित्तेन कुर्वन्ति विलासं मन्दिरं सुखम् ॥ बालका वृद्धसदृशा युवका गुरुनिन्दकाः ॥ ११ ॥ विद्या चार्थकरी जाता ज्ञानं दूरतरं गतम् ॥ पुस्तकस्था भवेद्विद्या लक्ष्मीश्चादृश्यतां गता ॥ १२ ॥ सरस्वती नाकगता धर्म्मोऽधर्मगतिं गतः ॥ सत्यं निराश्रयं धर्मश्चानाथ इव दृश्यते ॥ १३ ॥ दया च विधवारूपा शान्तिः पतिसुतैर्विना ॥ स्थानभ्रष्टो भवेन्न्यायः सारल्यं मृत्युनिश्चयम् ॥ १४ ॥ रोगशोकपरीतापबन्धनव्यसनानि च ॥ प्रबलानि भवन्त्यत्र नृणां शक्तिर्विनश्यति ॥ १५ ॥ वसुन्धरा पापपूर्णा प्रयातीव रसातलम् ॥ सर्वे पापरताश्चेष्टा दूरं सिद्धिकरी गता ॥१६॥ अतो मूढा नास्तिकाश्च अदृष्टवादिनो जनाः ॥ दिनेदिने गता वृद्धिं पौरुषं प्रलयं गतम् ॥ १७ ॥ आलस्यं दुःखदं नृणां समायाति भयङ्करम् ॥ अज्ञानावृतमोहान्धा जना वृद्धिं गताः कलौ ॥ १८ ॥ उपदेशे स्त्रियः शक्ताः श्यालका गुरुरूपिणः ॥ स्त्रीबान्धवा गृहे देवाः प्रभवो भृत्यदुःखदाः ॥ १९ ॥ भृत्याश्च प्रभुसम्मानं न कुर्व्वन्ति कलौ सदा ॥ वृक्षा यथागुरुफलाः पुत्राश्च गुरुतर्ज्जकाः ॥२०॥ गृहाः सुखविहीना हि स्त्रियश्च कलहप्रियाः ॥ स्त्रीणां समादरो नास्ति नैव शिक्षा तथा स्थितिः ॥ २१ ॥ पुरुषाः कुकर्मनिरताः शास्त्राचारविवर्ज्जिताः॥ कापट्यं प्रणये सत्ये नादरं हि ससंशयम् ॥ २२ ॥ व्याघातो लोकयात्रायाः सर्वत्रैव विशृङ्खला ॥ न किञ्चिदपि पुण्याय न धर्माय यथायथम्॥२३॥ वृत्तिर्लोकानां यशस आचार्या ज्ञानवर्जिताः॥ अर्थो वा परमार्थो वा पुरुषार्थो न दृश्यते॥२४॥ उपदेशे च यस्मिंस्तु नोपदेशः स वै भवेत् ॥ अस्वर्गफलकानि किमनुष्ठानानि कर्हिचित् ॥२५॥ यच्छास्त्रं हि भवेन्नैव चतुर्वर्गप्रदं भुवि ॥ न तच्छास्त्रं कलौ किन्तु तत्तच्छा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वमागतम् ॥२६॥ सुवर्णादि परित्यज्य पांशूनामादरः कृतः ॥ अमृतं हि परित्यज्य कृतं विषनिषेवणम् ॥२७॥ रत्नबुद्ध्या भस्म मुष्ट्यां करोति सञ्चयं जनः ॥ तीर्थस्थानं परित्यज्य कदर्य्यस्थानसेवनम् ॥ २८ ॥ ईशपूजां परित्यज्य मानवानामुपासनम् ॥ नास्ति यज्ञो न वा दानं न मानो देवतार्चनम् ॥२९॥ सुखलिप्सा यशोलिप्सा धनलिप्सा पदे पदे ॥ कलेरस्य समारम्भ ईदृशश्चेद्विपर्य्ययः ॥३०॥ काले किंवा भविष्यन्ति हरिर्जानाति तत्त्वतः ॥ श्रुतं गुरुमुखात्सूत भविष्यन्ति कलाविह ॥३१॥ इन्द्रियादिसमासक्ता मानवाः पशुभिः समाः॥तेजस्विनस्तेजःशून्या नरो लुप्ताः प्रभञ्जनाः[1]॥३२॥भक्ष्यन्ति लोकानादित्याः प्राणिहीना वसुन्धरा॥महामारी धरण्यां हि भविष्यति क्षयंकरी॥३३॥ दृष्ट्वा श्रुत्वा जायते च मनसि विषमा व्यथा॥मोक्षकर्त्री परप्रीतिः कुत्रापि तु न लक्ष्ये॥३४॥कथं वास्य नृलोकस्य भविष्यति शुभं परम्॥तदुपायं कलौ चास्मिन्ब्रूहि तत्त्वविदां वर ॥३५॥ सूत जानासि भद्रन्ते त्वं हि द्वैपायनप्रियः॥ वदन्ति पण्डिताः सर्वे धर्मतत्त्वं सुगोपितम्॥३६॥ व्यासादवगतः सम्यक्त्वं हि धर्मविदां वरः॥ त्वया खलु पुराणानि सेतिहासानि चानघ॥३७॥आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत॥ यानि वेदविदां श्रेष्ठो भगवाबान्दरायणः ॥ ३८ ॥ अन्ये च मुनयः सूत परावरविदो विदुः ॥ तेभ्यः सारं समुद्धृत्य गोपीकान्तकथाश्रयम् ॥ ब्रूहि भद्राय भूतानां येनात्मा सुप्रसीदाति ॥ ३९ ॥ कथासु तत्कथा श्रेष्ठा यच्छुत्वा न ह्यलं मतिः ॥ यच्छृण्वतां रसज्ञानां भक्तिर्मुक्तिः करस्थिता ॥ ४० ॥ इति श्रीसकलपुरणसारभूते आदिपुराणे वैयासिके कथारंभो नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ निवृत्ते शौनके इत्थं दालभ्यो मुनिसत्तमः ॥ प्रतिपूज्य वचस्तस्य प्रवक्तुमुपचक्रमे ॥ १ ॥ दालभ्य उवाच ॥ सूतसूत महाभाग परितुष्यति यया

१ परंस्परैत्यस्य प्रकर्षेण भञ्जना भञ्जका इत्यर्थः । प्रवञ्चका इति वा पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनः ॥ उन्नतिश्च भजेत्सम्यगात्मा बुद्धिस्तथैव च ॥२॥ सत्कथा चोच्यते सैव तया शोको विनश्यति ॥ औत्सुक्यं जायते तस्मादुक्त्या त
न्मे निवारय ॥ ३ ॥ गृत्सपाद उवाच ॥ दानेनोपासनेनैव शास्त्रस्याध्ययनेन च ॥ नराणां सफलं दिनं शेषश्च द्विविधं भवेत् ॥ ४ ॥ गुरोः
सम्यगध्ययनं तथा साधुजनाच्छ्रुतम् ॥ अतो भवन्मुखाच्छ्रोतुमौत्सुक्यं हृदि जायते ॥ ५ ॥ वात्स्यायन उवाच ॥ उपदेशप्रदानेन उप
कुर्वन्ति ये जनाः ॥ भवादृशाः साधवस्ते सत्कथाश्रवणं वरम् ॥ ६ ॥ पतिभक्तिरबलानां गृहस्य भूषणं धनम् ॥ विनयो हि यौवनस्य
त्यागो वृद्धस्य भूषणम् ॥ विद्या च नरलोकस्य तथा साधुवचः परम् ॥७॥ शततपा उवाच ॥ सत्कथा पुष्पमालेव नृणां मानसहारिणी ॥
सत्प्रवृत्तिसमासाऽपि आत्मनः शुभदायिनी ॥८॥ स्थूलशिरा उवाच ॥ यत्रयत्र हरिकथा सासा तीर्थसमा मता ॥ साधुवादरतानां हि हरि
र्देहं समाश्रयेत् ॥९॥ त्वं महाभाग्यसम्पन्नो हरिलीलाप्रचारकः॥ त्वन्मुखाम्भोजगलितं पिबामि च कथामृतम् ॥१०॥ गौतम उवाच ॥ अहं
कारोऽभिमानश्च विमोहयति मानसम् ॥ परमार्थो न दृश्येत तन्निराकरणादृते ॥ ११ ॥ सत्कथालोचनेनैव श्रीहरेरनुकम्पया ॥ विनाशो
मोहतमसो भगवत्प्रीतिशर्म्मदः ॥ १२ ॥ जाबालिरुवाच ॥ मानवश्चेत्सत्कथायां बाल्यावधिसमुत्सुकः ॥ सफलं जीवनं तस्य अन्ते च
सुखभाजनम् ॥ १३ ॥ त्रितापं नाशयत्येव हरिलीलामृतं वचः ॥ संसारज्वरसन्ततसर्वव्याधिविनाशनम् ॥ १४ ॥ जातूकर्णिरुवाच ॥
तस्य जिह्वा भवेत्साध्वी सत्कथामृतनिर्वृता ॥ विषयास्वादसंक्लिष्टा केवला रसना परा ॥ १५ ॥ उष्मप उवाच ॥ या च ज्ञानं न ददते
सा न विद्या वृथा हि सा ॥ विषयेषु च सत्क्षान विकलानीन्द्रियाणि वै ॥१६॥ ते नरा यंत्रसदृशाः सदालापविवर्जिताः ॥ हरिभक्तिविही
ना ये केवलं व्यसनान्विताः ॥ १७ ॥ स्वस्वधर्मान्परित्यज्य परधर्मे रताश्च ये ॥ ते सर्वे विफलायासाः केवलं क्लेशभागिनः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः सूत महाभाग ब्रूहि योगेश्वरे हरौ ॥ कथं भक्तिर्भवेन्नृणां जन्मकर्म्मविनाशिनी॥ १९ ॥इत्थन्त्वृषिवचः श्रुत्वा सूतो हरिपरायणः ॥
प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ २० ॥ ऋषयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलम् ॥ यत्कृतः कृष्णसम्प्रश्नो भवनिस्तारणः परः ॥
॥ २१ ॥ मधुरमधुरमेतन्मंगलं मंगलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम् ॥ सकृदपि परिगीतं श्रद्धया हेलया वा मुनिवर नर
मात्रं तारयेत्कृष्णनाम ॥ २२ ॥ नमामि नारायणवेदविग्रहं सत्यं चिदानन्दमयं त्रिमूर्त्तिकम् ॥ भक्तान्सदा मोचयितुं यदागमो नमामि
तं देवमनन्तमाद्यम् ॥ २३ ॥ भगवंतमहं वन्दे व्यासरूपं सनातनम् ॥ यत्कृपालेशतो लोकः शास्त्रज्ञानयुतो भवेत् ॥ २४ ॥ स्वसुखनिभृ
तचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्णसारस्तदीयम् ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं
नतोऽस्मि ॥ २५ ॥ समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभूद्वेदो प्रणवात्मा सनातनः ॥ २६ ॥ सेतिहासपुराणो हि
भगवच्छक्तिनोदनात् ॥ काले तस्याग्रहं दृष्ट्वा व्यासभूतः परः प्रभुः ॥ २७ ॥ द्वापरे अवतीर्णोऽभूत्तद्विभागं चकार ह ॥ सर्वशास्त्रसार
भूतो ह्ययमादिपुराणकः ॥ २८ ॥ श्रुतो मया गुरुमुखात्पूर्वकल्पकथामयः ॥ अधुना श्रावयिष्यामि शृणुष्वावहितस्ततः ॥ २९ ॥ इदं वेद
रहस्यं वै सर्वलोकशुभप्रदम् ॥ व्यासदेवेन रचितं हरिलीलाकथामयम् ॥ ३० ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके
पुराणोत्पत्तिर्नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ जयति यशोदासूनुर्यो हि समस्ताश्रयः साक्षी ॥ भवभयनिर्भयनिर्वृतौ शरणागतानां
शर्मदश्चेति ॥ १ ॥ व्यास उवाच ॥ सनत्कुमारोक्तमिदं पुराणं यतो न किञ्चित्परमस्ति पूर्वम् ॥ मया श्रुतं नारदतो वदर्य्यां
श्रद्धालुना चादिपुराणसंज्ञम् ॥ २ ॥ एकदा नारदो लोकान्पर्य्यटंश्च यदृच्छया ॥ सरस्वतीतटस्थं तु मदीयाश्रममागमत् ॥ ३ ॥ दृष्ट्वा तमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतं दूरान्मच्छिष्या दीर्घसत्रिणः ॥ प्रत्युत्थायासनार्घ्यैस्तं पूजयामासुरादरात् ॥ ४ ॥ समर्च्चयित्वा ते प्रोचुर्मुने भाग्योदयो महान् ॥ तव
सन्दर्शनं लब्धं नष्टं नो हृद्गतं तमः ॥ ५ ॥ अद्य नो जन्मसाफल्यं तपसश्च परं फलम् ॥ जातं यद्दर्शनं तेऽद्य दुर्ल्लभं प्राणिनामिह ॥ ६ ॥
विष्णोर्माया भगवती यथा संमोह्यते जगत् ॥ यथा तस्यास्तिरस्कारो भवेद्वद महामुने ॥ ७ ॥ अनया नियतं बद्धा मुनयः कोटिशो मुने ॥
योगिनो मोहिताश्चान्ये वंचिताः सन्ति संसृतौ ॥८॥ आसक्ता देहगेहादौ बन्धमायांति चेतसः ॥ केचिद्योगरता मूढा दयादानपरायणाः ॥९॥
अज्ञाः कर्मपराः केचित्संसारविनिषेवकाः ॥ न विदन्ति निजं श्रेयो भजनं विशदं हरेः ॥ कथं संसारसन्तारस्तेषां ब्रूहि तपोधन ॥ १० ॥
नारद उवाच ॥ विष्णोर्मायास्वरूपन्तु दुर्ज्ञेयं ब्रह्मवादिभिः ॥ तत्त्वतः कथितुं को हि क्षमः स्यान्मुनिसत्तमाः ॥ ११ ॥ विमोहायं स्वरूपाणि
भूतानां निजमायया ॥ चरितान्यवताराणामपि को वक्तुमर्हति ॥ १२ ॥ तथापि किञ्चिद्वक्ष्यामि मुनयः श्रोतुमर्हथ ॥ संसारोत्तारणायैव कुमा
राच्च यथाश्रुतम् ॥ १३ ॥ तद्ब्रह्म सूक्ष्मं को वेद कथं भक्तिर्भवेत्तथा ॥ शृण्वन्स्मरन्गृणन्विष्णोरवतारकथाः शुभाः ॥ १४ ॥ पुनात्यात्मा
नमन्यञ्च किं पुनर्योऽर्च्चयेद्धरिम् ॥ अन्तरायो भवत्येव लोके विष्णुपदाप्तये ॥ १५ ॥ देवतान्तरसेवा च बन्धूनाञ्च समागमः ॥ धनाकांक्षा
भिमानञ्च योषित्स्वासक्तिरेव च ॥ १६ ॥ न जानान्ति नरा मूढा किं दैवैः सेवितं सुखम् ॥ श्वलांगूलं समाश्रित्य को हि तीर्णोऽम्बुधेर्जलम्
॥ १७ ॥ येऽधमाः पापकर्म्मणो देवतान्तरसेवकाः ॥ कामिनो विष्णुविमुखास्ते यान्ति नरके ध्रुवम् ॥ १८ ॥ पतिं त्यक्त्वा यथा नार्य्यो
जारं सौख्यागमेच्छया ॥ अच्युतं निन्दयँल्लोके जीवो यात्यधमां गतिम् ॥ १९ ॥ देवाश्च कर्मसाचिवाः केवलं स्वहिते रताः ॥ अपराधकृते ॥५॥
ऽल्पेऽपि देहद्रविणनाशकाः ॥ २० ॥ यैर्यैः संसेविता देवा नैव तेषां सुखं ध्रुवम् ॥ सदैव सूर्य्यं संसेव्य पंगुरेवारुणोऽभवत् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवसेवां समासाद्य क्षयं प्राप वृकोदरः ॥ बाणो बाहुसहस्रस्य नाशं कृष्णादवाप ह ॥ २२ ॥ विश्वरूपः सुरपतिं सन्तोष्य निधनं गतः ॥
आराधनविरोधाभ्यां देवैर्नाशो हि दृश्यते ॥ २३ ॥ विपरीतमिदं विष्णोरुभाभ्यां मुक्तिभाग्भवेत् ॥ आराध्य मुनयो गोप्यः कुब्जा चैद्यो
द्विषन्हरिम् ॥ २४ ॥ हनूमाञ्जाम्बवान्भीष्मोऽन्येऽपि तत्प्रियतां गताः ॥ यस्य तस्य समुद्धारः संसृतेः स्यान्न संशयः ॥ २५ ॥ अथ स्त्री
संगमे दोषान्कथयामि मुनीश्वराः ॥ श्रुतिस्मृतिपुराणेषु संगः स्त्रीणां निवारितः ॥ २६ ॥ यत्संगात्संक्षयं याति पुमानग्निगतो यथा ॥ रचिता
देवमायेयं विमोहाय नृणामिह ॥ २७ ॥ स्त्रीसंगाज्जायते पुंसां सुतागारादिसंगमः ॥ यथा बीजांकुराद्वृक्षो जायते फलपत्रवान् ॥ २८ ॥
एकया योषिता लोका अन्धे तमसि पातिताः ॥ यथा गजो मदोन्मत्तः करिण्या पंकपातितः ॥ २९ ॥ अहो जनानां मोहोऽयं स्ववि
नाशं न पश्यताम् ॥ संगो भवति योषित्सु पतंगानामिवाग्निषु ॥ ३० ॥ अहो आभिः किं न कृतमनिष्टं पुरुषेष्विह ॥ याभिर्वशं समा
नीताः खरा इव नराधमाः ॥ ३१ ॥ एवं धनादिविषयेष्वासक्ताश्च जना इह ॥ सत्यं धर्मं दयां मैत्रीं त्यक्त्वा यान्ति भवार्णवे ॥ ३२ ॥
अतो नृलोके सत्संगात्त्यक्तदुःसंग आत्मवान् ॥ भक्त्या हरिं भजन्नित्यं निष्कामः श्रेय आप्नुयात् ॥३३॥ स वेद धातुः पदवीं परस्य दुरन्तवी
र्यस्य रथांगपाणेः॥ यो मायया सन्ततयानुवृत्त्या भजेत तत्पादसरोजगन्धम् ॥३४॥ अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे॥
कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त्त उग्रः ॥ ३५ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके सूतशौनकसं
वादे पञ्चमोऽध्यायः ॥ ५ ॥ ॥ एकदा यादवः कश्चिद्वसुदेवो महामनाः ॥ पाणिं गृहीत्वा देवक्याः प्रयाणे रथमारूहत् ॥ १ ॥
उग्रसेनसुतः कंसो भोजानां कुलपांसनः ॥ प्रत्युज्जगाम भगिनीं रौक्मैः रथशतैर्वृतः ॥ २ ॥ तदाभूद्दैववाणीयं सर्वेषां शृण्वतां पथि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यास्त्वामष्टमो गर्भो हन्ता यां वहसेऽबुध ॥ ३ ॥ तच्छ्रुत्वा स खलः कंसो देवकीं हन्तुमुद्यतः ॥ वसुदेवस्य वाक्येन वारितो गृहमागमत् ॥ ४ ॥ ततस्तौ निगडैर्बद्ध्वा चोग्रसेनं सहानुजम् ॥ बुभुजे विषयान्सर्वान्स्वयं दुर्मन्त्रिभिः सह ॥ ५ ॥ अवधीच्च स्वसुः पुत्रान्कीर्तिमन्तादिकान्हि षट् ॥ संकर्षणं सप्तमे तु ईशान्या योगमायया ॥ ६ ॥ निहन्तुं नाशकत्पापो रोहिण्यां सन्निवेशितम् ॥ अष्टमे भगवान्विष्णुः सच्चिदानन्दविग्रहः ॥ ७ ॥ मनःस्थो वसुदेवस्य देवकीगर्भ आविशत् ॥ तज्जन्मकाले देवाश्च ब्रह्मेशानपुरःसराः ॥ ८ ॥ भूभारहरणार्थं वै देववृन्दैश्च याचितः ॥ गोकुले प्रकटार्थश्च सत्त्वमूर्तेस्तु मंत्रवत् ॥ ९ ॥ कारागृहं समासाद्य अभिष्टूय दिवं ययुः ॥ ततश्च निजरूपेण सम्भूतश्च हरिः स्वयम् ॥ १० ॥ पितृभ्यां संस्तुतो नीतः पित्रा भीतेन गोकुलम् ॥ कंसश्च चंडिकावाक्यमाकर्ण्यातिभयाकुलः ॥ ११ ॥ दुर्मन्त्रिभिर्हितं मेने पापो बालादिहिंसनम् ॥ नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ॥ १२ ॥ चक्रे महोत्सवं पश्चाद्वसुदेवसमागमः ॥ ततश्च पूतनां कृष्णः कंसेन प्रेषितां स्त्रियम् ॥ १३ ॥ पीत्वा स्तनं गोकुले तु प्रददौ जननीगतिम् ॥ कंसेन प्रेरितान्पश्चात्सर्वानिव महासुरान् ॥ १४ ॥ हेलया हतवान्कृष्णः शनकैर्नरलीलया ॥ उत्क्षिपञ्शकटं व्योम्नि तृणावर्त्तमधः क्षिपन् ॥ १५ ॥ वत्सान्पालयता तेन हतौ वत्सबकासुरौ ॥ अघासुरवधः पश्चात्ततो ब्रह्मविमोहनम् ॥ १६ ॥ धेनुकस्य वधः पश्चात्कालीयस्य च शासनम् ॥ दावाग्नेर्मोक्षणं पश्चात्प्रलम्बस्य विघातनम् ॥ १७ ॥ दर्शयन्विश्वमास्ये च बाल्यलीलां समादधे ॥ मृद्भक्षणाभियोगे हि विश्वरूपं प्रदर्शितम् ॥१८॥ नामकृद्गर्गवाक्येन निजतत्त्वमसूसुचत् ॥ दध्यादिस्तेयं पश्चाच्च ततो दाम्ना च बन्धनम् ॥ १९ ॥ यमलार्ज्जुनयोर्भङ्गस्तेषां मोक्षश्च कीर्तितः ॥ वृन्दावनं समागत्य बाल्यलीला वयस्यकैः ॥ २० ॥ प्रावृट्क्रीडा गिरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धृतिः शरत्क्रीडा ततः परम् ॥ अष्टमे वस्त्रहरणं नवमे रासचेष्टितम् ॥ २१ ॥ वात्सल्यादिप्रकाशाय वृन्दावनपतेर्हरेः ॥ ततश्च मथुरालीला द्वार्वत्याश्च ततः परम् ॥ २२ ॥ ऐश्वर्य्यमिश्रिता चैवं नरलीला प्रकीर्त्तिता ॥ २३ ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ धर्मसंरक्षणार्थाय यस्य लीला भवेदिह ॥ २४ ॥ द्वापरे युगपर्य्यन्ते यथाकाले हरिः स्वयम् ॥ आविरासीत्पृथिव्यां वै नैव मिथ्या कदाचन ॥ ॥ २५ ॥ अवतारा ह्यसंख्येया हरेर्विश्वपतेर्भुवि ॥ चतुर्युगावताराश्च प्रधानाः कथिता बुधैः ॥ २६॥ अप्राकृतगुणैः पूर्णो नित्यास्त्रपार्षदैर्युतः॥ प्रेयसीभिर्वयस्यैश्च तथा नित्यपुरे स्थितः॥२७॥ उपकाराय जीवानां भावानुकरणेन हि ॥ भगवद्भक्तिसाफल्यं लीलायां प्रकटीकृतम् ॥२८॥

॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके सूतशौनकसंवादे षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥

स्त्रिया मोहिकया के न निहता भुवनत्रये ॥ कच्छो यथा ज्वलद्वह्निं दृष्ट्वैवोल्लासितो भवेत् ॥१॥ दाहदुःखं न जानाति स्त्रियं दृष्ट्वा तथा पुमान् ॥ देहं मूत्रपुरीषैश्च पूरितं मन्यते वरम् ॥२॥मेदोऽस्थिरक्तमज्जाढ्यं रमते तत्र मोहितः ॥ यथा विष्ठासमुद्भूतः कीटस्तत्रैव मोदते ॥३॥ तथापवित्रे स्त्रीदेहे मोदते मोहितो भृशम् ॥ तदर्थं दुःखमाप्नोति सुखवन्मन्यते गृहे ॥४॥ धनार्जने परं यत्नं करोत्यशुभकर्म च ॥ तृष्णया भववाहिन्या जगद्भूता इतस्ततः ॥ ५ ॥ प्रधावन्ति मूढधियो ह्यनिशं धनकांक्षया ॥ प्रियान्प्राणाननादृत्य समुच्छ्राम्यति मूढधीः ॥ ६ ॥ हिताहितं न जानाति नैहिकं पारलौकिकम् ॥ तृष्णानीहारनष्टाक्षो न जानाति वयो गतम् ॥ ७ ॥ न बन्धुर्न पिता माता न तस्य स्त्री सहोदरः ॥ एकमेव परं वित्तं नान्यं किञ्चन संसृतौ ॥ ८ ॥ यदर्थं त्यजति प्राणान्पितृमातृसहोदरान् ॥ सत्यं धर्मं दयां मैत्रीं न धनाशां कथञ्चन ॥ ९ ॥ मानापमानं गणयेन्नैव भावि शुभाशुभम् ॥ इच्छते धनमेवैकं कृत्वाप्यधमसेवनम् ॥ १० ॥ पोष्याः पुत्रकलत्राद्या देयमेभ्यः सुखं पुनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न सदर्थे स्ववित्तस्य करोति कुमतिर्व्ययम् ॥११॥ न साधुभ्यो धनं किञ्चिद्दातुमुत्सहतेऽबुधः॥ देवे दत्तमक्षयं स्यात्परत्रेह शुभं यथा ॥१२॥ यदि न स्याद्गृहे वित्तं विवाहाद्यर्थसिद्धये ॥ ऋणेनापि च कुर्व्वन्ति प्रतिष्ठार्थं जनेषु हि ॥ १३ ॥ बन्धुष्वासक्तचित्तस्य न पोषणपरस्य च ॥ अहर्निशं क्लेशवतः कुतो ज्ञानं कुतः सुखम् ॥ १४ ॥ ज्ञात्वाथ धर्मकर्म्माणि तदर्थं क्लिश्यते भृशम् ॥ न ददाति न भुङ्क्ते च जातेऽपि धनसञ्चये ॥ १५ ॥ न करोति हरेर्भक्तिं न दानं साधुसंगमम् ॥ न तीर्थयात्रां कृपणः कुटुम्बासक्तमानसः ॥ १६ ॥ कुर्व्वन्तं विष्णुभक्त्यादि परं चोपहसत्यसौ ॥ निःस्नेहोऽयं चासमर्थो न पुष्णाति स्वबान्धवान् ॥ १७ ॥ परलोकः केन दृष्टः क्व वा मुक्तिर्भविष्यति ॥ स्वजनः क्लिश्यते यत्र मूढस्यास्य कुटुम्बिनः ॥ १८ ॥ यदि कुटुम्बव्यासक्तो महामोहवशं गतः ॥ नाशयत्यात्मनात्मानं नैवोद्धरति संसृतेः ॥ १९ ॥ अभिमानश्च कुरुते कोमदन्योऽस्ति भूतले ॥ देशाद्देशान्तरं याति राज्ञां सेवां करोति च ॥ २० ॥ पौरुषेण च युक्तस्य जनस्यैव महीतले ॥ अबान्धवोऽपि बन्धुः स्यादन्यस्यात्र महाजनाः ॥२१॥ गृहं कस्य सुताः कस्य मित्राणि स्वजना स्त्रियः ॥ कश्चिन्न सुखदो लोके शरीरे दुःखसम्भवे ॥२२॥ यावद्देहो मनुष्यस्य समर्थः कार्य्यसाधने ॥ तावत्समादरं याति विपरीतमतोऽन्यथा॥२३॥ तस्मात्तथा साधनीयमारोग्यं पौरुषं यतः ॥ एवं चिन्तयमानस्य कालो याति भृशं वृथा ॥ २४ ॥ अहं ममेति मूढस्य स्वदेहेत्यभिमानिनः ॥ कामासक्तस्य नो सिद्धमैहिकं पारलौकिकम् ॥ २५ ॥ विघ्नभूतास्तु पञ्चैव विद्यन्तेऽत्र शरीरिणः ॥ देवतान्तरसेवा स्त्रीसंगमो धनसञ्चयः ॥ २६ ॥ स्वबान्धवेषु चासक्तिरभिमानश्च पञ्चमः ॥ एतैर्मोहितचित्तस्य न भक्तिः स्याज्जनार्दने ॥ २७ ॥ इत्थं शनैस्त्यक्तसत्त्वो जनो यात्यधमां गतिम्॥ मुनयः सन्ति लोकेऽस्मिंस्तपसा दग्धकिल्बिषाः ॥२८॥ शंकिता घोरसंसारान्नितरां वनमाश्रिताः ॥ केचिद्धरिपदं प्राप्ताः परावृत्ता न भूतले ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तिभावविधानास्ते पार्षदाः सन्निधौ स्थिताः ॥ न त्यजंति क्षणमपि क्वापि पार्श्वं मधुद्विषः ॥ ३० ॥ तस्मान्न सा गतिर्नृणां भवेत्कपटकर्म्मि
णाम् ॥ ३१ ॥ ऋषय ऊचुः ॥ नारदः पार्षदश्रेष्ठो विष्णोरेकान्तभक्तिमान् ॥ कृष्णं हित्वा तस्य लोकान्प्रति पर्य्यटनं कथम् ॥ ३२ ॥
सूत उवाच ॥ संसारकूपपतितं विषयैर्मुषितेक्षणम् ॥ ग्रस्तं कालाहिना दृष्ट्वा जायतेऽस्य दया जनम् ॥ ३३ ॥ मोहोऽयं पञ्चधा प्रोक्तो बन्ध
नाय नृणामिह ॥ मायागुणैः प्रतीकारं तस्य वक्ष्ये द्विजोत्तमाः ॥ ३४ ॥ नहि कश्चिदुपायोऽत्र भगवन्तं हरिं विना ॥ सर्वः सर्वैः सहचरत्य
वस्थास्वनुवर्त्तते ॥ ३५ ॥ स्वीयवृत्तेश्च संयोगं निमित्तीकृत्य भोगभाक् ॥ स जीवो वर्त्तते गर्भे यथा तत्कथयाम्यहम् ॥ ३६ ॥ यदैव जायते
संगः शुक्रशोणितयोरिह ॥ गर्भभ्रूणस्त्वनुदिनं तदारभ्य प्रवर्द्धते ॥ ३७ ॥ द्रवरूपं तदेकाह्ना कललं जायते त्र्यहात् ॥ वृद्धिस्तु सप्तरात्रेण
पक्षेण कठिनं भवेत् ॥ ३८ ॥ शिरो मासद्वयेन स्यात्पाणिपादं त्रिमासकैः ॥ कट्युदरांगुलीरूपं तुर्य्ये मास्यभिजायते ॥३९॥ जायंते मासि
रक्तादिधातवः सप्त पञ्चमे ॥ षष्ठे तु पृष्ठवंशादिकीकसं कर्णनासिके ॥ ४० ॥ मुखं नेत्रञ्च भवति नखरोमादि सप्तमे ॥ सूक्ष्मभावोस्थनि
यच्च युगपज्जायतेऽखिलम् ॥ ४१ ॥ ओजोऽष्टमे सञ्चरति गर्भे मातरि चासकृत् ॥ तेन मातुर्भवेद्ग्लानिर्जातश्चैव न जीवति ॥४२॥ स देही
नवमे मासि सर्व्वलक्षणसंयुतः ॥ जानञ्छुभाशुभं कर्म्म संस्मरेत्पूर्व्वजन्मजम् ॥ ४३ ॥ मातरो विविधा दृष्टाः पितरो भ्रातरस्तथा ॥ नाना
योनिमहं प्राप्तो मनुष्यपशुपक्षिणाम् ॥ ४४ ॥ तत्रोषितोऽतिदुःखेन गर्भे मूत्रमलावृतः ॥ उल्वेन वेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः ॥ ४५ ॥
गर्भाशये स्थितो देही ज्ञातवांश्चिन्तयेदिदम् ॥ किं कृतं दुष्कृतं कर्म्म यतो गर्भे निवेशितः ॥ ४६ ॥ पतितो निरये घोरे दुःसहे गर्भसंज्ञिते ॥
यदितो निर्गमिष्यामि भजिष्यामि हरिं प्रभुम् ॥ ४७ ॥ येन भूयो गर्भवासदुःखं द्रक्ष्यामि न क्वचित् ॥ ततः स दशमे मासि नवमे चानिलैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलात् ॥ ४८ ॥ निःसारितोऽतिदुःखार्त्तो योनिमार्गेण संकटात् ॥ निर्गतो योनितो देही मायया श्लिष्यते पुनः ॥ ४९ ॥ पितृभ्यां जडव द्बालः पोष्यमाणोऽतिमूढधीः॥अहो पोषणचातुर्य्यं हरेरद्भुतकर्म्मणः ॥ ५० ॥ गर्भे नानाह्यान्त्रनाडीप्रातैर्नैवरसेन भृत् ॥ मातुर्जंघान्न पानोत्थैर्वाल्येस्तन्यैश्च पोषणम् ॥ ५१ ॥ शक्तिर्न चालनेऽङ्गानां पार्श्वस्य परिवर्त्तने ॥ दष्टः शय्यास्थितैः कीटैर्मलाक्तः शयितः सुखम्॥५२॥ मूकस्तु कर्मणा शक्तः पंगुर्याने गृहे कुणिः ॥ काले कतिपयातीते भाषते परिगच्छति ॥ ५३ ॥ दिवानिशं समीपेऽस्य वर्त्तते हितकृद्धरिः॥ इन्द्रियाणां परावृत्त्या नैव जानाति मूढधीः ॥ ५४ ॥ तं विना पोषकः कोऽन्यो धाता पालयिता प्रभुः ॥ आदौ मध्ये तथान्ते च हरिः सर्वत्र संस्थितः ॥ ५५ ॥ न तं विना क्वचित्स्नेहो देहगेहसुतादिषु ॥ न तिष्ठति क्षणमपि दग्धतंतुर्यथा पटः ॥ ५६ ॥ तस्मिन्वि निःसृते देहात्तत्र सर्वेन्द्रियाणि च ॥ स्ववृत्तिषु निवर्त्तन्ते मृत इत्युच्यते नृभिः ॥ ५७ ॥ यदि तेन भवेत्स्नेहो हरिणा न गृहादिषु ॥ कथं मोहः पुनः कार्य्यो मोहाब्धिनरकं व्रजेत् ॥ ५८ ॥ तस्मान्नित्यं स भगवान्सेव्यः सत्पुरुषैरिह ॥ कामिन्या व्यभिचारिण्या यथाकालप्रबु द्धया ॥ ५९ ॥ यथा प्रपद्यते जारस्तुष्यते स च सर्वथा ॥ यथा कल्पतरुः साक्षादाश्रितेभ्योऽर्थदो भवेत् ॥ ६० ॥ कोटिभिर्बन्धुभिर्नैव कर्त्तुं शक्यं हितैषिभिः ॥ हृदयस्थेन हरिणा क्रियते यज्जनस्य हि ॥ ६१ ॥ अत्युन्नतं नमयति नमितं परिवर्द्धयेत् ॥ क्षणाद्वर्द्धयते हीनं करोत्येकं क्षणेन हि ॥ ६२ ॥ चिंतितं पुरुषैः कार्य्यं यत्नैश्च परिरक्षितम् ॥ नानापापैर्विरचितं नश्यते न विनाशितम् ॥ ६३ ॥ तृणीकरो त्यसौ मेरुं तृणमेकं करोति यः ॥ अच्छेद्यं छेदयत्याशु अभेद्यं भेदयत्यपि ॥ ६४ ॥ब्रह्माण्डकोटिस्रष्टा स कटाक्षक्षणमात्रतः ॥ संहर्त्ता पाल कश्चैकस्ततः कोऽन्यो भवेद्विभुः ॥ ६५ ॥ ये संस्थिता आत्मनि योगवन्तस्तद्भक्तिभावेन सुखं निविष्टाः ॥ स्वर्गादिसौख्यं परिहृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरादानन्दसन्दोहमवाप्नुवंति ॥ ६६ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके सूतशौनकसंवादो नाम सप्तमोऽध्यायः ॥ ७ ॥ सूत उवाच ॥ ये भक्तियुक्ता गोविन्दे तेषां वक्ष्यामि लक्षणम् ॥ आत्मनः श्रेय इच्छद्भिः श्रोतव्यं मनसास्तिकैः ॥ १ ॥ न हि वाञ्छन्ति ते स्वर्गमणिमादिकमष्टकम् ॥ ब्रह्मलोकं धरेशत्वं सर्वं कालपरिप्लुतम् ॥ २ ॥ तथा मुक्तिं न वाञ्छन्ति ये भक्तास्ते हरिप्रियाः ॥ न तथा तत्प्रिया लक्ष्मीर्वक्षस्थापि निरन्तरम् ॥ ३ ॥ महादेवो नाप्यनंतो यथा भक्तो हरेः प्रियः ॥ लोकेस्मिन्स्वामिनः संति सेवकैः परिरक्षिताः ॥ न तथायं हरिः स्वामी पाति भक्त्यान्स्वयं यतः ॥ ४ ॥ ऋषयः ऊचु ॥ के भक्ताः का क्रिया तेषां लक्षणञ्च तथा मुने ॥ कथं हि भजनं विष्णोर्यतः प्रीतो भवेद्धरिः ॥५॥ सूत उवाच॥अनन्यशरणाः शान्ताः साधवः साधुभूषणाः ॥ यशो मुरारेः शृण्वन्ति कथयंति स्मरंति च ॥ ६ ॥ ये कलत्रगृहप्राणान्पुत्रवित्तेष्टमंगलम् ॥ त्यक्त्वा तच्छरणं प्राप्ताः स कथं तां समुत्सृजेत् ॥ ७ ॥ अहर्निशं प्रियो येषां हरिरात्मा सतां गतिः ॥ तं विनान्यं न जानन्ति भक्तास्ते च हरेः प्रियाः ॥ ८ ॥ यादृशी च क्रिया येषां तां शृणुध्वं द्विजोत्तमाः ॥ हर्य्यर्थं गृहकार्याणि देहागारसुतादयः ॥९॥ मिथो हि नितरां कृष्णश्रवणं कीर्त्तनं प्रियाः ॥ वाचा गायंति तल्लीलां कर्णैः शृण्वन्ति तद्यशः ॥१०॥ पाद्भिर्गच्छंति क्षेत्राणि करैर्मन्दिरमार्जनम् ॥ पश्यंति रूपं चक्षुर्भ्यां गंधं जिघ्रंति नासया ॥११॥ हरेर्निर्म्माल्यपुष्पस्यालिङ्गनं ये च कुर्वते ॥ भक्त्या पादोदकं पीत्वा यान्ति सन्तर्पणं हृदि ॥ १२ ॥ मानसे चरणं विष्णोर्नैवेद्यमुदरे तथा ॥ निर्माल्यचंदनं भाले मस्तके तुलसीदलम् ॥ १३ ॥ धारयंति प्रतिदिनं श्रीकृष्णैकाग्रचेतसः ॥ एवं क्रिया हि भक्तानां लक्षणानि वदाम्यहम् ॥ १४ ॥ लोकश्रुतिविभक्तानि सर्वशास्त्रोचितानि च ॥ आचरणानि चिह्नानि वैजयंतीव वैष्णवी ॥ १५ ॥ दृश्यंते येषु भक्तेषु त एव हि प्रिया हरेः ॥ क्षिप्ता वमानिता ध्वस्तास्ता

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डिताः पीडिता अपि ॥ १६ ॥ न विक्रिया प्रभवति प्रतीकारं न कुर्वते ॥ हितं कुर्वंति सर्वेषां करुणा दीनवत्सलाः ॥ १७ ॥ तितिक्षवोऽल्प
वाचो हि महांतो लोकपावनाः ॥ ते प्रियाः श्रीहरेर्भक्ताः प्रेममाध्वीकमक्षिकाः ॥ १८ ॥ भजनं विमलं विष्णोर्भक्तिभावेन चासकृत् ॥ पुंसां
न पुरुषार्थोऽन्यो भजनादिति चिन्तयेत् ॥ १९ ॥ न योगो न च सांख्यश्च न दानं न तपःफलम् ॥ नेष्टापूर्त्तादिकं कर्म परलोकेऽतिसौख्य
दम् ॥ २० ॥ लभेद्योगेन सांख्येन ज्ञानं ब्रह्मैकदर्शनम् ॥ तपसा क्रियया दानैरिष्टापूर्त्तैश्च कर्मभिः ॥ २१ ॥ इहामुत्र फलं लब्ध्वा सुखं
भुक्त्वा पुनः पतेत् ॥ तस्मादनित्यमखिलं दूरतः परिवर्जयेत् ॥ २२ ॥ सुखस्य कारणं विष्णोर्भजनं नापरं शुचि ॥ अयमेव परो धर्मस्तथा
सर्वोत्तमो विधिः ॥ २३ ॥ जन्म तच्छोभनं जन्तोर्जीवितञ्च सुजीवितम् ॥ मनोवाक्कायकर्मैर्यत् सेव्यते हरिरीश्वरः ॥ २४ ॥ सा वाणी या
गुणान्ब्रूते करौ कर्मकरौ हरेः ॥ मनश्च तं स्मरेन्नित्यं चक्षुस्तद्दर्शनोत्सुकम् ॥ २५ ॥ कर्णौ च तत्कथासक्तौ घ्राणं निर्माल्यगन्धहृत् ॥ गात्रञ्च
पावितं विष्णोः पादोदकनिषेवणैः ॥ २६ ॥ धात्रा यत्नाद्दिव्यं नामितुं यच्छिरो हि विहितं मनुजानाम् ॥ देवकीतनयपादसरोजे न नेमे
सदापि भारमिवात्र ॥ २७ ॥ या वदेन्न हरिनाम गुणं सा प्रोच्यते विपुलदर्दुरजिह्वा ॥ तच्छ्रुतेर्हि विमुखावपि कर्णौ भित्तिरन्ध्रमिव कुंडल
कान्तौ ॥२८॥ केकिपिच्छसदृशे नयने ते ये हरेरखिलसौष्ठवरूपम् ॥ पश्यतो न न च गन्धविहीनं राजते नु कमलं विफलं हि ॥ २९ ॥ भूरु
हावयवनिर्मितपादौ यौ न गच्छत इमौ हरिसद्म ॥ तादृशौ कनकभूषितहस्तौ यौ हरेर्न कुरुतः परिचर्य्याम् ॥ ३० ॥ इत्थं विष्णावर्पितानी
न्द्रियाणि यैस्तैर्भक्तैर्जन्म लब्धं पृथिव्याम् ॥ येऽन्ये दुष्टा विषयासक्तचित्ता मनुष्याणां निष्फलं जन्म तेषाम् ॥ ३१ ॥ इति
श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके सूतशौनकसंवादो नामाष्टमोऽध्यायः ॥ ८ ॥ मुनय ऊचुः ॥ क्वास्ते कृष्णः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदा तस्य क्रीडा कुत्र पुरीश्वरी ॥ प्रेष्ठः क्व पर्वतश्रेष्ठः कः का च सरिदुत्तमा ॥ १ ॥ को ग्रामः किं वनं विद्वंस्त्वं तन्नो ब्रूहि. तत्त्वतः ॥ एवं पृष्टो मुनिश्रेष्ठः प्रतिपूज्य वचोऽब्रवीत् ॥ २ ॥ सूतउवाच ॥ माथुरं मंडलं विप्र योजनानाञ्च विंशतिः॥ चक्रं सुदर्शनं नाम तस्योपरि विराजते ॥ ३ ॥ आस्ते यत्र हरिः साक्षान्नित्यं सन्निहितः स्वयम् ॥ न मुञ्चति कदाचिद्वै स्थानं स्वीयं सदा प्रियम् ॥ ४ ॥ तत्स्थानसदृशं स्थानं त्रिदिवेमि च दुर्लभम् ॥ सर्वलोकादृतं शुद्धं वैकुंठेन समं हितम् ॥ ५ ॥ न भूमिः कल्पिता श्रेष्ठा न कालकलितो जनः ॥ योगिनां याज्ञिकानाञ्च तत्स्थानमतिदुर्लभम् ॥ ६ ॥ तत्र रम्या मधुपुरी प्रिया भगवतो हरेः ॥ सरिद्वरायाः कालिन्द्यास्तटे वासमुपेयुषी ॥ ७ ॥ हेमभूर्भूधरश्रेष्ठो गोवर्द्धन इति श्रुतः ॥ यस्मिन्देशेऽस्ति परमः पुण्यवद्भिर्निषेवितः ॥ ८ ॥ यं दधारैकहस्तेन कृष्णो वामेन लीलया ॥ गोपगोपीगवाविष्टा स्नानार्थं च निषेविता ॥९॥ कालिन्दी हि नदीश्रेष्ठा रवेः पुत्री हरेः प्रिया ॥ वृन्दावनं नाम वनं यस्यास्ति सुखसद्मवत् ॥ १० ॥ सर्वं सेवितकृष्णं स्यात्क्रीडा यत्र सदा हरेः ॥ गोपानां वसतिस्तत्र नन्दग्राम उदाहृतः॥११॥ सिद्धा अष्टौ निषेवन्ते प्रभुं तद्ग्रामवासिनः ॥ न कामयन्ते ते मुक्तिं कृष्णानुग्रहशालिनः ॥ १२ ॥ भजतान्तु विभूनां च वैकुंठे मुक्तिरुत्तमा ॥ यां दत्त्वा भगवान्कृष्णो भक्तेभ्यो ह्यनृणो भवेत् ॥ ॥१३॥ योगिभ्यो योगसंसिद्धिं दत्त्वा कामांश्च कामिनाम् ॥ मुनिभ्यः परमां मुक्तिं हरिर्दत्त्वाऽनृणो भवेत्॥१४॥ एते हि वाञ्छिताः सर्वे लब्धं चैषामभीप्सितम् ॥ निष्कामेभ्यो निजं रूपं ध्यानगम्यं चतुर्भुजम् ॥१५॥ न दानैर्न तपोभिश्च तथा योगादिसाधनैः ॥ न दृश्यं भक्तिभावैस्तु दृश्यं वृन्दावनं वनम् ॥ १६ ॥ वनानि द्वादश बुधैः कथितानीह भूतले ॥ नामानि तेषां शृणुत वदाम्युद्देशतः स्फुटम् ॥ १७ ॥ आद्यं मधुवनं तत्र द्वितीयं तालसंज्ञकम् ॥ तृतीयं कुमुदं नाम बहुलाख्यं चतुर्थकम् ॥ १८ ॥ खादिरं पञ्चमं चैव षष्ठं बिल्वकसंज्ञितम् ॥ सप्तमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लौहसंज्ञन्तु भाण्डीरं चाष्टमं स्मृतम् ॥ १९ ॥ नवमं भद्रकं नाम कामिकं दशमं वनम् ॥ एकादशं छत्रवनं वृन्दावनमथादिमम् ॥ २० ॥
तत्र वै द्वादशादित्यास्तेषु विष्णुः परो मतः ॥ तथा बनेषु सर्वेषु परं वृन्दावनं वनम् ॥ २१ ॥ ऋषय ऊचुः ॥ कुतो वृन्दावनं चेदं श्रेष्ठं
माथुरमण्डले ॥ हरेरतिप्रियं कस्मात्कथं क्रीडति नित्यशः ॥२२॥ सूत उवाच ॥ शृण्वन्तु मुनयः सर्वे सुगोप्यं वचनं मम ॥ न कस्याग्रेपि
कथितं साम्प्रतं कथयामि वः ॥ २३ ॥ पुरावृत्ते तु मुनयो दृष्टं मे महदद्भुतम् ॥ एकदा नारदो यातः श्वेतद्वीपमनुत्तमम् ॥ २४ ॥ यत्रास्ते
भगवान्विष्णुर्बिभ्रच्छब्दमयं वपुः ॥ दर्शनार्थं भगवतो गतः स परमात्मनः ॥ २५ ॥ दृष्ट्वा नारायणस्तत्र तमित्थं समवर्द्धयत् ॥ मुने सुस्वा
गतं तेऽस्तु आगच्छोपविशस्व च ॥ २६ ॥ भवतो मे प्रियश्चान्यो भक्तेषु न हि विद्यते ॥ लोकपर्यटने गायन्गुणान्मम समन्ततः ॥ २७ ॥
उद्धरिष्यन्दीनजनान्विषयेष्वतिरागिणः ॥ दर्शनस्पर्शविषयैस्तान्कृतार्थान्करोषि वै ॥२८॥ इदानीं मानुषे लोके का कथा वद मे मुने ॥
किंचित्त्वयाद्भुतं दृष्टमनुभूतमथ क्वचित् ॥ २९ ॥ पृष्टः स तेन मुनयो जगदीशेन भास्वता ॥ तमवोचादिदं विष्णुं लोकवृत्तविदीश्वरम् ॥
॥ ३० ॥ अधुना त्वद्दर्शनेन चित्तं मे विशदीकृतम् ॥ चरँल्लोकान्स्तवोद्गायँल्लीलां भुवनपावनीम् ॥ ३१ ॥ अनुभूतं शृणु विभो
यत्किञ्चिन्मेऽधुना हरेः ॥ भारते मानसं नाम सरोऽस्ति पूतमुत्तमम् ॥ ३२ ॥ अगाधममिषं तत्र दृष्टा मे मुनयो दश ॥ ध्यायन्तः
परमात्मानं गुणातीतं गुणोदयम् ॥ ३३ ॥ न शृण्वन्ति न पश्यंति न वदंति परं गताः ॥ स्थितोऽस्म्यहं चिरं तत्र कदाचित्प्रवदंति
चेत् ॥ ३४ ॥ एते हि नाब्रुवन्ब्रह्म संविग्न आगतस्ततः ॥ तद्ब्रूहि त्वं हृषीकेश किं नु ध्यायंति ते बुधाः ॥ सरस्तीरं कथं याताः के
ते वा वद मे प्रभो ॥ ३५ ॥ अनिरुद्ध उवाच ॥ नारदाद्भुतमेतच्च कथनीयं नहि क्वचित् ॥ तथापि च तव स्नेहात्कथयिष्यामि तच्छृणु ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ध्यायन्ति महात्मानः कृष्णं वृन्दावने स्थितम् ॥ गोपिकारमणं कान्तं परं लावण्यभाजनम् ॥ ३७ ॥ कदाचिद्ध्यायमानाना
माविरासीच्चतुर्भुजः ॥ तं दृष्ट्वा परमात्मानं वैकुंठेशं रमापतिम् ॥ ३८ ॥ अर्चयित्वा महात्मानः प्रत्युत्थानपुरःसरम् ॥ तुष्टुवुः
परया भक्त्या पुटिताञ्जलयः प्रभुम् ॥ ३९ ॥ प्रसन्नो भगवांस्तेषां तपसा बाधितोऽब्रवीत् ॥ यदभीष्टं वरं शश्वद्वरयध्वं महत्तमाः ॥ ४० ॥
मद्दर्शनं हि भूतानां श्रेयसां परमो विधिः ॥ ४१ ॥ महत्तमा ऊचुः ॥ यदि त्वं वरदो विष्णो चास्माकन्तु वरोऽधुना ॥ किं तु रूपं ह्येतदेव
चान्यद्वापि महत्तमम् ॥ को लोकः का प्रिया भूमिः क्व निवासो वदाधुना ॥ ४२ ॥ श्रीभगवानुवाच ॥ अस्ति मे परमं रूपमचिन्त्यपद
सौख्यदम् ॥ तन्नित्यं क्रीडते यत्र बल्लवीगणवेष्टितम् ॥ ४३ ॥ भूलोके भारते वर्षे माथुरे मण्डले शुभे ॥ भूमिः पवित्रातितरां तत्र वृंदा
वनं महत् ॥ ४४ ॥ गोवर्द्धनो गिरिवरो नन्दग्रामः क्षमी प्रभुः ॥ प्रिया सरिद्वरा यत्र कालिन्दी शमनस्वसा ॥ ४५ ॥ इत्याकर्ण्य मुनिश्रेष्ठाः
सोत्कंठा दर्शनोद्यताः ॥ ततस्तानब्रवीद्विष्णुर्माधवो मधुसूदनः ॥ ४६ ॥ यादृशेनाद्य तपसा सम्यगाराधितोऽस्म्यहम् ॥ एतादृशानां तपसां
कोटिभिर्नापि लभ्यते ॥ ४७ ॥ इत्युक्त्वान्तर्दधे विष्णुः स्वर्लोकं भास्वरं ततः ॥ तेऽथ चित्तं समाधाय ध्यानञ्चक्रुरतन्द्रिताः ॥ ४८ ॥
पुनस्ततोऽतितपतामाविरासीत्तथा प्रभुः ॥ तथापि न वरं चेष्टं ददौ तेभ्यः कृपान्वितः ॥ ४९ ॥ शरीराणि गृहीतानि कालकुक्षौ पुनःपुनः ॥
न कर्मजनितान्येव तपसा संचितानि हि ॥ ५० ॥ अस्थीनि न विनश्यन्ति देहान्तरमनुक्रमात् ॥ कालो हि गमितो यावान्करकांश्च यथा
मिताः ॥ ५१ ॥ तद्वदामि मुनिश्रेष्ठ शृणुष्वावहितोऽधुना ॥ एकैकस्य शरीराणि कोटिकोटिशतानि च ॥ ५२ ॥ पतितानि मुनिश्रेष्ठ कल्पे
कल्पे विपर्य्ययम् ॥ एतावन्ति गमिष्यन्ति शरीराणि यदा मुने ॥ ५३ ॥ तदा वृन्दावनं प्राप्य तपस्त्यागो भविष्यति ॥ प्रेमभक्तिरतानाञ्च शरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राणि नवानि हि ॥ ५४॥ भविष्यंति न संदेहः सुखं प्राप्स्यन्ति ते भृशम् ॥ इत्याकर्ण्य मुनिश्रेष्ठो द्रष्टुमुत्कंठितोऽभवत् ॥ ५५ ॥ स्मर
न्वृन्दावनं भूयो नारदः प्रणनाम ह ॥ त्वमाज्ञापय गच्छामि ह्यनिरुद्धस्त्वथाब्रवीत् ॥ ५६ ॥ कथं मुने त्वया ज्ञातमश्रुतं कारणं परम् ॥
प्रयाहि त्वं महारण्ये स्नात्वा सरसि मानसे ॥ ५७ ॥ कदा हि भगवान्कृष्णो दर्शनं दास्यति स्वयम् ॥ इत्युक्तो लोकगुरुणा नारदो मुनि
सत्तमः ॥ ५८ ॥ वदन्नित्थं प्रतस्थे स हृदि ध्यायन्हरिं ततः ॥ तत्र दृष्ट्वा सरो दिव्यं नानाद्रुमसमाकुलम् ॥ ५९ ॥ महन्मनःप्रख्यजलं
वायुना परिसेवितम् ॥ हंसकारण्डवाकीर्णं चक्रवाकोपसेवितम् ॥ ६० ॥ विचित्रकमलासन्नं नृत्यद्भ्रमरसंकुलम् ॥ दृष्ट्वैव तत्सरः शीघ्रं
स्नानार्थं प्राविशत्तदा ॥ ६१ ॥ स्नात एवाभवत्कन्या नासीत्ताल्लिंगसंस्मृतिः ॥ दृष्ट्वा कन्यातनुं स्वीयां विस्मयः परमो ह्यभूत् ॥ ६२ ॥
तदा कन्यास्वरूपेण नारदस्त्वित्यचिंतयत् ॥ कुतोऽहं संस्थिता कन्या को वा भावो ह्यभून्मम ॥ ६३ ॥ एवञ्च कन्यातन्वा तु विस्मयः
परमो ह्यभूत् ॥ तदा कन्यास्वरूपिण्या ह्योदिता ह्यहमेकया ॥ ६४ ॥ दृष्ट्वा च कन्यकां सा मामपृच्छदिदमद्भुतम् ॥ कासि कस्यासि
वामोरु किमर्थमिह तिष्ठसि ॥६५॥ किमन्वेषयसीह त्वं किं चित्ते विस्मितं त्विह ॥ कथय त्वमिदं मेऽद्य यत्ते मनसि वर्त्तते ॥ ६६ ॥ अद्य ते
दर्शनात्प्रीतिर्मनसाऽतिप्रवर्त्तिता ॥ इत्याश्रुत्य वचस्तस्याः कन्यायाः सा च मानदा ॥ ६७ ॥ उवाच वचनं चारु कन्या या मानसोद्भवा ॥
अहं ते गुणसंपत्त्या जातास्मि वशवर्तिनी ॥ ६८ ॥ अतोहार्दं प्रकथये यदुद्यं परिवर्त्तते ॥ शृणु मे वचनं भीरु यद्दृष्टाहं त्वयाधुना ॥ ६९ ॥
वृन्दावनगता भूमिः पवित्रा नन्दसद्म च ॥ सर्वसौख्यप्रदः साक्षात्कृष्णो वृन्दावनेश्वरः ॥ ७० ॥ श्यामांगसुन्दरः सौम्यः साक्षान्मन्मथ
मन्मथः ॥ पीतांबरधरः स्रग्वी शिखिपुच्छावतंसकृत् ॥ ७१ ॥ कोटीन्दुसूर्य्यसदृशो गोपिकावृन्दसंवृतः ॥ क्रीडन्रहो रमयति राधिकां वृषभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुजाम् ॥ ७२ ॥ क्षणं नोपरमेत्तत्र क्रीडते च दिवानिशम् ॥ कुञ्जेकुञ्जे लताकुञ्जे शय्याः कुसुमनिर्मिताः ॥ ७३ ॥ इत्यानन्दमया यत्र प्रवहंति रसाब्धयः ॥ यत्रैवामरमुख्यानां न प्रवेशः कथञ्चन ॥ ७४ ॥ के योगिनो वराका हि तपोदानपराश्च ये ॥ श्रीपतेरपि भक्तानां सुप्रवेशः कथञ्चन ॥७५॥ दूतिकाः सुविलासिन्यश्चाष्टौ स्युः परिचारिकाः ॥ ताश्चैवास्मिन्वने रम्ये विचरंति मुदान्विताः ॥७६॥ गोपालाश्चैव क्रीडन्ते देवनार्थैः समन्ततः ॥ श्रमादेतत्स्थलं प्राप्य सानन्दं गोभिरन्वितम् ॥ ७७ ॥ जलस्थलवनक्रीडारासलीलाविभेदतः ॥ वृषभानुसुता तत्र क्रीडते स्वसखीजनैः ॥ ७८ ॥ गौरांगी नीलवसना स्वर्णरत्नविभूषिता ॥ सुनूपुरपदाघातमुखरीकृतादिङ्मुखा ॥७९॥ किमहं वर्णये तत्र यत्सुखं संभवेन्मम ॥ करोमि किं दर्शनार्थं वद सौम्ये कृपान्विते॥८०॥कन्योवाच॥वृंदावनेश्वरं भद्रे निवेदय ममागमम् ॥ नहीश्वराणां भवने प्रवेशो भवति स्वयम् ॥ ८१ ॥ सूत उवाच ॥ इत्युक्ता सा ततो गत्वा कृष्णान्तिकमुवाच ह ॥ कृष्णकृष्ण कृपासिंधो गोपिकाप्राणवल्लभ ॥ ८२ ॥ शृणुष्व वचनं वाग्मिन्दृष्टं यन्महदद्भुतम् ॥ चरन्ती विपिने कन्या दृष्टा मानससत्तटे ॥ ८३ ॥ रूपमत्यद्भुतं तस्याः कथ्यते किं तवाग्रतः ॥ न भूतले न पाताले न देवभवने क्वचित् ॥८४॥ दृश्यं रूपं भवेत्तस्यास्त्वहं जाने प्रभान्वितम् ॥ कारणं किं न जानामि कथं तत्र स्थिता शुभा॥८५॥ सर्वं त्वं वेत्सि भगवन्यथारुचि कुरु प्रभो ॥ सख्या वचनमाकर्ण्य मुदितो भगवान्हरिः॥८६॥ व्रजस्त्रियोऽपि मुदितं दृष्ट्वा चोत्कण्ठितं भृशम् ॥ कृष्णं विज्ञापयामासुः कन्यकादर्शनं प्रति॥८७॥ततः प्रोवाच ताः कृष्णः शृणुध्वं व्रजयोषितः॥ स्त्रीणां चलस्वभावोयं कौतुकाय मनश्चलेत् ॥ ८८ ॥ मम यानं तदग्रे तु चैककस्य न युज्यते ॥ तस्मात्तत्र तु गंतव्यं भवतीभिः प्रयत्नतः ॥ ८९ ॥ दृष्ट्वा रूपं तु युष्माकं विस्मितात्रागता भवेत् ॥ तस्यै सुखं प्रदातव्यं सर्वमस्माभिरेव त ॥ ९० ॥ कुरुध्वं मंडलं गोप्यो पादन्याससुशोभितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 चलध्वं तत्र तां द्रष्टुं मया सह समन्ततः ॥ ९१ ॥ ततो मण्डलमध्यस्थो विरेजे भगवान्स्वयम् ॥ यथा रासनिशाः शश्वत्तथा यातास्तदी
 हया ॥ ८२ ॥ वनं कुसुमितं तावद्गायका विहगा जगुः ॥ रत्युपायीकरश्चासीत्तदैव विपिनं महत् ॥ ९३ ॥ ऋषय ऊचुः ॥ कति गोप्यः
कथं कृष्णो बहुभिः क्रीडते वने ॥ एको वा बहुरूपो वा यथावत्प्रमदाकुलैः ॥ ९४ ॥ कदा क्रीडासमारम्भः सदा वा कालतोऽपि वा ॥
अस्माकं महदौत्सुक्यं तत्क्रीडाश्रवणाय हि ॥ ९५ ॥ तवात्र श्रद्दधानानां ब्रूहि त्वं कृपया मुने ॥ ९६ ॥ ॥ इति श्रीसकलपुराण
सारभूते आदिपुराणे वैयासिके सूतशौनकसंवादो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ नारदस्त्वेकदा यातः
सत्यलोकं सनातनम् ॥ तत्रोपविष्टं सदसि श्रुतीनां मूर्त्तिसंभृताम् ॥ १ ॥ पितरं सर्वशास्त्रज्ञं सर्ववेदान्तपारगम् ॥ दृष्ट्वा तमुपसंगम्य
पप्रच्छैव मुनीश्वराः ॥ २ ॥ तत ऊचे पुरा वृत्तं यातं स भगवानजः ॥ तदहन्तु प्रवक्ष्यामि शृण्वन्तु मुनिसत्तमाः ॥ ३ ॥ भगवानुवाच ॥
संहृत्येदं जगत्सर्वं सुप्तशक्तिरधोक्षजः ॥ मयि लीनमिदं सर्वं रहो निःसारयामि तत् ॥ ४ ॥ रहस्यमहमेकोऽत्र चेत्यालोचितवान्स्वयम् ॥
तदा विष्णोर्नाभिरूढमब्जमासीदनुत्तमम् ॥ ५ ॥ कीटाणुकीटवच्चाहं कमलात्प्रज्वलद्युतेः ॥ ततोऽभवं महाभाग प्रभाते संप्लुतोदके ॥ ६ ॥
दिशो विलोकमानस्य चत्वारि वदनानि मे ॥ बभूवुरतिभीतस्य तदा मे विस्मयोऽभवत् ॥ ७ ॥ किं करोम्यहमेकोऽत्र को मे साहाय्यकृद्
भवेत् ॥ कस्मादिह महद्भूतो नान्यदृश्योऽहमेकराट् ॥ ८ ॥ को जन्मदाता किं नाम नहि किंचिद्विलोकये ॥ जलान्तर्भः प्रविष्टोऽहं
ततः संविग्नमानसः ॥ ९ ॥ विचिन्वतो गतः कालो मेभवे च्छरदां शतम् ॥ तदा स्वयं भृङ्गपतेरूपं कृत्वा समागतः ॥ १० ॥ स पृष्टवा
नज्ञ इव कस्त्वं कथमिह स्थितः ॥ मयोक्तं नाभिजानामि जन्म नामाहमात्मनः ॥ ११ ॥ तमपृच्छन्तु कथय मह्यं जन्म च नाम च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा करोमि यत्कार्यमात्मनः स्वविचारतः ॥ १२ ॥ भृंगाधिप उवाच ॥ शृणुष्वावहितः सर्वं यत्त्वं मां पृष्टवानिह ॥ समाश्वास्य स मा
मित्थं विष्टरं च गृहीतवान् ॥ १३ ॥ अर्वागथो बहुतिथो गतः कालो विचिन्वतः ॥ आसीन्मौनी भृंगराजो नोत्तरं वास्तवं ददौ ॥ १४ ॥
अथैवं वक्तुमारेभे सृष्टिप्रकरणञ्च सः ॥ १५ ॥ शृणु तेऽहं प्रवक्ष्यामि विष्णो रूपं द्विधा मतम् ॥ नित्यं विहार एकेन चान्येन सृष्टिरेव हि ॥
॥१६॥यद्रूपं जगतः स्रष्टुस्तस्य नाभिसमुद्भवम् ॥ पद्मं यतो जन्म तव जगत्स्रष्टुं तथा कुरु ॥ १७ ॥ ब्रह्मोवाच ॥ निशम्य वचनं तस्य समा
धाय मनः स्वयम् ॥ सृष्टवानेव तत्सर्वं यदुक्तं तेन चालिना ॥ १८ ॥ ततोऽहमूचे भ्रमरं वद विष्णोर्महात्मनः ॥ क्रीडां नित्यविहाराख्यां
क्व सा भवति तद्वद ॥ १९ ॥ वैकुंठे सत्यलोके वा नागलोकेऽथ वा भुवि ॥ स्वर्लोके सुरभीनाम्न्या चान्यया यदि का क्व सा ॥ २० ॥
भृंगराज उवाच ॥ एवमेव पुरा पृष्टो वैकुंठे भ्रमराधिपः ॥ कीरेण मुनिना तत्र पक्षिरूपेण भास्वता ॥ २१ ॥ इदं रहस्यमाश्चर्य्यं कथयामि
तवाधुना ॥ न तत्र मृत्युर्न जरा न शोको न च मत्सरः ॥ २२ ॥ सत्त्वादयो गुणा नैव न शीतोष्णेन्दुभास्कराः ॥ वसन्ति च पुरे
तस्मिन् मुनयः पक्षिरूपिणः ॥ २३ ॥ गायंति विष्णोश्चरितं शृण्वन्ति च समाहिताः ॥ तत्र कीरवरः कोऽपि पप्रच्छ भ्रमराधिपम् ॥
॥ २४ ॥ कीरवर उवाच ॥ किं परं रूपमस्तीह विष्णोर्भगवतः प्रभोः ॥ चञ्चरीक समाख्याहि का लीला भगवत्प्रिया ॥ कुत्र क्रीडा
निशान्तन्तु कावनिः का सरित्प्रिया ॥ २५ ॥ भृंगराज उवाच ॥ इदं गुह्यतमं कीर त्वया पृष्टं महामते ॥ तथापि तुभ्यं वक्ष्यामि
कथायोग्यस्त्वमेव हि ॥ २६ ॥ वरारोहाः प्रियाः सर्वा रासे नृत्यपरा हि याः ॥ विष्णोर्वराङ्गनाः सार्द्धं याभिर्नित्यं विचित्रधा ॥ २७ ॥
गीतगानैस्तथा नृत्यैर्वाद्यैर्नानाविधैरपि ॥ कृष्णः क्रीडति शृंगाररसविह्वलमानसः ॥ २८ ॥ करोति रसितास्ताः स स्वतोऽपि प्रेमवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ह्वलाः ॥ कीरानुरागबहुलं रहस्यमतुलं यतः ॥ २९ ॥ अतो बुधैर्हि वक्तव्यं पात्रे नान्यत्र कर्हिचित् ॥ वेद्म्यहं वारिधिर्वेत्ति नारदो वा
कुमारकः ॥ ३० ॥ अग्नी रुद्रोऽनिशं वेत्ति नान्यः कश्चन कुत्रचित् ॥ वदन्ति साधवः स्वान्तं निजवित्तं न वै क्वचित् ॥ ३१ ॥ न यथा
 सुधियः स्तेनं दर्शयन्ति निजं धनम् ॥ तथैव ज्ञानिनो भक्ताः हृदयस्थमहाधनम् ॥ ३२ ॥ एवमेव श्रीकृष्णः प्रेमलीलारहस्यकम् ॥ प्रका
शयन्त्यभक्तानां न मूढानां समीपतः ॥ ३३ ॥ विष्णुसेवारसार्द्धे यः कीर क्षीरपयोनिधौ ॥ विष्णुत्वमपि विस्मृत्य स वै वसति नित्यशः ॥
॥ ३४ ॥ वनं वृन्दावनं नाम ह्यनादिनिधनं मतम् ॥ नित्यं क्रीडारतस्तत्र गोपीभिर्गोपवेशभृत् ॥ ३५ ॥ नास्ति तत्सदृशं रूपं न स्त्रियो
गोपिकासमाः ॥ स्वबिम्बप्रतिबिम्बेन क्रीडते विपिनेऽनिशम् ॥ ३६ ॥ अथ कृष्णसखीनाञ्च संख्या याः संवदामि ते ॥ तत्रातीव रहोरम्यं
वदिष्येऽग्रेऽतिवल्लभम् ॥ ३७ ॥ येन नारायणः साक्षात्स्वतो नारीवशं गतः ॥ काचित्कलानिधिप्राया वल्लभा बल्लवी हरेः ॥ ३८ ॥
माधवी मधुराकारा न तां जानन्ति पण्डिताः ॥ ३९ ॥ तिस्रः कोट्यो बल्लवीनां समाजस्तावद्रूपो बल्लवः सोऽपि मध्ये ॥ काचि
त्तासां नाट्यविद्या प्रशस्ता शश्वच्चान्या गानवेदप्रवीणा ॥ ४० ॥ काचित्तासां वाद्यपूरप्रविज्ञा नृत्यंत्यन्या[1] तालमानप्रतर्का ॥ काचि
त्तासां वाटिकाधानदक्षा चान्याभिज्ञा वस्त्रदानप्रयत्ने ॥ ४१ ॥ तत्तत्पश्चात्प्राप्तकाले च कार्यं कुर्वंत्यस्तास्तोषयन्त्यः स्वनाथम् ॥
एवं ताभिः कृष्ण एवानुरूपं कर्त्ता तत्तद्गोपिकाभावदक्षः ॥ ४२ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादो
नाम दशमोऽध्यायः ॥ १० ॥ भृंगाधिप उवाच ॥ सर्वयूथप्रसंख्यानं शतानि त्रीणि विद्धि वै ॥ नियुतेनियुते मुख्यास्तासां नामानि मे

१ नर्तक्यन्येति वा युक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणु ॥ १ ॥ विधुन्तुदा विधुरता रागरंगा सुरागिणी ॥ कामकन्दा सुनन्दाच नन्दिनी नादनन्दिनी ॥ २ ॥ नेत्रसौभाग्यसुभगा मोदमाना मनस्विनी ॥ मनोभवा विरागा च हावहूरा रतिप्रदा ॥ ३ ॥ धन्या धनेश्वरी धामा भावाभावप्रमोदिनी ॥ मुक्ता मनोहरा साध्वी मालती मलयाश्रया ॥ ४ ॥ मदालसा मनोभीष्टा मनोज्ञा मानसा बला ॥ चित्रा वेत्रवती भीमा भावभेदा सदाचला ॥ ५ ॥ चञ्चला चपला कान्ता कलाकामप्रवेदिनी ॥ कलोत्तमा कलाभिज्ञा धनिष्ठा च कलावती ॥ ६ ॥ विधृतानंगभुजाया मन्मथोदयपंजिका ॥ कामवृंदा सुनन्दा च नन्दिनी नयनोत्सवा ॥ ७ ॥ कनकांगी कुरंगाक्षी चन्द्रास्या चंद्रमंडना ॥ मदोन्नता मदोत्साहा हंसी हंसगतिस्तथा ॥ ८ ॥ कंदर्पमञ्जरी वेला बलिष्ठा कलभाषिणी ॥ वरांगदा विशालाक्षी विशाखा विशदाशया ॥ ९ ॥ कृष्णा कृष्णवती भावा भयभेदप्रदर्शिता ॥ नवांगा नववासाश्च नवीना प्रेमकारिणी ॥ १० ॥ सारिका सरला शान्ता कान्ता कामप्रदायिनी ॥ प्रेमवती नागरिका नवीना नवमंजरी ॥ ११ ॥ भेदभावविशिष्टा च धन्या साध्या च गोमती ॥ आनवापीननंदा च प्रमोदा मुदितानना ॥ १२ ॥ मानशान्ता नवीना च भामिनी प्रेमकारिणी ॥ सारिका सरला शान्ता कान्ता कामप्रदा शुभा ॥ १३ ॥ प्रेमबद्धा मधुमुखी मनोजा मन्दगामिनी ॥ कामिना रमिता रामा निष्ठा चातिकृशोदरी ॥ १४ ॥ वरांगनाथ बिम्बोष्ठी बेला वलयभूषणा ॥ बल्लवी क्वणिता वाग्ग्मी वरभेदा विनोदिनी ॥ १५ ॥ बलोन्नता बलाका च पावनी पाचिका परा ॥ परोदया दयावेदी देवताललना लता ॥ १६ ॥ आनन्दभद्रा भद्रा गौर्भद्राभावा विलासिनी ॥ अंगदानंगदा धात्री धर्मपात्रिवरा हरेः ॥ १७ ॥ माधवी मंदगा गंगा मंजरी पार्वती तथा ॥ परा तारा परेशा च परमा सुरमा परा ॥ १८ ॥ समोष्ठी समकर्णा च कामिनी रतियामिनी ॥ पंजिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मदनप्राणा साञ्जनी मदभाविनी ॥ १९ ॥ चन्द्रावली शशिकला योनियुक्ता मनोरमा ॥ भद्रावली भगवती ततः सौदामनी मता ॥ २० ॥
चंपावती चंपाकलिः परा वीरवती प्रभा ॥ मानिनी मदनोत्साहा तथा मन्दालसा परा ॥ २१ ॥ पद्मी पाटोलिका षड्गखंडिता मन्मथो
ज्वला ॥ वरूथिनी वनलता व्रजवल्ली तिलोत्तमा ॥२२॥ रसा गन्धर्विणी भिज्या वज्रा भोगप्रदायिनी ॥ वैकुंठमंजरी रुक्मा तथा रुक्मवती
मता॥२३॥ कुंजरी भद्ररेखा च हरिणी भद्रलेखिका ॥ चरित्रा चन्द्रतिलका कातराक्षी सुमंदिरा ॥२४॥ चित्रांगा तुंगविद्या च मंजुमेधा रसा
लिका ॥ सौरसेनी सुगंधा च सुमध्या तनुमध्यमा ॥ २५ ॥ गुणचूडा मेदिनी च करिणी रागवेलिका ॥ मंजुकेशी मंजुवक्त्रा तथा कन्दर्प
सुन्दरी ॥ २६ ॥ सुसंगता मधुस्यन्दा इंदुलेखा मनोजवा ॥ परंमतातिविनता प्रमीला पटुभाषिणी ॥२७॥ परात्मिका परोत्कर्षा कलिताऽचं[1]
लगामिनी ॥ भारहा वरमाला च वरारोहा तिलोत्तमा ॥ २८ ॥ वामनेत्रा च सोन्मेषा चंचला चलभाषिणी ॥ चलक्रीडा चलात्मा च
चक्षणी चतुरानना ॥२९॥ प्राणपात्रा परप्राणा रमणी परपावनी ॥ पटोच्चा लम्बकेशी च कलाभावा कलाञ्जनी ॥ ३० ॥ कार्यपद्मी परप्रीता
परकामा परंमदा ॥ यामिनी जनिताशेषा पतगा रतिचंचला ॥३१॥ यशःप्रदा यशोधना जलजाक्षी जयप्रदा ॥ यामिता यमिता कामा बाल
भावा रसाकरा ॥ ३२ ॥ मंजुपाणिर्मंजुपदा वरदीप्तिर्मनोरमा ॥ कंजनाभिरथो वामा कामरंगवशंगता ॥३३॥ भानुकाभा वीतबला भीरुभावा
प्रमोदिनी ॥ वरांगना वरामोदा वनबंधुर्वनोत्सवा ॥ ३४ ॥ वनभावा वनमता वनमंजुर्वनाम्बुजा ॥ वनभूर्वनजा योषा घोषमंजुव्रजाबला ॥
॥ ३५ ॥ व्रजांगना व्रजवधूर्व्रजकेलिर्व्रजोत्सवा ॥ व्रजबाला व्रजेशा च व्रजेशपरमप्रिया ॥३६॥ घोषवृन्दा घोषलता घोषराजविलासिनी ॥

१ मन्दगामिनीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घोषनन्दा नन्दकन्दा नित्यानन्दविनोदिनी ॥ ३७ ॥ भानुवृन्दा चन्द्रवृन्दा कामवृन्दा कलापटुः ॥ किशोरी नागरी नेत्री नयकान्ता नयानुगा ॥ ३८ ॥ नीतिवाङ्नयना कान्ता त्वलया चालयोदया ॥ सर्व्वयूथप्रधाना च परयूथा विनोदिनी ॥ ३९ ॥ विशेषा विशिखा विश्वा गुणा गुणवती शुभा ॥ इत्याद्या यूथमुख्याश्च यूथे लक्षाभिधे चराः ॥ ४० ॥ अथापरा राधिकायाः सख्यः शश्वन्मनोरमाः ॥ विमला राधिका भृङ्गी निभृताऽभिमता परा ॥ ४१ ॥ तथाष्टौ सदृशास्तस्या वराः सख्यस्तथा पराः ॥ शारदा जननी यस्याः पतिर्व्वा कीरसंज्ञितः ॥ ४२ ॥ ताम्बूलहृत्सुकरुणा प्रगल्भा ललिता वरा ॥ द्वितीया तु विशाखेति देवी विद्यारसालया ॥ ४३ ॥ तारावलीधरा स्तिस्रः पत्न्यस्तासान्तु पावनाः ॥ कृष्णमायावनसरः सर्व्वं विश्वैकपावनम् ॥ ४४ ॥ नानार्थदक्षिणस्तस्याः पतिर्व्वच्छवसंज्ञितः ॥ साम दानं ततो भेदो भयादिष्विति सम्मतम् ॥ ४५ ॥ नानावस्त्रप्रयोगा सा प्रगल्भा परमा मता ॥ तृतीया चम्पकलता चम्पकांगी सुभूषणा ॥ ॥४६॥ नीलप्रभदुकूला च पिता वामस्तथैव च ॥ माता च वाटिका तस्याः पतिश्चण्डाक्ष एव च ॥४७॥ सूचितश्चाधिकारोऽस्याः पाकभेदेऽधिकारिणी ॥ मिष्टवस्तुप्रदानेन सा हरेः प्रीतिवर्द्धिनी ॥ ४८ ॥ चित्रादेवी चतुर्थी च कुंकुमांगी मनोहरा ॥ अरुणा करुणार्द्रा च पिता स्याश्चतुरः स्मृतः ॥ ४९ ॥ मातास्याश्चर्विका नाम पतिरस्याश्च पीठरः ॥ त्रिकालज्ञानसम्पन्ना ज्योतिःशास्त्रविशारदा ॥ ५० ॥ पशुविद्या विदग्धा च पानभोज्यविदाम्वरा ॥ सुगन्धजलकार्य्यें वा अधिकारवती च सा ॥ ५१ ॥ पञ्चमी तुंगविद्या च सुगन्धा कुंकुमाष्टमी ॥ पट्ट मण्डलवस्त्रेषु अतिदक्षा मनोहरा ॥ ५२ ॥ पिता पौषकसंज्ञोऽस्या माता मेधा पतिस्तथा ॥ वाणीशाखाश्चाधिकृताः सर्व्वशास्त्रार्थवेदने ॥ ॥ ५३ ॥ संगीतसंगनिरता वीणावादपटीयसी ॥ सन्धिकाये प्रगल्भा सा क्षणदा सुविलासिनी ॥ ५४ ॥ इंदुलेखा ततः षष्ठी हारितालस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माननां ॥ सर्व्वांगशोभना सा हि दाडिमीकुसुमांशुका ॥ ५५ ॥ अत्यन्तसुंदरी कान्ता वावदूका विलासिनी ॥ सागरस्तु पिता तस्या माता वेला महोदया ॥ ५६ ॥ दुर्ब्बलस्तु पतिस्तस्याः कामशास्त्रविशारदा ॥ वशीकरणमंत्रेषु त्वतिसौभाग्यमंत्रिता ॥ ५७ ॥ लेपस्य साधने दूतीकर्म्मण्यग्र्या विचक्षणा ॥ भाण्डागारस्थरक्षादिकर्म्मण्यप्यधिकारिणी ॥५८॥ सप्तमी रंगदेवी तु पद्मकिञ्जल्कभासुरा ॥ जातीपुष्पांशुका तस्या रंगसारः पिता मतः ॥५९॥ माता च करुणा तस्याः पतिर्वक्रेक्षणः स्फुटम् ॥ अनुलेपनगन्धेषु धूपव्यजनकर्म्मसु॥६०॥स्रगादि रचनायान्तु सुन्दरी याधिकारिणी ॥ ममता भगिनी तस्या राधिकायाश्च कृत्रिमा ॥ ६१ ॥ देवबन्धुः पिता तस्याः सुदेवी जननी शुभा ॥ पतिस्तस्याः खलेहश्च कोपनख्यातिमाश्रितः ॥ ६२ ॥ अञ्जनाभ्यंगकुशला केशसंस्कारकारिणी ॥ तनुरूपातिसुखदा कोमलाङ्गी मनोहरा ॥ ॥ ६३ ॥ गण्डूषक्षेपपात्रादिष्वधिकारपरायणा ॥ ६४ ॥ इत्यष्टौ वै राधिकासेविका याः यूथश्रेष्ठा गोपिकाः सुप्रतिष्ठाः ॥ कुञ्जेकुञ्जे स्वेच्छया ताश्चरन्त्यो वक्ष्ये ते किंचैश्वरं तद्विसुत्वम् ॥ ६५ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे एकादशोऽध्यायः ॥ ११ ॥

॥ कीरवर उवाच ॥ भृंगाधिप महाबुद्धे राधिकायाः कुलं वद ॥ कस्य वंशे समुत्पन्ना तस्याः को जनकोऽभवत् ॥ १ ॥ का माता भ्रातरः के वै मह्यमेतत्प्रकाशय ॥ त्वं हि ब्रह्मविदां विज्ञः स्वेच्छापाक्षितनुं गतः ॥ २ ॥ भृङ्गाधिप उवाच ॥ धन्योऽसि त्वं महाबुद्धे ममानुग्रहकृद्भवान् ॥ यतोऽतिविशदं विष्णोश्चरितं पृष्टवानसि ॥ ३ ॥ आसिषेणो महागोपः पुरासीदतिपावनः ॥ आर्ष्टिग्रामेऽस्य वसतिः सर्व्वसम्पत्समृद्धियुक् ॥ ४ ॥ तस्य पुत्रो महाभानुः स्वर्भानुश्च तदात्मजः ॥ तस्यासीदतिपुण्यात्मा वृषभानुः परोदयः ॥ ५ ॥ मातास्य मानवीनाम्नी पातिव्रत्यपरायणा ॥ तस्यात्मजास्तु चत्वारः सदा कृष्णैकचेतसः ॥ ६ ॥ वृषवृध्नुर्मनःसौख्यः स्तोकक्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णस्तथापरः ॥ श्रीदामा च चतुर्थस्तु कन्ये हि कृष्णवल्लभे ॥ ७ ॥ राधिकायमते बाले महाबुद्धिबलोदये ॥ तत्रापि राधिका शश्वदति प्राणप्रिया हरेः ॥ ८ ॥ अष्टम्यां भाद्रशुक्लस्य सा जाता रविवासरे ॥ रात्रौ पराह्णसमये ज्येष्ठायाश्चान्तिमे पदे ॥ ९ ॥ किमहं वर्णये भाग्यं राधायाः परमाद्भुतम् ॥ ब्रह्मादयोऽपि न विदुः परमानन्दमन्दिरम् ॥ १० ॥ ततो विवाहमकरोद्वृषभानुर्गुणोदयः ॥ वैशाखे सितपक्षे तु तृतीया चाक्षयाह्वया ॥ ११ ॥ रोहिणीस्वर्क्षसम्पूर्णा जायालग्नशुभावहा ॥ पारिबर्हादिकं दत्त्वा वस्त्रमन्नं समृद्धिमत् ॥ १२ ॥ कीर उवाच ॥ श्रीकृष्णस्यान्वयं ब्रूहि पुण्यात्पुण्यतरं हि मे ॥ यस्य स्मरणतो यान्ति पापा अपि शुभां गतिम् ॥ १३ ॥ न नित्यस्यात्मनो जन्म न च कर्म्म कुलं क्रिया ॥ तथापि व्यक्तिमापन्नो भवेद्धि भगवान् स्वयम् ॥ १४ ॥ व्यक्तिद्वारा त्वनेकात्मा स्वयं वै तत्स्वरूपधृक् ॥ स्वयं पिता स्वयं माता स्वयमेव कुलाकरः ॥ १५ ॥ विभाति तत्स्वरूपेण परमात्मा सनातनः ॥ तथापि कथयाम्येतत्तुभ्यं श्रद्धालवे द्विज ॥ १६ ॥ अनन्यशरणेभ्यो हि रहस्यं नैव गोप्यते ॥ शृणुष्वावहितः कीर सुगोप्यमपि तद्वदे ॥ १७ ॥ आभीरभानुर्गोपेशो वसति स्म महावने ॥ तत्पुत्रश्चन्द्रसुरभिस्तस्यासीत्सुश्रवा महान् ॥ १८ ॥ कालमेदुः सुतस्तस्य कालमेदोः सुता दश ॥ जयसेनो जयबलो जयकीर्त्तिर्यशोधनः ॥ १९ ॥ कण्ठभानुर्महाबुद्धिर्मानमेरुर्मनोरथः ॥ वराङ्गदश्चित्रसेनस्तस्य पुत्राभन्नव ॥ २० ॥ सुनन्दश्चोपनन्दश्च महानन्दोऽथ नन्दनः ॥ कुलनन्दो बन्धुनन्दः केलिनन्दोऽथ सप्तमः ॥ २१ ॥ अष्टमः प्राणनन्दश्च नन्दोऽयं परमो महान् ॥ तस्य पत्नी यशोदा च महाभाग्यवती शुभा ॥ २२ ॥ तस्याश्च भक्तिभावेन भगवानभवत्स्वयम् ॥ व्यक्तानां व्यक्तिमापन्नो नित्यानां नित्यदर्शकः ॥ २३ ॥ अनेकरूपरूपोऽसौ सुरूपश्च सनातनः ॥ श्रीकृष्णः करुणासिन्धुस्त्वधीरः सर्व्वशक्तिधृक् ॥ २४ ॥ व्रजेव्रजे विनोदी च विपिनेविपिने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुहृत् ॥ वैकुंठेऽकुण्ठरूपोऽसौ जलशायी जले सदा ॥ २५ ॥ सृष्टिरिच्छाकृता यस्य सर्व्वलीलाकरो हरिः ॥ अनाविराविः कुत्रापिन व्रजेदहितः क्वचित् ॥ २६ ॥ येये च सखिभिः सार्द्धं नन्दयंते व्रजौकसः ॥ क्रीडंते विपिने गावश्चारयंतो वनांतरे ॥ २७ ॥ तथा वने व्रजस्त्रीभिः कोटिभिश्च व्रजौकसः ॥ क्रीडंते बहुधा नित्यं क्रीडन्ते रासलीलया ॥ २८ ॥ तत्र कुञ्जनिकुञ्जेषु राधया सहितः प्रभुः ॥ राधा च नायिकाभावैरानन्दयति वल्लभम् ॥ २९ ॥ संभोगे योगकाले हि जायंते च पृथक्पृथक् ॥ सख्ये सख्यस्तथा सर्वा मया पूर्व्वं निवेदिताः ॥ ३० ॥ नित्यं क्रीडानिकुञ्जेषु कदाचिद्विचरन्महीम् ॥ अनंतलीलास्य हरेस्त्रिधा लीलास्ति नित्यदा ॥ ३१ ॥ कीरउवाच ॥ सखायः कति कृष्णस्य तेषां नामानि वा पुनः ॥ ब्रूहि मे श्रोतुमिच्छामि त्वत्तोऽहं मधुपाधिप ॥ ३२ ॥ भृङ्गउवाच ॥ कोटिसंख्याः सखायस्ते तेषां मुख्या हरेः प्रियाः ॥ शतैकसंख्यया ख्याता नामान्येषां वदामि ते ॥ ३३ ॥ वृषवृष्ण्नुर्मनःसौख्यस्तोककृष्णस्तथा परः ॥ श्रीदामा वृषभानोश्च पुत्राश्चत्वार एव च ॥ ३४ ॥ अनंतभद्रो वृषभ ओजस्वी च वरूथकः ॥ देवभद्रो विनोदाख्यः सुबलश्चार्जुनोऽपरः ॥ ३५ ॥ अथ ते कथयिष्यामि कामकन्दो मरुत्सहः ॥ प्राणभानुः क्षमीरोत्सो विधृतिः श्यामसंगमः ॥ ३६ ॥ वारिजाक्षो हंसगतिः कालकंधो मसीहरः ॥ विनेता वसुबाहुश्च बृहद्भानुरथापरः ॥ ३७ ॥ केलिः सुकेलिः सुभगो बली च लय एव च ॥ मारकेलिः कलोत्तारः कलभाषी कलस्वनः ॥ ३८ ॥ शीतरश्मिर्विधुर्भानुर्भावितो भाविनो भवः ॥ रतिप्रीतो वीरसेनो मंजुबुद्धिर्बलानुगः ॥ ३९ ॥
कीर्त्तिसिन्धुर्माल्यदश्च चेतनश्चतुराननः ॥ रेषो परेशो रेताख्यो मानमेरुः पराञ्जनः ॥ ४० ॥ पावनो मदनाकान्तः कुंकुमः कमलाकरः ॥ शतेज्यः शतशक्तिश्च शतानंदाः यशोधनो ॥ ४१ ॥ सन्तोषः शंकरः साधुः शान्तिभद्रः समो नरः ॥ देवभद्रस्तु भद्राश्वः सुदेवः सुख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सागरः ॥ ४२ ॥ एवं परशुरामश्च रजनीकर एव च ॥ श्रीभद्रो भासुरः श्रीदः शालिभद्रो गदः परः ॥ ४३ ॥ नरो नारायणश्चान्योऽमल श्चातिसुखस्तथा ॥ सञ्जयोऽजितसंज्ञश्च कृष्णस्यासन्सखिप्रियाः ॥ ४४ ॥ क्रीडन्ते हरिणा नित्यं वने संचारयन्ति गाः ॥ न ते नश्यंति लोका वै वयःपरिणतिर्न हि ॥ ४५ ॥ इति ते कथितो ब्रह्मन्संवादः कीरभृंगयोः ॥ नित्यं रूपमिदं विष्णोः सदा क्रीडापरायणम् ॥ ४६ ॥ ब्रह्मोवाच ॥ कस्त्वं समागतोऽस्यत्र महाभ्रमररूपधृक् ॥ समाख्याहि स्वरूपं तन्ममोपरि दयां कुरु ॥ ४७ ॥ इदं तत्त्वमहो विद्वन्न त्वं मधुपरूपवान् ॥ यथातथमथो सत्यं ब्रूहि त्वं मयि चेत्कृपा ॥ ४८ ॥ भृंगराज उवाच ॥ ब्रह्मन्निदं मम वपुर्नहि दृष्टं हि केनचित् ॥ न मत्स्वरूपं केनापि सम्यग्ज्ञातं कदाचन ॥ ४९ ॥ ब्रह्मोवाच ॥ इत्युक्त्वान्तर्हितो भृंगस्ततोऽहं विस्मितोऽभवम् ॥ अहं तस्मै नमस्कृत्य स्थितस्तत्रासनोपरि ॥ ५० ॥ ध्यानवानस्मि सुचिरं द्रष्टुं सर्व्वमशेषतः ॥ ततो वर्षसहस्रान्ते दृष्टो नारायणो मया ॥ ५१ ॥ तदाज्ञातो ऽसृजं लोकान्यथापूर्व्वमवस्थितान् ॥ अनुग्रहान्महाविष्णोरपरं कथितं सुत ॥ ५२ ॥ नारद उवाच ॥ इति श्रुतं मे ऋषयो भवद्भ्यो विनि वेदितम् ॥ यथोक्तं ब्रह्मणा मह्यं पुरावृत्तमिदं महत् ॥ ५३ ॥ यदासीदद्भुततमं कन्यारूपस्य मे महत् ॥ वृन्दावने भगवता दर्शितं तद्वदामि वः ॥ ५४ ॥ कृपा भगवतो भवेद्यदि तदीयपादाम्बुजद्वयस्य हि समर्चया हरिकथासमाकर्णनैः ॥ तदास्य सुलभं न किं भवति साधुसंगस्तथा करोति दुरितापहृत्सफलमेव जन्माखिलम् ॥ ५५ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौन कसंवादे द्वादशोऽध्यायः ॥ १२ ॥ नारद उवाच ॥ महत्कौतूहलेनैव आजगाम स्वयं प्रभुः ॥ महदत्यद्भुतं रूपं यत्प्रादिष्टं ह्यहर्नि शम् ॥ १ ॥ न स्मरंति तनुं स्वान्तु गोप्यो रसविमोहिताः ॥ दृष्ट्वा संमोहितस्तत्र कन्यारूपोऽहमद्भुतम् ॥ २ ॥ न मे देहमतिस्फू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्तिरासीत्तत्र द्विजोत्तमाः ॥ तमपश्यं व्रजे श्यामं कामं कञ्जविलोचनम् ॥ ३ ॥ मोचनं सर्व्वतापानां स्मरणात्पापिनामपि ॥ न तच्चित्रं द्विजाश्चित्तमवशं कृष्णदर्शनात् ॥ ४ ॥ भवतीह भृशं गोपगोपीभिः सह किं पुनः ॥ ऐरावती शतज्योत्स्ना स्वकान्त्या च तिरस्कृता ॥ ५ ॥ ताभिः समं मुकुंदेन क्रीडन्तीभिः परस्परम् ॥ काचित्सहैव कृष्णेन गायंती मधुरस्वरम् ॥ ६ ॥ काचिदालिंगनं तस्य कुर्व्वंती प्रेमविह्वला ॥ काचिच्चानिमिषैर्नेत्रैः पश्यंती वदनाम्बुजम् ॥ ७ ॥ काचित्कराभ्यां च करौ कृष्णस्य समयोजयत् ॥ नृत्यगीतविनोदैश्च काचित्कृष्णमरीरमत् ॥ ८ ॥ पादन्यासविलासैश्च किंकिणीनां स्वरैस्तथा ॥ चराणामचरत्वञ्च स्थावराणां च वै गतिः ॥ ९ ॥ आसीत्तच्चित्रमुग्धानां रासरागवितानतः ॥ नानावादित्रघोषैश्च रसनानाञ्च निस्वनैः ॥ १० ॥ नान्तोह्यस्य विलासस्य गम्यते विबुधैरपि ॥ बलयानां नूपुराणां निनादः परमो महान् ॥ ११ ॥ विलोक्याद्भुतमेतन्मे विस्मयाऽतिशयोऽभवत् ॥ किमेतदद्भुततमं किं वानंदो महोत्तमः ॥ १२ ॥ अहो कथं मया दृष्टं किं मयाचरितं शुभम् ॥ इति मन्मानसं ज्ञात्वा नन्दिनी हरिमानसा ॥ १३ ॥ उवाच वचनं सत्यं शृणु कन्ये वचो मम ॥ यथावत्कथयाम्यद्य सौहार्दस्नेहयंत्रिता ॥ १४ ॥ त्वयाहं प्रेषिता बाले श्रीकृष्णाय निवेदितम् ॥ स श्रुत्वा त्वत्समाचारमाजगाम तवांतिकम् ॥ १५ ॥ तं विलोकय चक्षुर्भ्यां योऽयं मधु सुचक्षुषाम् ॥ १६ ॥ नारद उवाच ॥ इति तस्यां कथयंत्यां श्रीकृष्णो भगवान्स्वयम् ॥ त्यक्त्वा गोपीं नातिदूरे मत्समीपमुपागमत् ॥ १७ ॥ उवाच मामागतासि कुतः कस्यासि शोभने ॥ विस्मितासि कथं भीरु किन्ते दृष्टमिहाद्भुतम् ॥ १८ ॥ एवं तस्य वचः श्रुत्वा न शशाकावलोकितुम् ॥ कृत्वा मुखमधो ह्यूचे किं वदामि तवाग्रतः ॥ १९ ॥ त्वं मे प्राणपतिः सम्यग्गतिस्त्वं मम जीवनम् ॥ नान्यं स्मरामि मनसा वचसा न वदामि च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २० ॥ त्वत्समीपे कदा स्थास्य इति मे प्रार्थनं परम् ॥ न यामि कर्हिं कुत्रापि त्यक्त्वा त्वां हि प्रियोत्तम ॥ २१ ॥ प्राणेशाद्य
मम प्राणास्त्वदायत्ता महाप्रभो ॥ को जीवति विना विष्णुं स विष्णुस्तेन संभवः ॥ २२ ॥ तेषां धिग्जीवितं लोके येषां त्वय्यचला रतिः ॥
न भवेदिह विश्वेश गोपिकावृंदमंडन ॥ २३ ॥ यैर्न दृष्टा तव क्रीडा व्रीडा तेषां कुलेष्वपि ॥ वरं राजप्रियाभ्योऽपि चाण्डाली तव सेविका
॥ २४ ॥ अहो नाथ कृपासिंधो मम प्राणास्त्वदाश्रयाः ॥ वृंदावनविनोदाँस्ते द्रष्टुमिच्छामिमानद ॥२५॥ यद्यहं त्वां न पश्येयं चक्षुर्भ्यां प्राण
वल्लभ ॥ तदा मम विलीयेत इयं प्राणान्विना तनुः ॥ २६ ॥ नाग्नेर्ज्योतिस्तथा भानोः प्रभा कांतिर्विधोर्न च ॥ एतावत्कल्पपर्य्यंतं वञ्चि
तास्मि कृपानिधे ॥ २७ ॥ काठिन्यमनुभूतं ते कृपां कुरु मयि प्रभो ॥ इति मद्वादितं श्रुत्वा कृपालुर्भगवान्प्रभुः ॥ २८ ॥ विचार्य्य
देयमेतस्यै ततश्चांतरधीयत ॥ गोपीभिः सहितस्तां तु सखीं त्यक्त्वा ममान्तिके ॥ २९ ॥ अंतर्हिते भगवति जाता विकलिता भृशम् ॥ रुरो
दोच्चैः स्वैर्बाला मृगशावविलोचना ॥३०॥ पतिता भुवि भावेन हा नाथ इतिवादिनी ॥ विमूर्च्छितोऽहं तत्रैव न सस्मार तनुं तदा ॥ ३१ ॥
विलोक्य सा सखीं तां तु तादृशीं पतिविह्वलाम् ॥ समुत्क्षिप्य स्वबाहुभ्यामूच मां मधुरं वचः ॥ ३२ ॥ किमिति त्वं विस्मितासि दर्शयिष्ये
त्वहं हरिम्॥ रहोविहारिणं कांते स्वकांतावशवर्त्तिनम्॥३३॥शौनक उवाच॥ केयं सखी किंनामास्याः किं कर्म्म तन्निवेदय॥ यां त्यक्त्वांतर्हितः
कृष्णो गोपीनां प्राणवल्लभः ॥ ३४ ॥ नारद उवाच ॥ सखीयं नंदिनी नाम्ना दूतीकर्म्मणि योजिता ॥ नित्यं सन्निहिता विष्णोः परमानंद
वर्द्धिनी ॥ ३५ ॥ दूतीनां लक्षणं तुभ्यं वदाम्यद्य द्विजोत्तम ॥ शृणुष्वावहितो भूत्वा रहस्यं परमाद्भुतम् ॥ ३६ ॥ सुवेषता दुःखसहिष्णु
ता च सुशीलता कोमलवाक्यता च ॥सन्मन्त्रिताच्छादितमन्त्रता चच्छंदानुवृत्तित्वमलक्ष्यता च ॥ ३७ ॥ प्रोत्साहनं गुणकथाकथनं बला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नां विश्रंभणं श्रमरतिः प्रियदर्शनञ्च॥ गाढानुरागवचनं वचनस्य सिद्धिः कर्म्मोति षोडशविधं कथयंति दूत्याः॥ ३८ ॥ सप्तं विंशति कर्म्माणि दूतीनां गदितानि च ॥ साहचर्यं मयैवोक्तं राधामाधवयोः सदा ॥ तस्याः सर्व्वाणिकर्म्माणि सन्ति तानि वदामि ते॥३९॥ प्रोत्साहनं चार्थनिवेदनञ्च गुणप्रशंसा नितरां प्रतीतिः ॥ तत्रातिरागाभिनिवेदनञ्च कथाकलानां कथनं द्वयोश्च ॥ ४० ॥ शौर्य्यप्रकाशो बहुमित्रता च सुवेषता दुःखसहिष्णुता च ॥ मितोक्तिता मंत्रनिगूढता च सुसौख्यवार्त्ता च स्वतंत्रता च ॥ ४१ ॥ रूपज्ञता कालनिवेदिता च देशज्ञता वा सहजज्ञता च ॥ सर्व्वत्र कर्मण्यतिविज्ञता च दोषाकराच्छादनकार्यपट्वी ॥ ४२ ॥ शुभोदयाख्यापनशीलता च सौन्दर्यशंसा मिथुनोक्तमंत्रिता ॥ मृदूक्तिता चार्थनिनादवेदिता विवेकविज्ञानकथाप्रशंसा ॥ ४३ ॥ सर्व्वत्र गत्वाभिनिवेदिता च प्रोक्ता हि दूत्याचरणे सुयोग्या ॥ अनेकविज्ञानवचोभिरञ्जसा वियोजयंती पुरुषं स्त्रियं च ॥ ४४ ॥ एतैर्दूतीगुणैर्युक्ता राधामाधवयोः सखी ॥ मामुवाच तथारूपामतिप्रणयसंयुता ॥ ४५ ॥ कथं खिन्नासि वामोरु द्रक्ष्यसि त्वमिहाद्भुतम् ॥ मया सह चलत्वद्य दर्शयामि जनार्द्दनम् ॥ ४६ ॥ तद्रूपं मे प्रियतमं राधया सहवर्त्ति यत् ॥ सातिप्राणप्रियाष्टाभिः सखीभिः सहिता स्थिता ॥ ४७ ॥ यस्या गुणाकृष्टचित्तः कृष्णः साध्वीवशस्थितः ॥ कुञ्जपुञ्जगताक्रीडा नवव्रीडा विराजते ॥ ४८ ॥ मानिनी मानमात्मीयं न जहाति कथञ्चन ॥ यस्यैश्वर्य्यवशाः सर्व्वे ब्रह्मविष्णुपुरोगमाः ॥ ४९ ॥ ईश्वरा अपि कथ्यंते स ईशो राधिकावशः ॥ यद्भिया वाति वातश्च भानुस्तपति यद्भिया ॥५०॥ इन्द्रश्चन्द्रस्तथा कालः स्वे स्वे कार्य्ये चरंति हि ॥ स एव परमो विष्णुः श्रीकृष्णाख्यो वशोऽभवत्॥ ५१ ॥ राधिकां त्वामथो गत्वा दर्शयिष्ये ध्रुवं वने ॥ नावलोकयितुं शक्तो पुंस्त्वेन पुरुषर्षभः ॥ ५२ ॥ अतस्तवाधिकारोस्ति स्त्रीरूपस्य वरानने ॥ तवोपरि कृपात्यंतं श्रीकृष्णस्य विराजिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९३ ॥ कदाचिद्दर्शये त्वां वै लीलामात्मानमेव सः॥ मामुक्त्वान्तर्हितः कृष्णस्त्वमेतामानयांति मे ॥ ९४ ॥ अस्मिन्भुवस्स्थले दूति कन्येयं मत्प्रिया यतः ॥ एनां संदर्शयिष्यामि राधिकां प्राणवल्लभाम् ॥ ९५ ॥ मम प्रेमधनां नारीं ललितां जीविताधिकाम् ॥ मयि प्रेम मयीं देवीं युवराजविलासिनीम् ॥ ९६ ॥ स्वजन्मभूषितोत्तुंगवृषभानुकुलस्थितिम् ॥ परां विद्यां परां शक्तिं रासक्रीडादिकारिणीम् ॥९७॥ ह्लादिनीं मे प्रियतमां दर्शयिष्ये सखिप्रियाम् ॥ एतत्कथितवान्सुभ्रु भगवान्भक्तवत्सलः ॥ ९८ ॥ अतश्चल मया सार्द्धं दर्शयामि जनार्द नम् ॥ इत्याश्रुत्य प्रचलिता सख्या सह वरांगना ॥ ९९ ॥ समुल्लङ्घ्य कियद्दूरं ततोऽपश्यमिहाद्भुतम् ॥ तेजःपुञ्जमतिश्रेष्ठमिष्टमेवावलो कितम् ॥ ६० ॥ सखीसमाजसुखदं श्रीकृष्णानन्दवर्द्धनम् ॥ महाकल्पतरुं नाम्ना हेमभूमिसमुद्भवम् ॥ ६१ ॥ सर्व्वत्र काञ्चनी भूमिर्ना नारत्नाभिमण्डिता ॥ शरीरकांत्या मानिन्या आदर्शमिवं निर्म्मलम् ॥ ६२ ॥ भूतलं यत्र वसती राधामाधवयोः शुभा ॥ अनंतलीलाभिरतौ श्रीराधामाधवौ सुखम् ॥६३॥ क्रीडेते नित्यमेवातो मुदं यांति सखीजनाः ॥ सदा विहारी कृष्णस्तु श्रीराधाप्रेमयंत्रितः ॥ ६४ ॥ क्रीडन्न वेद चात्मानं प्रियया राधया चिरम् ॥ हावभाववतीभिश्च नारीमंडलकांतिभिः ॥ ६५ ॥ स्त्रीनायिकाश्चातितरां सुखयत्येव या च भूः ॥ कुञ्ज पुञ्जविनोदैश्च रतिरागपयोनिधिम् ॥६६॥ किशोर्य्या राधया सार्द्धं हरिं संदर्शये सतीम् ॥ कथयामि ह्यनुष्ठेयं यत्र गन्तुः शुचिस्मिते ॥६७॥ दुष्प्रेक्षणीया सर्व्वेषां भूतानां गहना गतिः ॥ बलीयसी प्रभोरिच्छा नापमार्ष्टुं हि शक्यते ॥६८॥ रहो विशेषसमये प्रवेशः स्यात्तदिच्छया ॥ इत्याशस्य सखी कन्यामाजगामांतिके तयोः ॥ ६९ ॥ राधामाधवयोराशु नंदिनी प्रेमसंगता ॥ चिरं विलोक्य वदनं तयोः संक्रीडमानयोः ॥ ७० ॥ मौनमाश्रित्य सर्व्वज्ञा लेभे सुखमनुत्तमम् ॥ तत्सुखं वेत्ति सा नित्यं नंदिनी हि तयोः प्रिया ॥ ७१ ॥ शक्यते न हि तद्द्रष्टुं ब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्राद्यैरपि ॥ विलोक्य सुचिरं क्रीडास्तयोः सा रममाणयोः ॥ ७२ ॥ पश्चात्सा कथयामास कन्यायाः सुखदागमम् ॥ हरेर्माया समानी ता कन्या प्रणयिनी तव ॥ ७३ ॥ आगता सा मया सार्द्धमदूरेऽस्ति व्यवस्थिता ॥ यां निक्षिप्य मयि प्रेष्ठामन्यस्थानं गतो भवान् ॥७४॥ तवाज्ञया समानीता किं करोमि वद प्रभो ॥ भगवांस्तामुवाचेदं धन्यासि त्वं ममानुगा ॥७५॥ आनीय दर्शयेमां त्वं श्रीराधामानमुत्तमम् ॥ निकुञ्जमंदिरे राधा तिष्ठत्यत्र विलासिनी ॥७६॥ मानिनी मानमासाद्य रसरूपं मनोरमम् ॥ निकुञ्जतरुमासाद्य स्थास्येहमधुना सखि ॥७७॥ उभयोरन्तरं दूरे दूति त्वं तु तया सह ॥ आयाहि याहि वाक्यानि वद राधां तथैव च ॥ ७८॥ विनयं मे प्रियामानं कन्यायै त्वं प्रदर्शय ॥ इत्युक्ता नन्दिनी नेतुं गता कन्यां वरानने ॥ ७९ ॥ आनीय दर्शयामास निकुञ्जभवनं महत् ॥ चामीकरमयी भूमिर्वस्त्ररत्नविभूषिता ॥ ८० ॥ नानामणिगणोपेतं तत्रास्ते मन्दिरं परम् ॥ चित्रमद्भुतसोपानं वितानशयनाशनैः ॥ ८१ ॥ विराजितं यत्र तत्र सरोवरसमन्वितम् ॥ सुगन्धिनीरसं सिक्तं कृष्णागुरुसुधूपितम् ॥ ८२ ॥ हंसकारण्डवाकीर्णं कलकोकिलकूजितम् ॥ शीतमन्दसुगन्धेन वायुना परिवीजितम् ॥ ८३ ॥ आरामोपवनामोदमत्तभ्रमरनादितम् ॥ सुगन्धिनीरसं सिक्तं सर्व्वलोकमनोहरम् ॥ ८४ ॥ मनोरमं वरस्त्रीणां नयनानन्दवर्द्धनम् ॥ षडूर्म्मिरहितं शान्तमनित्यद्रव्यवर्ज्जितम् ॥ ८५ ॥ तन्मध्ये राधिकां देवीं सर्व्वलक्षणसंयुताम् ॥ भासयन्तीं वनं सर्वं स्वांगकान्त्या वराननाम् ॥ ८६ ॥ अनेकहावभावादि द्योतयन्तीं वनेश्वरीम् ॥ सर्व्वविश्वेशभावेन मानितां मृगलोचनाम् ॥ ८७ ॥ कलस्वनां कलगीतामवलोक्य शुचिस्मिताम् ॥ न भूतले तत्सदृशी मानवी नृपसम्भवा ॥ ८८ ॥ देवानामसुराणाञ्च नागानां चापि कन्यका॥ गन्धर्व्वाणां तथान्येषां राधायाश्चोपमामियात् ॥ ८९ ॥ महामानवतीं दृष्ट्वा कन्या सा विस्मिताभवत् ॥ वनेश्वरीं नमस्कृत्य विलोक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च पुनः पुनः ॥ ९० ॥ बद्धाञ्जलिरुवाचेदं राधिकां स्नेहयन्त्रिता ॥ त्वं मे राधेश्वरी माता सर्व्वेशप्राणवल्लभा ॥ ९१ ॥ स्वभावगुण धैर्य्येण श्रीकृष्णेन वशीकृता ॥ न त्वादृशी प्रणयिनी त्रैलोक्येऽपि विलोक्यते ॥ ९२ ॥ तवाधीनं जीवितं मे त्वमेवाति प्रिया हरेः ॥ मम भाग्यप्रयोगे च चक्षुर्भ्यामवलोक्यसे ॥ ९३ ॥ यत्र ब्रह्मादयो देवाः प्रविशन्ति न वै क्वचित् ॥ अन्येषामत्रका वार्त्ता मम भाग्यात्प्रवेशनम् ॥ ९४ ॥ यदि मे कोटिरसना भवन्ति स्तवनक्षमाः ॥ न त्वां वर्णयितुं शक्ता ते गुणान्वेत्ति माधवः ॥ ९५ ॥ यस्या गुणगणैः कृष्णः सर्व्वेशोऽपि वशीकृतः ॥ अतस्ते शरणं प्राप्ता ममोपरि कृपां कुरु ॥ ९६ ॥ अतिप्राणप्रिया विष्णोस्त्वदायत्तः स्वयं हरिः ॥ क्षणमात्रं त्वत्समीपान्नापसर्पति माधवः ॥ ९७ ॥ न केनापि जितः कृष्णस्तव भाग्यं मनोरमम् ॥ नापश्यं तत्र विश्वेशं सखीमूचे क्व मे प्रियः ॥ ९८ ॥ स एवास्याः समीपे चेद्भवेत्पश्यामि साम्प्रतम् ॥ तथा कुरु पवित्रांगि ह्यनयोः संगमो यथा॥ ९९ ॥ श्रुत्वाथ नन्दिनी वाक्यं कन्यामूचे पुनर्व्वचः ॥ कुञ्जान्तरे प्रविश्यावांराधिका प्राणवल्लभम् ॥ १०० ॥ नमस्कृत्य ततो राधां चलिते त्वरया च ते ॥ तादृशे कुञ्जभुवने ददृशाते हरिं प्रियम् ॥ १०१ ॥ दर्शनीयतरं श्यामं किशोरमतुलोपमम् ॥ शिखिपिच्छावतंसञ्च सुष्ठुपीताम्बरावृतम् ॥ १०२ ॥ पूर्णचन्द्रमुखं कृष्णकायं कंजविलोचनम् ॥ सुचारुतिलकं चारुकुण्डलद्वयमंडितम् ॥ १०३ ॥ सुकपोलं सुनासञ्च विलोलाक्षञ्च सुभ्रुवम् ॥ सुकंठवरमालाभिः शोभमानं महाद्भुतम् ॥ १०४ ॥ वनमालाभिवीतांगं सुगन्धिद्रव्यसंप्लुतम् ॥ कोटिकौशेयवसनं वसनोपरिमण्डितम् ॥ १०५ ॥ नूपुरैः कटकैर्भांतं मुद्रिकांगुलिमण्डितम् ॥ सुस्मितेनावलोकेन सुखयन्तं सखीजनम् ॥ १०६ ॥ दृष्ट्वा तं नन्दिनी प्राह कुञ्जस्थां राधिकां विना ॥ कथं प्राणप्रियां कृष्ण त्यक्त्वा भिन्नोऽद्य वर्त्तसे ॥ १०७ ॥ क्षणं न स्थीयतेऽन्यत्र विना तां प्राणवल्लभाम् ॥ सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात्र दृश्यते नाथ किमिदं कारणं वद ॥ १०८ ॥ नारद उवाच ॥ इत्याकर्ण्य सखीवाक्यं भगवानाह तां पुनः ॥ मनसा कर्म्मणा वाचा नाचरेयं तदप्रियम् ॥ १०९ ॥ न वेद्मि कारणं तस्या भिन्नताया मनोरमे ॥ श्रीलाञ्छितमनुप्रायं क्षणे कोपः क्षणे कृपा ॥ ११० ॥ विचित्रविभ्रमासक्तो न विभक्तः कदाचन ॥ तत्प्रेमकोपकेलिभ्यां नाहं व्यग्रः शुभानने ॥ १११ ॥ तस्यै या रोचते केलिस्सा मां सुखयतेनिशम् ॥ न दुःखाय कुतो रुष्टा प्रिया मे वर्त्ततेऽधुना ॥ ११२ ॥ गच्छाशु कन्यया सार्द्धं तत्र गत्वा निवेदय ॥ मद्वार्त्तां पुनरागत्य अपराधं प्रकाशय ॥ ११३ ॥ तां पृच्छस्वाग्रहेणैव तत्प्रियां राधिकां सखीम् ॥ कथं स्थिता निकुञ्जेऽस्मिन्हरिं प्राणप्रियं विना ॥ ११४ ॥ इत्यादिमधुरालापैरापृच्छ त्वमनाकुला ॥ पृष्टा मां किं वदेत्कान्ता ममैका प्राणवल्लभा ॥ ११५ ॥ दूतीविहितवाक्यैश्च समाराधय मे प्रियाम् ॥ अहं चेत्तत्र गच्छामि मानश्चाधिकतां व्रजेत् ॥ ११६ ॥ पतिः प्राणप्रियः स्त्रीणां पत्यौ मानो विराजते ॥ कथमन्यत्र कुर्व्वीति पतिप्राणाः पतिव्रताः ॥ ११७ ॥ अतो याह्यनया सार्द्धं कन्यया सह नन्दिनि ॥ ताम्बूलकुसुमादीनि गृहीत्वा गन्धभाजनम् ॥ ११८ ॥ दत्त्वा वचनचातुर्य्याद्धृत्वा चागच्छ मां प्रति ॥ सुप्रसन्नां प्रियां ज्ञात्वा गमिष्ये दयितां प्रति ॥ ११९ ॥ अनाराध्य प्रियां गच्छन्पतिर्लाघवमाप्नुयात् ॥ १२० ॥ इति वचनविनोदं कृष्णदेवस्य श्रुत्वा मधुरमिदममोघं नन्दिनी वाक्यमाह ॥ किमहमुपनयेयं देहि नाथाद्य वस्तु तव सखिपुरतोहं यामि राधासमीपम् ॥ १२१ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे राधिकामानो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ नारद उवाच ॥ ततो हरिर्ददौ तस्यै ताम्बूलं कुसुमादि च ॥ गन्धभाजनमत्युच्चं दर्शनीयतमं शुचि॥ १ ॥नीत्वा ततः प्रच

१ मानमिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिता नन्दिनी कन्यया समम् ॥ समाययौ निकुंजान्ते राधिकां कृष्णवल्लभाम् ॥ २ ॥ आगत्य विनयेनोच्चैरूचे कृष्णवचांसि ताम् ॥ कि मर्थमत्र भवने स्थितास्येकाकिनी वने ॥३॥ मया न शक्यते द्रष्टुं विच्छेद उभयोरपि ॥ प्राणप्रियां विना तन्तु त्वां विना प्राणवल्लभम्॥४॥ न चाऽनभिज्ञोऽयमस्ति नागरस्तव वल्लभः ॥ तवार्थं गोपवेषेण क्रीडते विपिने महान् ॥ ५ ॥ स एवातितरां दीनां कुर्व्वन्नातिविराजते ॥ मानिनी मानमेवात्र कुर्व्वती परिशोभते ॥ ६ ॥ यदि स्यान्नायको मानी नान्यथासौनिरर्थकः ॥ मानिनी पटुतामेति पत्यौ मानं प्रकुर्व्वति ॥७॥ गुणराशिप्रियात्यन्तं सा त्वं नान्या कदाचन ॥ किमत्र कारणं कान्ते वृथा मानो न राजते ॥ ८ ॥ किमद्य मौनमाश्रित्य स्थितासीत्युत्तरं वद ॥ त्वमाकर्णय मद्वाक्यं ताम्बूलं पुष्पचन्दनम् ॥ ९ ॥ गृहाण हरिणा दत्तं प्रीत्याहं प्रेषितास्मि भोः ॥ इत्याकर्ण्य ततः प्राह सखीं राधा वरांगना ॥ १० ॥ देहे न केवला श्रेष्ठा मनस्यपि विराजिताः ॥ भवंति योषितः शश्वत्परचित्तहरास्तथा ॥ ११ ॥ यदि तासां वशे याति किं करिष्यति मादृशीम् ॥ न जाने क्व गतः कान्तो मां त्यक्त्वाऽत्र वनान्तरे ॥ १२ ॥ कितवः कुरुते धाष्टर्यं त्वन्मुखेन वरानने ॥ यदि शुद्धं मनस्तस्य स्वयं किमिति नागतः ॥ १३ ॥ परं जानेऽत्र चातुर्य्यं कुत्राप्यभिरतोऽन्यतः ॥ आदौ च सखि हृत्वा गां विनयो न विराजते ॥ १४ ॥ किमर्थं मानिनीचित्तं चोरयन्नाभिगच्छति ॥ त्वरा गच्छानया सार्धं सख्या सह यथागता ॥ कथयैतद्वचस्तस्मै यदानीतं नयस्व तत् ॥ १५ ॥ नारद उवाच ॥ इत्याकर्ण्य सखी वाक्यं राधिकायास्त्वरान्विता ॥ उवाच दत्त्वा हरये ताम्बूलं पुष्पचन्दनम् ॥ १६ ॥ राधयोक्तं मम प्राणप्रियोस्त्यन्याप्रियोऽभवत् ॥ मामाश्रित्य निकुञ्जेस्मिन्स्थितो राधां विहाय हि ॥ १७ ॥ इत्युक्ता राधिका कान्ता बहुधा तोषिता मया ॥ न जहाति निजं मानं त्वयि किञ्चित्कृतागसि ॥ १८ ॥ न तया सदृशी कान्ता राधिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याऽति विश्रुता ॥ तां त्यक्त्वा त्वन्यसंस्नेहस्तवैव गुणहीनता ॥ १९ ॥ सत्यं ब्रूहि निजागस्त्वं यतोऽसि श्रेष्ठनायकः ॥ न च सामा
न्यगुणवांस्त्वमुत सर्व्वसंमतः ॥ २० ॥ सत्कान्तालक्षणं याति प्रिया प्राणसखी सती ॥ कथं तव निकुञ्जेस्मिन्प्रवेशस्तां विनाऽभवत् ॥२१॥
नापराध्यसि चेत्सार्द्धं मया नागम्यते कथम् ॥ विचार्य्यते मया प्रीतिर्ग्लानिस्तस्या मनस्यपि ॥ २२ ॥ न ग्लानेरौषधं किञ्चित्प्रतीतिर्नो
पजायते ॥ तस्मात्किमत्र कर्त्तव्यं वदस्वाद्य मनोरम ॥ २३ ॥ नारद उवाच ॥ कास्त्यत्र मेऽपरा पत्नी प्रियाऽन्यैतां विना प्रियाम् ॥
त्वमेव पश्य कुंजेस्मिन्वर्त्तसे न्यायसंयुता ॥ २४ ॥ सापि त्वयैवानीतात्र तवात्राविदितं क्वचित् ॥ इयं सकौतुका कन्या नित्यमुत्कंठिता
सती ॥ २५ ॥ निष्कामा तव संगेन विचरन्ती वने स्फुटम् ॥ इदमावेद्यतामस्यै पुनर्गत्वा वरानने ॥ २६ ॥ ममातिपरमा कान्ता त्वत्तो
नास्तीह काचन ॥ कन्या त्वत्सदृशी कान्ता वर्त्तते भुवनत्रये ॥ २७ ॥ न ते वयःपरिणतिर्न रूपबलसंक्षयः ॥ मयीह संगता कांता कल
वाक्यपरायणा ॥ २८ ॥ यद्यहं क्षणमात्रं हि त्वत्तोनुविरतोभवम् ॥ न मे प्राणाः प्रहृष्यंति प्रिये प्रागसमाधृताः ॥ २९ ॥ त्वदायत्तं मनो
मेऽस्ति त्वदायत्तोऽस्मि सर्व्वदा ॥ अधीनोऽहं मीनवन्न त्वां च त्यक्तुमिहोत्सहे ॥ ३० ॥ यावद्वारिणि वर्त्तेत तावज्जलचरो भवेत् ॥ ततश्चेद्वि
न्नतामेति न जीवति कथञ्चन ॥ ३१ ॥ तथा मे जीवितं राधा बल्लवी प्राणवल्लभा ॥ किमहं वर्णये तस्या गुणान्गुणमहोदधेः ॥ ३२ ॥
सैवात्र जीवनं सत्यमुरगस्य मणिर्यथा ॥ न मे कैतववृत्तिश्च एकरूपोस्मि सर्व्वतः ॥ ३३ ॥ अनेकरूपश्चैवास्मि मत्तो भिन्नं न किञ्चन ॥
सर्व्वेश्वरोहमत्रैव राधिकाप्राणवल्लभः ॥३४॥ संति रूपाण्यनेकानि दृश्ये दृष्टोस्मि चंद्रवत्॥ अत्रैवाहं पुमानेकः केवलो गम्य ईश्वरः ॥३५॥
स्त्रीत्वे तु सा तु राधैव तस्याः सख्यश्चरन्ति हि ॥ न कस्याश्चिदहं प्रेष्ठो न तु चान्यस्य प्रेयसी ॥ ३६ ॥ आवयोरिह सर्व्वत्र क्रीडा नित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विराजते ॥ कस्मान्मानो विधेयोऽत्र यतोऽहं त्वितराप्रियः ॥ ३७ ॥ आगच्छ कुञ्जभवनं समाहूय सखीजनान् ॥ अहं चेन्नाभिगच्छामि तदा मानाधिकं प्रिये ॥ ३८ ॥ एवमेव पुनर्गत्वा सखि सर्व्वं निवेदय ॥ अहमेव ततो गत्वा तोषयिष्ये सुयुक्तिभिः ॥ ३९ ॥ इत्याश्रुत्य सखी कृष्णमुखाद्वचनमुत्तमम् ॥ पुनरागत्य तां राधामुवाचेदं सुयत्नतः ॥ ४० ॥ कांते कांतप्रियासि त्वं वृथा मानरतिस्तव ॥ नायको गुणराशौ च श्रीकृष्णे प्रेमसागरे ॥ ४१ ॥ राधे राधेति राधेति परं मंत्रमुपासते ॥ निविष्टः कुञ्जभवने एकाकी तव वल्लभः ॥ ४२ ॥ काञ्चिन्न चिंतयत्यन्यां वाचा न वदति स्फुटम्॥न तत्र कुरुते कर्म त्ववशः केवलं परम् ॥ ४३ ॥ त्वदर्थं कुरुते शय्यामद्भुतां कुसुमोत्तराम् ॥ ईशानामीश्वरः कांते यद्वशे भुवनत्रयम् ॥ ४४ ॥ लोकपाला विरिञ्चाद्या यस्यादेशानुवर्त्तिनः ॥ स एव परमः साक्षादधीनस्ते वशीकृतः ॥ ॥ ४५ ॥ न जहाति तवासंगं क्षणमात्रं कदाचन ॥ तवार्थे कुसुमानां हि सञ्चयं कर्त्तुमुद्यतः ॥ ४६ ॥ कुञ्जांतरगतः कृष्णस्तस्मिन्मानो विराजते ॥ कुसुमानि सुगंधीनि सञ्चितानि वरानने ॥ ४७ ॥ तत्पार्श्वे चलनं श्रेयः तवमानो न शोभनः ॥ उभयोः संगमो राधे तस्मात्तु परमं सुखम् ॥ ४८ ॥ अपास्य मानमधुना व्रज त्वं प्रियसन्निधौ ॥ अथ वाहूय तं चैव कांतं प्राणप्रियं तथा ॥ ४९ ॥ तेनातिप्रेमसंभारैः प्रेषितास्मि तवांतिकम् ॥ आनेतुं त्वां वरारोहे देहि नाम प्रियं प्रिये ॥ ५० ॥ राधे दग्धा रूपवती त्यज मानं सुरांगना ॥ रसाकृष्टः स वै कृष्णस्तव त्रैलोक्यसुंदरः ॥ ५१ ॥ वृंदावने निकुंजेषु प्रेमप्रसरसंयुतः ॥ विचरत्यनिशं कृष्णो नानारसविचक्षणः ॥ ५२ ॥ श्रुत्वैतद्वचनं राधा सर्व्वेषां सुमनोरमम् ॥ तामुवाच सखीं राधा सत्यं कांतः स मे प्रियः ॥ ५३ ॥ नष्टो ममात्र संदेहो गतो मानो विनाशताम् ॥ सा स्त्री नित्यं भवेत्कांता भर्त्तुर्भावानुसारिणी ॥ ५४ ॥ यास्याम्यहं कृष्णमयि भाति सक्तं जगत्प्रियम् ॥ तथापि मानं यत्कुर्वे श्रोतुं तद्वचनं रहः॥५५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा त्वयापि तत्पार्श्वे वक्तव्यं च तव प्रिया ॥ मानं त्यजति गोविंद त्वदासक्ता च सा प्रभो ॥५६॥ नायं कामिप्रियः कृष्णः स्वामी सर्व्वे श्वरो महान् ॥ स्रष्टा पालयिता हंता कोटिब्रह्मांडनायकः ॥ ५७ ॥ तवासौ प्रियकृद्राधाऽनुरागपरमोत्सवा ॥ सा त्वां भृशं चिंतयति त्वत्पार्श्वे गंतुमिच्छति ॥ ५८ ॥ मानं त्यक्त्वा मद्वचनाल्लाघवं सा कथं व्रजेत् ॥ विनाहूता गच्छती चेल्लघुता भवति ध्रुवम् ॥ ५९ ॥ तस्याः सखीसमाजे तु जायते चोपहासना ॥ तस्या अपि हि माधुर्य्ये न भवेत्प्रियसंगमे ॥६०॥ सम्मुखे नानुनीतासि वृथा मानं करोषि च ॥ विना सखि प्रियेणालं त्वं वै गुणगणालया ॥ ६१ ॥ नारद उवाच ॥ श्रुत्वेत्थं राधिकावाचः नंदिनी कन्यया सह ॥ ययौ श्रीकृष्णपार्श्वे सा तमुवाच प्रियं वचः॥६२॥नंदिन्युवाच ॥ अनुनेतुं गता राधां न मानं त्यजति प्रिया ॥ उक्ता मया सा बहुशो न साऽऽयाति कथंचन ॥६३॥ त्वमेव तत्र गच्छस्व मया सार्द्धं सुरेश्वर ॥ अनुनीयांकमारोप्य विलसस्व तया सह ॥ ६४ ॥ मम वाक्यं न शुश्राव हास्येन मधुसूदन ॥ न मानं ते प्रिया त्यक्त्वा इहायास्यति माधव ॥६५॥ अतो गत्वा तत्समीपं निकुञ्जभवनं हरे ॥ नानाविनोदैः क्रीडित्वा द्वयोर्देहि महासुखम्॥६६॥ समयोयं विभो प्रेष्ठः प्रेयस्यनुनये शुभः ॥ प्रविश्य कुञ्जभवनं कुरुष्व स्मरसंगमम् ॥ ६७ ॥ क्रीडां हि युवयोर्दृष्ट्वा मनोऽस्माकं प्रसीदति ॥ इयञ्च कन्या युवयोर्विलासं द्रष्टुमागता ॥ ६८ ॥ एतावतालं मानेन व्रज कृष्ण प्रियान्तिकम् ॥ भिन्नौ दृष्ट्वा युवां प्राणा मम यांति विनाशताम् ॥ ६९ ॥ नित्यलीलां च युवयोरिहाहं कन्यया सह ॥ यथा पश्यामि भगवाञ्चिरं मा भवतु प्रभो ॥ ७० ॥ नारद उवाच ॥ श्रुत्वेत्थं नन्दिनीवाक्यमुवाच भगवान्स ताम् ॥ उत्कण्ठितोहञ्च भृशं यामि तत्र त्वया सह ॥ ७१ ॥ श्रीकृष्ण उवाच ॥ धन्यासि नन्दिनी नित्यं नातुरा त्वं कदाभवः ॥ इयञ्च कन्या मे द्रष्टुं रहस्यमभिकांक्षति ॥ ७२ ॥ तस्मादस्यै सुखं देयं विनोदं मम पश्यतु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छानया सह ब्रूहि राधामागच्छति प्रियः ॥ ७३ ॥ अनन्तरं हि भवती न मानं कर्त्तुमर्हसि ॥ मानोऽनिशं कृतः कान्ते रसभंगकरो ध्रुवम् ॥ ७४ ॥ नन्दिन्युवाच ॥ गच्छामि राधिकापार्श्वमागन्तव्यं त्वया लघु ॥ कर्त्तव्या कन्यकाकांक्षा अकर्त्तव्योऽह्यनादरः ॥७५॥ पश्ये रहस्यं युवयोर्यतोहं सहचारिणी ॥ सहैव गमने राधाऽयाचतेति ममाग्रहात् ॥७६॥ ततोऽनया मया सार्द्धं तत्र वै गच्छ मा चिरम् ॥ एकाकिनस्ते गमनमनौचित्यकरं परम् ॥७७॥ नारद उवाच ॥ इत्युदीरितमाकर्ण्य प्रस्थितः स तया सह ॥गतो राधासकाशं स मानिनी मानमत्यजत् ॥ ७८ ॥ नानाविनोदलीलाभिश्चिक्रीडे सा वृषार्कजा ॥ आदृतो भगवान्कृष्णस्तयाऽभिमतया सह ॥ ७९ ॥ कृत्वा प्रणामं बहुशस्तदोवाच तु कन्यका ॥ दृष्ट्वाद्भुतं रहस्यं सा परं विस्मयमागता ॥८०॥ धन्या प्रिया ते श्रीकृष्ण यया त्वं रमसेनिशम् ॥ कृताञ्जलिर्विषयवाग्दृष्टा तु परमाद्भुतम् ॥ ८१ ॥ त्वमेव प्राणनाथो मे त्यक्तुं शक्नोम्यहं कथम् ॥ यथाविनोदं लीलान्ते पश्येयं भुवनोत्तमाम् ॥८२॥ निकुञ्जे वनमध्ये च तत्रतत्र स्थिता ह्यहम् ॥ यद्द्रष्टुं मुनयो नित्यं तपन्ति परमं तपः ॥३८॥ अधुनापि न ते द्रष्टुं शक्ता हि बहुजन्मभिः ॥ दृष्टं परं कौतुकं मे तव नाथ प्रसादतः ॥ ८४ ॥ धन्याहं ते कृपा जाता यन्ममोपरि माधव ॥ पूर्व्वजन्मार्जितं पापं समूलमधुना हतम् ॥ ॥ ८५ ॥ यद्रहस्यमद्भुतन्ते भवत्प्रणयगोचरम् ॥ याचे वरं परं त्वत्तः किमन्यं पुण्यमुत्तमम् ॥ ८६ ॥ तेषां कालो वृथा याति त्वां भजंति न ये विभो ॥ संस्मरन्ति महान्तोऽपि प्रेरिता निजकर्म्मभिः ॥८७॥ कृष्ण कांत करुणाकर कर्म्मसमूहकृन्तन ॥ श्रीधर विष्णो विश्वभावन परमेश्वर परात्मन् ॥८८॥मे जनुर्भवतु गुल्मलतासु प्राणनाथ इदमेव समीहे ॥ किं तपः किमिह धर्म्मसमूहः किं कृतं हि धनदानमनंतम्॥८९॥ किं परोपकृतिरन्यजनौ मे येन दृष्टमिदमेव रहस्यम् ॥ हे विभो चिरमिह भ्रमितो गाम्पर्यटन्सकललोकमशेषम् ॥ ९० ॥ एतदेव सुखसिन्धु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनन्तं नावलोकितमहो क्वचिदेव॥नित्यमेव नियता तव लीला राधिकारसगतस्य न दृष्टा ॥ ९१ ॥ यत्क्षणं भवति ते विपिनेऽस्मिन्कोटि
कल्पसुखमेति न तुल्यम् ॥ याचे विष्णो देहि मे जन्म यत्र स्थित्वा लीलां नित्यमेवानुदृश्ये ॥ वृन्दारण्ये कान्तभूमिप्रदेशे यं दृष्ट्वाहं यामि
मोदं त्वपारम् ॥ ९२ ॥ श्रीकन्योवाच ॥ दृष्टं रहस्यमेतन्मे भगवन्नद्भुतं परम् ॥ रासक्रीडास्थलं चापि व्रजलीलां प्रदर्शय ॥ ९३ ॥ नित्या
श्चेद्व्रजलीलास्ते मह्यं दर्शय नारद ॥ कन्यारूपेण ते विष्णो दर्शनाधिकृतं मम ॥ ९४ ॥ न वै दर्शनयोग्यत्वं कुर्य्यां किं वद मे प्रभो ॥९५॥
॥ किशोर उवाच ॥ श्रूयतां करणीयं यद्यथावत्कथयामि ते ॥ इतो मधुवने रम्या गंगा श्रीकृष्णसंज्ञिता ॥ ९६ ॥ तत्र स्नानेन पुंस्त्वं
स्यात्कन्यारूपस्य तेऽनघ ॥ पुंस्त्वे जाते ततस्तुभ्यं दर्शयिष्ये व्रजोत्सवम् ॥ ९७ ॥ नारद उवाच ॥ इत्युक्ते तु समागम्य गंगां श्रीकृष्ण
संज्ञिताम् ॥ स्नात्वा पीत्वा पयस्तस्याः पुंस्त्वं प्राप्तस्तदैव हि ॥ ९८ ॥ अपश्यमद्भुतं तत्र ह्यात्मानं पुंस्त्वमागतम् ॥ लब्ध्वा मनोरथान्स
र्व्वान्व्रजं द्रष्टुमथाययौ ॥ ९९ ॥ नारदेन स्वरूपेण सानन्दः परमोत्सुकः ॥ तं सायन्तनवेलायां प्रविष्टो व्रजमण्डलम् ॥ १०० ॥ ददर्शाथ
समायांतं गोपैर्गोभिरधोक्षजम् ॥ वयस्यैरनुगायद्भिः कीर्त्तिं परमपावनीम् ॥ १०१ ॥ अथो व्रजाद्विनिःसृत्य गोप्यः सर्वा दृहक्षवः ॥ मात
रश्च यशोदाद्याः कृष्णरामौ सुतानपि ॥ १०२ ॥ रामकृष्णौ च सर्व्वेशौ गोपवेषविभूषितौ ॥ चारयित्वा वने गाश्च व्रजमेभिश्च जग्मतुः
॥ १०३ ॥ गौरश्यामौ नृणां श्रेष्ठौ सर्व्वविश्वेशवन्दितौ ॥ अनन्तलीलाभिरतौ गोपवेषधरावपि ॥ १०४ ॥ नित्यं क्रीडति गोपीभिर्व्रजप
त्नीभिरात्मवान् ॥ आलोक्य वनिताः सर्व्वाः प्रीताः श्रीकृष्णदर्शने ॥ १०५ ॥ नीराजनविधिं कृत्वा व्रजं निन्युर्व्रजेश्वरम् ॥ व्रजेश्वरी गृहं
रम्यं व्रजस्त्रीभिरथागमत् ॥ १०६ ॥ नारदोऽपि तदा प्राप व्रजेशसदनं महत् ॥ तं दृष्ट्वाऽयान्तमुत्थाय भगवान्प्रयताञ्जलिः ॥ १०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच वचनं चारु शुभायातं महामुने ॥ अद्य नो जन्मसाफल्यमद्य नः परमं तपः ॥ १०८ ॥ पूर्व्वपुण्यसमूहेन लब्धं वै दर्शनं तव ॥ गोपराजगृहं धन्यं यन्निविष्टो महामुनिः ॥ १०९ ॥ धन्यं गृहं गृहस्थानां सर्व्वतीर्थकरं महत् ॥ साधुभिर्यत्समायातं तव पादोरुपंकजम् ॥ ११० ॥ पितरस्तद्गृहं यान्ति प्रसन्नाः सर्व्वदेवताः ॥ भवन्ति नियतं तत्र यत्र गच्छन्ति साधवः ॥ १११ ॥ येषां पादोदकं तीर्थं तीर्थाना मपि पावनम् ॥ न पतंति गृहे यत्र श्मशानमिव तद्गृहम् ॥ ११२ ॥ न विष्णुकीर्त्तनं यत्र न च भागवता जनाः ॥ तद्गृहं क्रोष्टुसदनं तद्गृहस्थजनिर्वृथा ॥ ११३ ॥ धन्यं तत्सदनं श्रेष्ठं यत्रायांति भवद्विधाः ॥ ये स्वपादोदकेनैव पावयंति गृहांगणम् ॥ ११४ ॥ मुने लोके शुभं सर्वं यतः पर्य्यटनं तव ॥ विशेषेण पवित्रं मे गृहमागमनात्तव ॥ ११५ ॥ धन्यो नन्दः पिता मेऽद्य यशोदा जननी तथा ॥ धन्योऽहं पावितः सर्व्वे मुनेरागमनेन ते ॥ ११६ ॥ तथापि पृच्छे त्वामद्य यदागमनकारणम् ॥ अहं तवाज्ञाकरणात्कृतार्थः स्यां न संशयः ॥११७॥ यथा व्रजाधिराजोऽहं निवसाम्यत्र येन च ॥ तद्रहस्यं मया वाच्यमनुरागो यतस्त्वयि ॥ ११८ ॥ ब्रवीमि व्रजकेलिं स्वां विहारांश्च तथा बहून् ॥ जानंति नैतद्रोप्यं मे गोपा नन्दादयस्तथा ॥ गोप्यो रहस्यं बालाश्च ममानुग्रहणं विना ॥११९॥ नारद उवाच ॥ निशम्येत्थं भगवतो वचनं चाहमब्रवम् ॥ आनन्दबाष्पकलया वाचा गद्गदया भृशम् ॥ १२० ॥ नन्दालये या लीलास्ते कृष्ण वृन्दावने गिरौ ॥ वदतां शृण्वतां गेहे रतिं छिन्दन्ति या नृणाम्॥१२१॥बाल्यकौमारपौगण्डवयःसु च कृतास्त्वया॥ अनेकविस्तारतया वदे मे त्वं प्रियो यतः॥१२२॥ अजनस्य च ते जन्म नाशायोत्पथगामिनाम् ॥ क्षेमाय सर्व्वलोकस्य कर्त्तुं कर्म्माणि चैव हि ॥ १२३ ॥ यथैव सोऽब्धिर्मथितो लभ्यतेऽथ सुधा यथा ॥ संसेव्यमानो भक्तैस्त्वं ज्ञायसे नान्यथा क्वचित् ॥ १२४ ॥ न ते कश्चिद्विकारोऽस्ति सृजतः रक्षतोऽपि वा ॥ लोकान्संहरत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चैव निर्गुणोऽसि यतो विभो ॥१२५॥ सगुणत्वं रागयोगात्स्फटिकस्यैव ते स्मृतम्॥ सा ज्योतिर्ज्योतिषां वारिप्रतिबिम्बो यथा भवेत्॥१२६॥
आत्मा त्वं सर्व्वभूतेषु मध्यवर्त्ती क्वचित्स्थितः ॥ चित्तस्थैर्य्यं परं ज्ञानं संसारक्लेशकृन्तनम् ॥ १२७ ॥ यतः स्यात्तन्न शृणुयात्को मूढो
यो नरेतरः ॥ तोष्येऽहं तत्परो भूत्वा कथयस्व कृपानिधे ॥ १२८ ॥ श्रीकृष्ण उवाच ॥ शृणु त्वं मुनिशार्द्दूल. कथयाम्यात्मकौतुकम् ॥
यथा व्रजे विहारो मे भवेत्परमदुष्करः ॥ १२९ ॥ नित्यो व्रजस्तथा नित्या य एते व्रजवासिनः ॥ गोपा गोप्यो वनं गावो विहराम्यत्र
नित्यशः ॥ १३० ॥ न पश्यन्ति नरा मूढा मायया नष्टचक्षुषः ॥ कामक्रोधाभिभूताश्च विशेषेण कलौ युगे ॥ १३१ ॥ लोका विषयिणो
येऽत्र श्रुतिस्मृतिविवर्जिताः ॥ धर्म्महीना ह्यनुदिनं मद्भक्तिरहिता भृशम् ॥ १३२ ॥ भक्तोऽहं ज्ञानवानस्मि मत्तोऽन्यः कोऽत्र विद्यते ॥
ब्राह्मणा वेदरहिताः शूद्राचाराः कुटुम्बिनः ॥ १३३ ॥ लोलुपा भोजने पाने विद्याविरहिताः खलाः ॥ नानापथोपदेष्टारः कुकर्म्मनिरताः
स्वयम् ॥ १३४ ॥ दूषका विष्णुभक्तानां सत्कर्म्मविमुखाः परम् ॥ लोकं चोपहसिष्यन्ति स्वच्छन्दा बकवृत्तयः ॥ १३५ ॥ स्वप्नो
पमे नृलोकेऽस्मिन्विशेषेण कलौ युगे ॥ तेषामहं समुद्धर्त्ताऽवश्यं संसारसागरात् ॥ १३६ ॥ यदा पूर्व्वजनुःपुण्योपचयो भविता
नृणाम् ॥ तदा मद्भक्तसंयोगस्ततो मद्भक्तिसम्भवः ॥ १३७ ॥ व्रजेऽनुरागो राधायाः चरणानुस्मृतिः परम् ॥ गृणाम्यनुग्रहे
णैव अवतारान्पृथग्विधान् ॥ १३८ ॥ असुरा यवनांशेषु जाता लोकोपतापिनः ॥ अनीतिनिरताः सर्वे संग्रहे च प्रबुद्धयः ॥ १३९ ॥
पलायमानास्तेषां हि प्रजाः स्युरतिपीडिताः ॥ प्रापुर्देशान्तरं चापि क्वचिन्न सुखिताऽभवन् ॥ १४० ॥ वैश्यास्तु शुद्धपाषण्डा नियतं
कूटवृत्तयः ॥ शश्वत्क्रूरक्रियाश्चैव विषये सारबुद्धयः ॥ १४१ ॥ तेषु विप्रेषु नष्टेषु कथं धर्म्मः प्रवर्त्तते ॥ कदाचित्केऽपि मद्भक्ता भविष्यन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलौ युगे ॥ १४२ ॥ शूद्रा विकर्म्मनिरता गोविप्राग्निपराङ्मुखाः ॥ तदा धरातिभारा हि कृत्वा गोरूपमद्भुतम् ॥ १४३ ॥ संप्राप्ता ब्रह्मसदनं स्वदुःखानि न्यवेदयत् ॥ प्रयामि पातालतलं भारं सोढुं नहि क्षमा ॥ १४४ ॥ न शैलानां च सिन्धूनां लवणानां तथा नृणाम् ॥ नहि भारः सम्भवति यथा भारोऽह्यपालनात् ॥ १४५ ॥ ब्राह्मणा वेदरहिताः सदाचारविवर्जिताः ॥ क्षत्रियास्त्यक्तराज्याश्च वैश्या वृत्तिप्रपीडिताः ॥ १४६ ॥ शूद्राः स्वामिष्वभक्ताश्च स्त्रियः पररताः सताः ॥ त्यक्तमातापितृस्नेहाः शुश्रूषारहिताः परम् ॥ ॥ १४७ ॥ विकर्म्मनिरता लोकाः कुकर्म्मण्यतिरागिणः ॥ यदा तदाऽतिभारो मे भवत्येव जगद्गुरो ॥ १४८ ॥ श्रुत्वेति वाक्यं धरणेः पितामहश्चिरं समुद्विग्नमना विचार्य्य ॥ साद्ध धरित्र्यामरलोकसङ्घैर्म्ममालयं क्षीरनिधिं जगाम ॥ १४९ ॥ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे कलिप्रभाववर्णनं नाम चतुर्दशोऽध्यायः ॥१४॥॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ब्रह्मा क्षीराब्धिनिकटे सूक्तैश्चक्रे मम स्तवम् ॥ समाधाय ततश्चित्तं श्रुतवानथ भारतीम् ॥१॥ अहं स्वरूपं लोकेषु प्रदर्श्यातिमनोहरम् ॥ हरिष्यामि भुवो भारं मा कुरुष्व मनोऽन्यथा॥२॥ ततो ब्रह्मा ममानुज्ञां यथोक्तामाधिगम्य च॥ययौ स्वलोकं देवाश्च ययुस्स्वस्वनिवेशनम्॥३॥ तैः प्रार्थितोऽहमभवं देवक्यां वसुदेवतः॥नीतोऽहं वसुदेवेन गोकुलं गोपमण्डितम्॥४॥ मदागमनमारभ्य संवृद्धिर्गोकुलेऽभवत्॥दृष्ट्वा मद्रूपममलमुत्सुको नन्दगोपकः ॥५॥ असंख्याः प्रददौ गाश्च गोपान्गोपीरयोजयत् ॥ हृष्टः स्वभवने नन्दश्चकार परमोत्सवम् ॥ ६ ॥ गीतवादित्रघोषैश्च विप्राणां वेदनिस्वनैः ॥ गानैर्बल्लवनारीणां गायकानां च संकुलम् ॥ ७ ॥ हरिद्रादधितैलैस्ते लिलिपुर्नवनीतकम् ॥ चिक्षिपुः सिषिचुर्गोपाः ननृतुश्च परस्परम् ॥ ॥ ८ ॥ आशिषं प्रददुर्विप्रा ये वाऽसंस्तत्र याचकाः ॥ गोपा गोप्योऽभिसंहृष्टा ददुर्वस्त्रविभूषणम् ॥ ९ ॥ केचित्स्तुवन्ति नृत्यन्ति गायंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददुराशिषः ॥ अयाचितं याचकेभ्यः प्रायच्छंस्ते धनं बहु ॥ १० ॥ सर्व्वे विस्मृत्य चात्मानं समाश्च परमोत्सवे ॥ धनिका इव लभ्यन्ते सूतमागधवन्दिनः ॥ ११ ॥ गोपानामतिदानैश्च याचकानां च तर्पणैः ॥ सुमङ्गलद्रव्यदधिनवनीतघृताम्बुभिः ॥ १२ ॥ सिक्ता नरास्तथा नार्य्यो मुदमापुर्महातुराः॥ देवा विमानमारुह्य ददृशुः परमोत्सवम् ॥ १३ ॥ चक्रुः कुसुमवृष्टीश्च स्तुत्वा वाद्यान्यवादयन् ॥ तेषां महोत्सवेनाहं प्रसन्नोऽतितरां तदा ॥ १४ ॥ व्रजस्थेभ्यः सुखं दातुं लीलां कर्त्तुं समुत्सुकः ॥ द्वापरान्ते कलेरादौ व्यतीते तु शरच्छते ॥ १५ ॥ प्रौष्ठपद्यामथाष्टम्यां कृष्णायामर्द्धरात्रके ॥ रोहिणीस्थे चन्द्रमसि स्वोच्चगेऽभूज्जनिर्मम ॥ १६ ॥ तदा मनांसि साधूनां प्रसन्नान्यभवन्गृहे ॥ दिशोऽभवन्सुविमला वियद्विमलतारकम् ॥ १७ ॥ महोत्सवस्तु सर्व्वेषां जनानाञ्चाभवद्गृहे ॥मद्गुणश्रवणं नाम्नां कीर्त्तनं स्मरणं मम॥ १८॥ पादसेवार्च्चनं दास्यं वन्दनं चाभवद्गृहे ॥ सर्व्वेषाममभवद्विप्र तथैवात्मानिवेदनम् ॥ १९ ॥ सर्व्वत्र मङ्गलं भूमावधर्म्मो विलयं गतः ॥ मय्येव निरताः सर्व्वे भक्तिभावविभाविताः ॥ २० ॥ देवक्या वसुदेवेन सेवितः पूर्व्वजन्मनि ॥ दिव्यवर्षसहस्रैस्तु ततोऽहमभवं तयोः ॥ २१ ॥ प्रतिज्ञातं मया तत्र भविष्ये युवयोः सुतः ॥ येन रूपेण च तयोर्व्वरदानार्थमागतः ॥ २२ ॥ तदेव परमं रूपमादायाक्षिपथं गतः ॥ दृष्ट्वा च पितरौ हृष्टौ चक्रतुस्तौ स्तुतिं मम ॥२३॥ पिता ममाद्भुतं दृष्ट्वा प्रबद्धकरसंपुटः ॥ सुताऽभावनया वृत्त्या विनयानतकन्धरः ॥ विदित्वातिगतो भावं स्तौति मां प्रणयाप्लुतः ॥ २४ ॥ ॥ श्रीवसुदेव उवाच ॥ दृष्टं मे परमं रूपं श्यामकञ्जविलोचनम् ॥ चतुर्भुजं शंखचक्रगदापद्मविभूषितम् ॥ २५ ॥ अलौकिकं कुण्डलिनं किरीटांगदशोभितम् ॥ त्वमेव विष्णुः परमं ब्रह्म त्रैलोक्यनायकः ॥ २६ ॥ अनन्ताण्डयश्च ब्रह्माण्डमेतद्विश्वेश्वरो विभुः ॥ प्रतीयते सत्तया ते विश्वं सदसदात्मकम् ॥ २७ ॥ न किञ्चिदासीत्त्वत्तोन्यत्किञ्चिदस्ति चराचरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशते गृहं यद्वन्निशायां ज्योतिषां विभो ॥ २८ ॥ तथा ब्रह्माण्डभाण्डान्तः प्रकाशस्तव नान्यथा ॥ एकोऽनेको न ते रूपं ह्यनादिस्त्वमनन्तकः ॥ २९ ॥ निरीहोऽनन्तलीलश्च निर्गुणः सगुणाकृतिः ॥ स्रष्टा कर्त्ता च संहर्त्ता याथार्थ्यं वेद कस्तव ॥ ३० ॥ स एव भगवान्पूर्णस्त्वं जातोऽसि गृहे मम ॥ सतां संरक्षणार्थाय असतामभवाय च ॥ ३१ ॥ अहन्ते शरणं प्राप्तो रक्ष मामखिलाद्भयात् ॥ कंसोऽपि दुष्टो सिधर आयास्यति वधाय ते ॥ ३२ ॥ यावन्मनोवचस्तुत्वा वसुदेवोऽथ खिन्नवत् ॥ विरराम तदोवाच देवकी हरिमीश्वरम् ॥ ३३ ॥ एतद्रूपं ध्यानगम्यं योगिनां योगसिद्धये ॥ वेदैरपि न वक्तव्यं तद्दृष्टं मे सुरेश्वर ॥ ३४ ॥ प्रलये जठरे यस्य विश्वं यात्यखिलं लयम् ॥ स त्वं मया कथं गर्भे भृतो लोकविडम्बनम् ॥ ३५ ॥ विडम्बना यथा न स्यात्तथैवात्मतनुं कुरु ॥ पुत्रानुरागस्त्वयि मे न स्याच्च परमेश्वर ॥ ३६ ॥ अनुग्रहाय भक्तानां त्वत्प्राकट्यं गृहे मम ॥ कंसोऽयं न यथा वेत्तु त्वज्जन्म मम वेश्मनि ॥ ३७ ॥ तथैव कार्य्यं भगवन्नचिरेण कृपानिधे ॥ इत्थं मुने स्तुतस्ताभ्यां भीताभ्यां कंसतो भृशम् ॥ ३८ ॥ विज्ञायातोऽभवं तूर्णं यथैव प्राकृतः शिशुः ॥ मयोक्तश्च पुनस्ताभ्यामासुपानय गोकुले ॥ ३९ ॥ तत्रास्ते च सखा नन्दस्तद्गृहे मां निधाय च ॥ तस्य कन्यामिहानीय देवकीशयने कुरु ॥४०॥ इत्याज्ञतो मया शौरिश्चलितो नन्दगोकुलम् ॥ द्वारः सर्व्वाः स्वयं मुक्ता रुद्धाः कीलकशृंखलैः ॥ ४१ ॥ घना जगर्जुर्ववृषुर्मन्दंमन्दं फणीश्वरः ॥ स्वफणैर्वारयामास जलं वर्षासमुद्भवम् ॥ ४२ ॥ गतोऽसौ यमुनातीरे सा पूर्णा वर्षवारिभिः ॥ रात्रिर्घोरा घोरतरा नदीयं बालको मम ॥ ४३ ॥ दुर्गं पश्यामि पन्थानं तरिष्येऽहं नदीं कथम् ॥ अत्र स्थिते मयि क्रूरः कंसश्चेत्प्रेषयेन्नरान् ॥ ४४ ॥ मामदृष्ट्वाथ ते तत्र यदीहायान्ति मामनु ॥ तदा किं वा करिष्येऽहं स सर्व्वान्मारयेद्द्रुतम् ॥ ४५ ॥ भीतस्त्वेवं वासुदेवश्चिन्तयामास सङ्कटम् ॥ तावन्मार्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दद‍ौ शौरेर्जानुमात्रजला नदी ॥ ४६ ॥ उत्तीर्णः स ययौ घोषं गोपैर्गोभिरलंकृतम् ॥ स तत्र मोहितान्सर्व्वान्भगवन्मायया व्रजे ॥ ४७॥ सुप्तांश्च नन्दगोपादीन्वीक्ष्य तत्पुरमाविशत् ॥ दृष्ट्वा यशोदाशयने कन्यकां सूतिकागृहे ॥ ४८॥ निधाय तत्र तनयं कन्यामादाय चागमत् ॥ पूर्व्ववत्पिहिता आसन्द्वारः सर्व्वाः स्ववेश्मनि ॥ ४९ ॥ तां कन्यां देवकीतल्पे निधाय स उपाविशत् ॥ मथुरायां ततोऽभूद्यत्पश्चाद्रक्ष्येऽथ सांप्रतम् ॥ ५० ॥ शृणु नन्दालये ब्रह्मन्ममजन्म महोत्सवम् ॥ पूर्व्वं यशोदा मग्नासीन्मम मायाविमोहिता ॥ ५१ ॥ मा वेद कन्यकाजन्म मम चागमनं तदा ॥ गतेऽथ वसुदेवे सा प्रबुद्धा मां ददर्श वै ॥ ५२ ॥ तत्रस्था गोपिकाः सर्वा मां दृष्ट्वा मुदमाप्नुवन् ॥ श्रुत्वा नन्दोऽथ हृष्टः सन्स्नात्वा दानान्यथो ददौ ॥ ५३ ॥ असंख्यं स गवां दानं सवत्सानां विधानतः ॥ अलंकृतानां गृष्टीनां प्रादात्परमया मुदा ॥ ५४ ॥ दर्शनायागतान्गोपान्शातकौम्भाम्बरावृतान् ॥ नानारत्नसमेतश्च ददौ दानं स उत्तमम् ॥ ५५ ॥ दानानि प्रददौ तेऽपि न धनागारकांक्षिणः ॥ स्वाभाविकं महौदार्य्य मद्भक्तेषु भृशं भवेत् ॥ ५६ ॥ मच्चित्तानां मनोवृत्तिर्नान्यत्रेति कदाचन ॥ यत्राहं तत्र कमला कैवल्यपदमास्थिता ॥ ५७ ॥ तां विना क्व भवेत्प्रेम क्व दानं क्व महोत्सवः ॥ नन्दोऽतिपूर्णः सम्पत्त्या तत आहूय गोपकान् ॥ ५८ ॥ चक्रे महोत्सवं दृष्ट्वा गोप्यश्चाजग्मुरुत्सुकाः ॥ सर्व्वाः समागताश्चासन्नानोपायनपाणयः ॥ ५९ ॥ नन्दालयं प्रमुदिताः सुवस्त्रा मणिभूषिताः ॥ आगत्य मिलिताः सर्व्वा उत्सवश्चक्रुरुत्तमम् ॥ ६० ॥ नवनीतहरिद्राभिस्तथा मंगलवस्तुभिः ॥ यद्गीतं गोपगोपीभिः तच्छृणुष्व महामुने ॥ ६१ ॥ धन्यो नन्दो यशोदा च धन्येयं व्रजनायिका ॥ यतो भाग्यविभूत्यैव जरठत्वे सुतोद्भवः ॥ ६२ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे कृष्णोत्पत्तिर्नाम पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीकृष्ण उवाच ॥ श्रुत्वेति नन्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोपानामतिहृष्ट उवाच तान् ॥ आशीर्भिर्भवतामेव पुत्रजन्म ममाऽभवत् ॥ १ ॥ बान्धवाः साधवो यस्य वाञ्छंति सततं सुखम् ॥ तस्यास्ति पूर्व्वसुकृतं यतः स्युः सर्व्वसम्पदः ॥ २ ॥ गोपा ऊचुः ॥ यशोदागर्भसम्भूतेरारभ्य सकले व्रजे ॥ संपत्तिर्विपुला जाता सर्व्वसौख्यं दिनेदिने ॥ ३ ॥ यत्रयत्र हि विश्वात्मा संभवेद्धरिरीश्वरः ॥ तत्रतत्र श्रियो वासः दृष्ट एव इहाद्भुतम् ॥ ४ ॥ अन्यथा चेदीदृशी सम्पत्तथा प्रववृधे कथम् ॥ लक्षणैरेव जानीयाज्जन्मतो हि शुभाशुभम् ॥ ५ ॥ अभितः सम्पदो नित्याः सर्व्वेषां च गृहेगृहे ॥ न श्रुता न च दृष्टाश्च किमेतदिति नृत्यते ॥ ६ ॥ गावो ह्यसंख्याः सर्व्वेषां पात्रं सर्व्वं हिरण्मयम् ॥ कदापि नासीद्यद्द्रव्यं तदनन्तं विलोक्यते ॥ ७ ॥ अतस्तवायं तनयो विष्णुरेव न संशयः ॥ उद्भूतः साधुरक्षाथ स्वजनानां शुभाय च ॥ ८ ॥ धन्यंतव वयस्त्वञ्च धन्योऽयं तस्य संभवः॥ यतो भाग्योदयो गोपगोपीष्विति वदाम्यहम् ॥९॥ अन्ते वयसि जातोऽयं यशोदायां तवात्मजः ॥ विष्णुर्व्वा तत्समोऽन्यो वा सर्व्वथा भाग्यवानयम् ॥ १० ॥ श्रीकृष्ण उवाच ॥ वदत्स्वेवं गोपगोपीजनेषु निखिलेषु च ॥ नन्दो महामना मेन आत्मानं पूर्णमाशिषाम् ॥ ११ ॥ व्रजे तद्दिनमारभ्य मंगलानि दिनेदिने ॥ अभूवन्नुत्सुकाः सर्व्वे साधवो दुःखिताः खलाः ॥ १२ ॥ दिव्यवस्त्रावृताः सर्व्वे दिव्याभरणभूषिताः ॥ नन्देन पूजिताः सर्व्वे विरेजुस्तत्रतत्र हि ॥ १३ ॥ जगुर्नानाविधं गानं ननृतुश्च परस्परम् ॥ गावोऽथ चित्रिता वस्त्रमाल्यपर्व्वतधातुभिः ॥ १४ ॥ वृषा गावो वत्सतराश्चक्रुशुर्घोषभूमिषु ॥ लिहन्ति वत्साः स्वाङ्गानि पुच्छानूर्ध्वं क्षिपन्ति च ॥ ॥ १५ ॥ इतस्ततः प्रधावन्ति निषिंचन्ति पयःस्रवैः ॥ चक्रुस्तथातथा चेष्टां मुमुदुस्ते यथा तथा ॥ ॥ १६ ॥ गोपा गोप्यः प्रमुदिताश्चक्रुस्ते दधिकर्दमम् ॥ गालीभिः परिहासैश्च जगुः सर्व्वे मनोरमम् ॥ १७ ॥ उग्रश्च मां प्रति तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिहासो यथाभवत् ॥ नित्यानन्दयुतः शश्वद्भविष्यत्येष बालकः ॥ १८ ॥ कौतुकन्तु समाश्रित्य तव चेष्टा प्रवर्त्तते ॥ न ते
माता पिता कश्चिन्न कश्चन सहोदरः ॥ १९ ॥ तव माया जडा साध्वी परचित्तप्रहारिणी ॥ गृहेगृहे प्रविष्टैव लक्ष्यते भुवनत्रये ॥
॥ २० ॥ कोपि वेत्ति न ते कूटं कर्म्म यत्त्वं करोषि हि ॥ नन्दगोपगृहे पुत्रो यशोदागर्भसम्भवः ॥ २१ ॥ सर्व्वेषां गोपगोपीनां
नयनानन्दभाजनः ॥ अनेकलीलाविर्भावं कुर्व्वन्नेष व्रजौकसः ॥ २२ ॥ सुपूजिताः स्तुतिं चक्रुः सूतमागधवन्दिनः ॥ श्रुतिघोषोऽभवत्तत्र
द्विजानां ब्रह्मवादिनाम् ॥ २३ ॥ दुन्दुभ्यानकतूर्य्याणां शङ्खादीनां च निस्वनैः ॥ बभूव नितरां तत्र देवमानुषचेष्टितम् ॥ २४ ॥ दिवि
देवगणा हृष्टाः कुसुमासारवर्षिणः ॥ शब्दं जयजयेत्युच्चैरप्सरोभिः समं जगुः ॥ २५ ॥ गृहकर्म्माणि नष्टानि स्वदेहानि न सस्मरुः ॥ गोपा
गोप्यश्च देवाश्च महदासीत्तदद्भुतम् ॥ २६ ॥ अहो यामाष्टपर्य्यन्तमखण्डं तत्र कीर्त्तितम् ॥ बभूव नन्दसदने मुने मोदाभिवर्द्धनम् ॥२७॥
नन्दो महामनास्तेभ्यो ददौ दानमनुत्तमम् ॥ सूतमागधवन्दिभ्यो वासोऽलङ्कारभोजनम् ॥ २८ ॥ तेनेत्थं भक्तिभावेन याचितः पूर्व्व
जन्मनि ॥ आविर्भूतः सूर्य्यवंशे भूभारमहरं मुने ॥२९॥ वैवस्वतमनोः पुत्र इक्ष्वाकुरिति विश्रुतः ॥ तस्य वंशे दिलीपोऽभूद्रघुस्तस्यात्मजः
स्मृतः ॥ ३० ॥ तत्पुत्रोऽजो दशरथस्तस्य पुत्रः किलाभवत् ॥ तस्य भार्य्यात्रयमभूत्कौशल्या कैकयी तथा ॥ ३१ ॥ सुमित्रा च तिसृणा
न्तु कैकेय्यासीन्नृपप्रिया ॥ कौशल्यायामहं जातो मदंशो भरतस्त्वभूत् ॥ ३२ ॥ कैकेय्याञ्च सुमित्रायां मदंशौ संबभूवतुः ॥ लक्ष्मणश्चैव
शत्रुघ्नः सर्व्वे राज्ञः प्रियाः सुताः ॥ ३३ ॥ रामलक्ष्मणयोः प्रेम शत्रुघ्नभरतौ तथा ॥ प्रियावास्तां विशेषेण ववृधुः पितृसम्मताः ॥ ३४ ॥ ॥२७॥
विश्वामित्रो मुनिः प्राप्तो राजानमिदमब्रवीत् ॥ राजन्मदाश्रमे यज्ञश्चारब्धो राक्षसैः खलैः ॥ ३५ ॥ क्रियते नितरां विघ्नः शमयस्व महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुज ॥ यज्ञविघ्नविनाशाय रामं प्रेषय मा चिरम् ॥ ३६ ॥ ॥ दशरथ उवाच ॥ क्लेशेन महता लब्धो वयस्यन्ते मयाधुना ॥ प्रियो मे तनयो रामस्तं कथं प्रेषये वने ॥३७॥ त्वया सार्द्धमहं गत्वा हत्वा राक्षससञ्चयम् ॥ निवार्य्य यज्ञविघ्नन्तु आगमिष्येऽचिरेण हि ॥ ३८ ॥ ॥ विश्वामित्र उवाच ॥ न त्वया मम कार्य्यं हि तथा सम्पत्स्यते नृप ॥ यथा रामेण सकलं भविष्यति न संशयः ॥ ३९ ॥ ॥ श्रीकृष्ण उवाच ॥ श्रुत्वेति वाक्यं स मुनेः प्रेषयामास राघवौ ॥ ताभ्याञ्च यज्ञविघ्नानि शमितान्यखिलानि वै ॥ ४० ॥ पुनस्तु तौ गतौ द्रष्टुं मिथिलेशस्य चाध्वरम् ॥ तत्र कृत्वा धनुर्भङ्गं लब्धा सीता वधूः शुभा ॥ ४१ ॥ रामेणान्यैश्च रघुजैः कृतोद्वाहास्ततस्तु ते ॥ सार्द्धं नृपेण नगरीमयोध्यां पुनरागताः ॥ ४२ ॥ तस्यां नृपो दशरथोऽभिषेक्तुं राममैच्छत ॥ कैकेय्योक्तं मम सुतो भवताऽत्राभिषिच्यताम् ॥ ४३ ॥ श्रुत्वेति वचनं राज्ञ्या नृपतिर्मोहमागतः ॥ पुनस्तदागतस्वान्तो विललाप पुनःपुनः ॥ ४४ ॥ कैकेयी राममानीय वनं गन्तुमुवाच ह ॥ रामो मातृवचः श्रुत्वा सीतया लक्ष्मणेन च ॥ ४५ ॥ सार्द्धं वनमितो वासं कान्तारमकरोद्भृशम् ॥ रामे गते दशरथः शोकेन प्राणमत्यजत् ॥ ४६ ॥ रामोऽप्यथ कियत्कालं त्रिकूटेऽद्रावुवास वै ॥ दण्डकारण्यमासाद्य स्थितस्तस्मिन्सुखेन च ॥ ४७ ॥ आगत्य राक्षसी सूर्पणखा स्त्री दिव्यरूपिणी ॥ वव्रे रामं तु चार्व्वङ्गी तेन क्षिप्ताथ लक्ष्मणम् ॥ ४८ ॥ गता तेनापि च भृशमवज्ञाता च राक्षसी ॥ प्राप्ता रामनियोगेन नासिकाकर्णकृन्तनम् ॥ ४९ ॥ सा गत्वा दूषणं रक्षोऽब्रवीन्निजविरूपणम् ॥ खरत्रिशिर आद्यास्ते प्रययुः सैन्यसंयुताः ॥ ५० ॥ रामेण युयुधुस्तेन हताः सर्व्वेऽपि राक्षसाः ॥ चतुर्दशसहस्रेण सैन्येन महता वृताः ॥ ५१ ॥ पुनः सूर्पणखा लङ्कां गत्वा रावणमब्रवीत् ॥ धिक्ते रक्षोधिराजत्वं धिग्बलं धिक्पराक्रमम् ॥५२॥ यन्मेऽधिकारिणो नष्टा जीवतापि न रक्षिताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वेति वाक्यं तस्याश्च गतो मारीचसन्निधिम् ॥५३॥ गत्वाऽब्धिकूले मारीचमुवाच स तु रावणः ॥ मानुषेणैव रामेण हता मम निशाचराः ॥ ५४ ॥ वने तेन सहैवास्ते भार्य्या चातीवसुन्दरी ॥ हत्वा रामं लक्ष्मणञ्च तद्भार्य्यामाहरे ततः ॥ ५५ ॥ चल त्वञ्च मया सार्द्धं मत्कार्य्यं साधयाशु भोः ॥ मारीच उवाच ॥ राक्षसाधिप मागास्त्वं विनाशं सह बान्धवैः ॥ ५६ ॥ किं राममिच्छसे हन्तुमवध्यं सर्व्वजन्तुभिः ॥ पूर्वञ्च विश्वामित्रस्य यज्ञविघ्नं करोम्यहम् ॥५७॥ गतस्तत्रैव रामेण बाणेनैकेन ताडितः ॥ ततो राम शरेणैव शुष्कपत्रमिवागतः ॥ ५८ ॥ पतितोऽब्धितटे चात्र विसंज्ञो भृशमूर्च्छितः ॥ लब्धसंज्ञः कथञ्चिद्वै लोकयन्विदिशो दिशः ॥ ५९ ॥ सर्वत्र रामं चापश्यं धनुर्ब्बाणधरं पुरः ॥ त्रस्तोऽभवं भृशं तत्र क्व यामीति व्यचिन्तयम् ॥ ६० ॥ ततःप्रभृति मे त्रासः सुमहानभवत्प्रभो ॥ कथञ्चित्प्रकृतिं प्राप्तस्तिष्ठाम्यत्र विकम्पितः ॥ ६१ ॥ ततो ब्रवीम्यहं राजन्रक्षात्मानं स्वकं कुलम् ॥ श्रुतं त्वयैव राक्षस्या यथा ते राक्षसा हताः ॥ ६२ ॥ सहस्रैः परिसंख्याता रामेणैकेन संयुगे ॥ न रामेण समः कश्चित्त्रैलोक्ये सचराचरे ॥ ६३ ॥ पुरुषोऽस्ति यतो राजन्निवृत्तो भव मे शृणु ॥६४॥ ॥ रावण उवाच ॥ जानामि रामं मारीच विश्वेश्वरमजं विभुम् ॥ भूमेर्भारावतारार्थमवतीर्णं जगद्गुरुम् ॥ ६५ ॥ तथापि मे मनो नैव स्थैर्यं याति करोमि किम् ॥ युद्धान्निवृत्तस्त्वद्वाक्यात्तत्पत्नीं हर्त्तुमाशु वै ॥ ६६ ॥ गमिष्याम्येव तत्र त्वं भूत्वाश्चर्य्यमृगो व्रज ॥ लोभयित्वाप्युभौ रामलक्ष्मणौ नय दूरतः ॥ ६७ ॥ शून्याश्रमे स्थितां सीतां हरिष्यामि न संशयः ॥ त्वं वै मम वचो नैव करिष्यसि तदा ध्रुवम् ॥ त्वां हनिष्ये न सन्देहस्ततो मत्कार्य्यमाचर ॥ ६८ ॥ श्रीभगवानुवाच ॥ श्रुत्वा रावणवाक्यं स मनसीदमचिन्तयत् ॥ रामादपि च मर्त्तव्यं मर्त्तव्यं रावणादपि ॥६९॥ उभयोर्यदि मर्त्तव्यं वरं रामो न रावणः ॥ तदहं यामि तत्पार्श्वे यद्भाव्यं तद्भविष्यति ॥७०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचार्य्येत्थं प्रचलितो भूत्वा दिव्यमृगोप्यसौ ॥ रामाश्रममनुप्राप्तस्तत्र सीतां व्यलोकयत् ॥ ७१ ॥ सीतापि राममाहेदं लक्ष्मणश्च वचो
भृशम् ॥ हत्वा मृगमिहानीय स्थाप्यताम्।ाश्रम मम ॥ ७२ ॥ ततो रामोऽब्रवीत्सीतां मायावी राक्षसो ह्ययम् ॥ स्वकार्य्यार्थेमिहायातो
निवृत्ता भव मानिनि ॥ ७३ ॥ तथापि नाग्रहं सीता तत्याज मृगदर्शने ॥ रामो लक्ष्मणमाहेदं सौमित्रे त्वमिह स्थितः ॥ ७४ ॥ रक्ष
सीतामहं यामि मृगमानेतुमोजसा ॥ रक्षो गत्वा कियद्दूरं रामवाचाऽह लक्ष्मणम् ॥ ७५ ॥ भ्रातर्मा रक्षरक्षेति राक्षसो मां निहन्ति व ॥
श्रुत्वा रामवचः सीता लक्ष्मणं प्राह गच्छतु॥७६॥भवान्भ्रातुर्हि रक्षार्थं स च सीतामुवाच ह॥को हि रामं क्षमो हन्तुं त्रैलोक्ये सचराचरे॥७७॥
तिष्ठेदानीं स्थिरा भूत्वा रामो हत्वा निशाचरम् ॥ आयास्यति ध्रुवं सीते चिन्तां कर्त्तुं हि नार्हसि ॥ ७८ ॥ श्रुत्वा सौमित्रिवाक्यं
सा तमुवाच खरं भृशम् ॥ स च क्रुद्धः प्रचलितो रामं द्रष्टुं त्वरान्वितः ॥ ७९ ॥ लब्ध्वान्तरं रावणोऽपि कृत्वा पाषण्डवेषकम् ॥
जहार सीतामारोप्य विमाने स्वपुरीं ययौ ॥ ८० ॥ रामोथ हत्वा मारीचं निवृत्तो लक्ष्मणं पथि ॥ दृष्ट्वा निर्भर्त्सयामास ततः स्वाश्रममागतः
॥८१॥ सीतामसौ च नापश्यज्ज्ञात्वा रावणकर्म्म तत् ॥ हरिभिश्च समं प्रायात्कूलं लवणवारिधेः ॥ ८२ ॥ सेतुं बबन्ध गिरिभिरानीतैर्वान
रैर्वनात् ॥ तेन सिन्धुं समुत्तीर्य्य गत्वा रावणपालिताम् ॥ ८३ ॥ लङ्कां तत्र राक्षसश्च युयुधे सह वानरैः ॥ कुम्भकर्णं रावणञ्च
हत्वान्यानपि राक्षसान् ॥ ८४ ॥ विभीषणं राक्षसानामधिपं स चकार तम् ॥ निन्ये सीतां ततो रामः प्राप्तोऽयोध्यापुरीं स्वकाम् ॥८५॥
भ्रातृभिः सहितो रेजे पूर्णचन्द्र इवानिशम् ॥ इत्थं दशरथस्याहं पुत्रो भूत्वा ददौ सुखम् ॥ ८६ ॥ तथा तवापि सन्दातुं वाञ्छितं वर
मुत्तमम् ॥ पुत्रत्वमागतस्त्वद्य दास्ये सुखमनुत्तमम् ॥ ८७ ॥ त्वत्प्रतीत्यै सर्व्वमेतदुक्तं दत्तञ्च दर्शनम् ॥ व्रजे वृन्दावने चाहं क्रीडिष्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 चिरमप्यहः ॥ ८८ ॥ नारद उवाच ॥ इत्युक्त्वा नन्दमाभाष्य तत्रैवान्तर्हितो विभुः ॥ निद्राभङ्गे तदा नन्दो मनसीदमचिन्तयत् ॥
 ॥ ८९ ॥ आश्चर्य्यमेतत्स्वप्ने मे दृष्टे रामकथाः शुभाः ॥ श्रुत्वा क्रमेण किमसौ विष्णुर्जातो ममात्मजः ॥ ९० ॥ हरिर्ब्रह्मेश्वरेन्द्रादिदेवैरपि
सुपूजितः ॥ स कथं पुत्रतामद्य ममायातस्त्रिलोकपः ॥ ९१ ॥ वत्सो मे एष जातश्च मम भाग्यश्च उत्तमम् ॥ कृतार्थों हं न सन्देहो यद्वि
ष्णुर्मे सुतोऽभवत् ॥ कोन्यो धन्यतरो मत्तः त्रिषु लोकेषु वर्त्तते ॥ ९२ ॥ इत्थं नन्दः स्वप्नदृष्टं विचिन्त्य रात्रेः शेषं जागरेणैव नीत्वा ॥
प्रातर्हृष्टो गोपगोपीषु चोक्त्वा ददौ दानं श्रद्धया स द्विजेभ्यः ॥ ९३ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनक
संवादे कृष्णजन्मानुकीर्त्तने नन्दद्दृष्टस्वप्नवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ नारद उवाच ॥ एवं दिनेष्वतीतेषु दशस्वपि महासुरः ॥
कंसः स्वप्नं व्रजे गन्तुं दृष्ट्वा प्राह बकानुजाम् ॥ १ ॥ पूतने त्वं सदैवास्मत्प्रियं कर्त्तुं चिकीर्षसि ॥ अद्य स्वप्ने मया दृष्टो बालकः कालरूप
वान् ॥ २ ॥ तेन चोक्तमिदं भद्र हनिष्ये त्वां न संशयः ॥ वर्षे चैकादशे प्राप्ते मूढ तिष्ठाम्यहं व्रजे ॥ ३ ॥ स्वप्नवार्त्ता हि मिथ्यैव
कदाचित्सत्यतां व्रजेत् ॥ अतस्त्वया ह्यनुष्ठेयं व्रजे बालविहिंसनम् ॥ ४ ॥ त्वद्दृष्टिपथमायाता नहि जीवन्ति बालकाः ॥ तत्र जीवति
कश्चिच्चेत्स हन्तव्यः प्रयत्नतः ॥ ५ ॥ बलेनच्छलरोषेण हन्तव्यो निश्चयेन च ॥ धर्म्मोऽस्ति न हि दोषोऽयं मम चाज्ञामुरीकुरु ॥ ६ ॥
अतो गत्वा व्रजे बाला निहन्तव्या न संशयः ॥ तुभ्यं दास्यामि रत्नानि राजभोग्गमनुत्तमम् ॥ ७ ॥ इति श्रुत्वा वचः प्राह पूतना
बालघातिनी ॥ कंसमाभाष्य देवारिमघोमुखविशङ्किता ॥ ८ ॥ दुर्निमित्तानि दृष्टानि रात्रौ स्वप्ने मया नृप ॥ कथयामि शृणुष्व त्वं करिष्ये
वचनं तव ॥ ९ ॥ स्तनप्रदेशपीडा मे अकस्मादुत्थिता नृप ॥ प्रेतैरालिङ्गिता नग्ना जपाकुसुममालिनी ॥ तैलाभ्यक्ता दक्षिणाशां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रजन्ती मुक्तमूर्द्धजा ॥ १० ॥ मम क्रोडस्थितः कश्चिद्बालो मे पीतवान्स्तनम् ॥ निपीडिताऽहं नृपते पतिता गतजीविका ॥११॥ उत्थिता नृप गायन्ती हसन्ती नृत्यती भृशम् ॥ धावन्ती पतिता कूपे परिश्रान्तासृगासवम् ॥ १२ ॥ प्रपिबन्ती निमग्ना च शैलाग्रपतिता भुवि ॥ भयाद्विगतनिद्राहं शोचन्ती पुनरुत्थिता ॥१३॥ क्षणमात्रं न सुप्ता च स्वप्नदृष्टार्थशङ्कया ॥ इति श्रुत्वा वचस्तस्याः कंसो वचनमब्रवीत् ॥ ॥१४॥ कंस उवाच ॥ कैतवे ते भयं नास्ति देवैश्च किमु मानुषात् ॥ तत्रापि बालकेभ्यस्ते मरणं भविता नहि ॥१५॥ नहि स्वप्नगतं किञ्चित्सत्यं भवितुमर्हति ॥ स्वप्ने दृष्टान्यरिष्टानि वसुदेवसुतो भवेत् ॥ १६ ॥ तेनैवात्मवधश्चैव दृष्ट्वा भीतस्त्वुत्थितः ॥ गतोऽहमाकुलतरो वसुदेवनिकेतनम् ॥१७॥ तत्र दृष्टा मया कन्या देवक्याङ्कगता हि सा ॥ बलाद्गृहीत्वा तां बालां शिलायामक्षिपं तदा ॥१८॥ तावदुत्पत्य मद्धस्ताद्गत्वाकाशतलेऽब्रवीत् ॥ किं मया हतया मन्द स जातः कुत्र ते रिपुः ॥ १९ ॥ त्वां हनिष्यत्यवश्यं स नात्र कार्य्या विचारणा ॥ श्रुत्वेत्थं वचनं तस्या ह्यभवद्विपुलं भयम् ॥ २० ॥ अचिन्त्यरूपमेवान्ते रात्रौ स्वप्ने विलोकितम् ॥ यथा तथोक्तं कैतव्ये तत्कार्य्यं त्वं ततः कुरु ॥ २१ ॥ मम स्वप्नः सत्य इव प्रतिभाति न चान्यथा ॥ बालः कालस्वरूपेण दृष्टस्ते कथितं मया ॥ २२ ॥ मम पत्न्याः प्रिया घोरा कैतवी राक्षसी मता ॥ तस्याः पुत्री पूतना त्वं जाता लोकभयङ्करी ॥ २३ ॥ त्वयि मे त्वतिविश्वासः कार्य्यगौरवसाधने ॥ अतो गच्छस्व घोषे वै मम कार्य्यपरायणा ॥ २४ ॥ पूतनोवाच ॥ भगिनी मे महाराज ख्याता नाम्ना वृकोदरी ॥ सा बुद्धिबलसंयुक्ता तां दृष्ट्वा गम्यते मया ॥ २५ ॥ अहं व्रजं गमिष्यामि भाव्यं यद्भवति ध्रुवम् ॥ इत्युक्त्वा पूतना कंसं जगाम भगिनीं प्रति ॥ २६ ॥ पप्रच्छ तां व्रजं यामि बालकाघातहेतवे ॥ अद्य स्वप्नेऽशुभो दृष्टः कंसो मां प्रेषयत्युत ॥ २७ ॥ किं करोमि वदाशु त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचार्य्य भगिनी मम ॥ श्रुत्वेत्थं पूतनावाक्यं वच आह वृकोदरी ॥२८॥ कंसोऽब्रवीत्तदाज्ञा वै पालनीया प्रयत्नतः ॥ अस्माकं कैतवं धर्मः कैतवख्यातिमाश्रिताः ॥ २९ ॥ विचरामः परद्रोहे कृतयत्नाः सदैव हि ॥ इह लोके कदाचिद्वै नास्माकं भयमण्वपि ॥ ३० ॥ विधाय वेषं सुस्त्रीणां व्रजं गच्छस्व सत्वरम् ॥ स्तनौ गरलसंलिप्तौ कृत्वा मारय बालकान् ॥ ३१ ॥ आग्रहेण परं कार्य्यं कर्त्तव्यं सकलं हि ते ॥ कंसे प्रीते पश्य सर्व्वाः प्रीताः स्युर्नात्र संशयः ॥ ३२ ॥ भगिन्युदितमाकर्ण्य पूतना पुनराययौ ॥ कंसं कंसानुजानीहि वीटकं मे प्रयच्छ वै ॥ ३३ ॥ हत्वा व्रजशिशूनद्य आगमिष्याम्यहं पुनः ॥ घटोदरो मम पतिः खेलितुं निर्गतो बहिः ॥ ३४ ॥ क्रीडित्वा यावदायाति तावदागमनं मम ॥ इति श्रुत्वा वचः कंसो ददौ तस्यै सुवीटकम् ॥ ३५ ॥ बहुमानेन संहृष्टः प्रेषयामास गोकुलम् ॥ यदा प्रचलिता योषा पूतना बालघातिनी ॥३६॥ अरिष्टमभवच्चास्या दक्षिणाङ्गे च वेपथुः ॥ काचित्संमुखमागत्य पूतनाया न्यवेदयत् ॥३७॥ पतिता व्यग्रहृदया रुदती मुक्तमूर्द्धजा ॥ श्रुत्वाऽथ पतिताऽशं सा पपात धारिणीतले ॥ ३८ ॥ सुमूर्च्छ चेष्टामापन्ना रुरोद च भृशं ततः ॥ उत्थिता चलिता दृष्टा स्खलिता पतिताऽभवत् ॥ ३९ ॥ विवस्त्रा शोकमूढा च दीना मुक्तशिरोरुहा ॥ रुदत्येव व्रजं गन्तुं नाशकद्दुःखसंप्लुता ॥ ४० ॥ नो लङ्घनीया राजाज्ञा चेति ह्रा सा गता त्वरा ॥ अगणय्य च दुःखानि प्रातासीद्व्रजसन्निधिम् ॥ ४१ ॥ विधाय रूपं परमं घोषलोकविमोहनम् ॥ विलोक्य पूतनारूपं मुमुहुस्ते व्रजौकसः ॥ ४२ ॥ मनो हरन्ती सर्व्वेषां विशन्ती निजमन्दिरम् ॥ न वारिता सा केनापि मन्यमानेन तां रमाम् ॥ ४३ ॥ स्वभाग्यमभिलङ्घ्याशु स्वगृहे सा प्रवेशिता ॥ रोहिणी च यशोदा च तस्या रूपप्रधर्षिते ॥ ४४ ॥ विमोहिते तदा तान्तु न वै वारयितुं क्षमे ॥ इति संमोहिताः सर्व्वे वीक्षमाणा व्रजौकसः ॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूतना बालरूपं मां मीलताक्षन्तु कैतवैः ॥ अबुद्धा मद्वलं मूढा जगृहे सान्तकं तथा ॥ ४६ ॥ विमोहकैस्तदा वाक्यै रुदन्तं माम थाऽब्रवीत् ॥ त्वं मे प्राणधनं बाल तव माताऽस्मि साम्प्रतम् ॥ ४७ ॥ इत्युक्त्वा गरलालिप्तं स्तनं मम मुखे ददौ ॥ यदाहं न पिबाम्यंग वक्षस्यारोप्य पालित ॥ ४८ ॥ मातुर्वाक्यमिवोक्त्वा च तदा सन्तोषितोस्म्यहम् ॥ जन्मकोटिकृतं कर्म्म तस्म्याः क्षीणमभूत्क्षणात् ॥ ४९ ॥ स्तनौ तस्याः कराभ्याञ्च समाकृष्यापिबं पयः ॥ महापापनिमग्ना सा मुक्तासून्मत्प्रसंगतः ॥ ५० ॥ विहाय कैतवं रूपं निजरूपं समागता ॥ तेषां व्यापकदेहेन महदासीत्तदद्भुतम् ॥ ५१ ॥ वर्द्धयित्वा निजं देहं महाशब्दमचीकरत् ॥ निपपात धरायाञ्च मृताऽभूदचिरेण सा ॥ ५२ ॥ तस्या देहेन पतता त्रिगव्यूतिद्रुमा लताः ॥ पतितास्तत्स्वनेनापि पूरिताश्च दिशो दश ॥५३॥ तस्यां निपतमानायां भीतास्तेऽति व्रजौकसः ॥ खवित्रस्तहृदया निपेतुर्धरणीतले ॥ ५४ ॥ विकीर्य्य केशांश्चरणौ निक्षिपन्ती भुजावपि ॥ खिन्नगात्रा तथा सौम्य मुमोह च ममार सा ॥ ५५ ॥ ततो व्रजौकसो भीताः समुत्थाय चिरेण तु ॥ ददृशुः पतितं देहं तस्याश्चातीवभीषणम् ॥ ५६ ॥ सर्व्वेऽभिज ग्मुस्तं द्रष्टुं मुखं कन्दरसन्निभम् ॥ फालदन्तसमाकीर्णगिरिशृंगोच्चनासिकम् ॥ ५७ ॥ अन्धकूपगभीराक्षं वापीवत्कर्णयुग्मकम् ॥ शैल गण्डस्तनं बाहुयुगं सेतुमिव स्थितम् ॥ ५८ ॥ आततताम्रकेशान्तं संत्रासावहमेव च ॥ शुष्कसरोवदुदरमुरुद्वयाशिलोच्चयम् ॥ ५९ ॥ विलोक्य देहं त्रेसुस्ते मुमुहुस्तत्र दारुणम् ॥ पूर्व्वं तस्याः स्वनेनैव भिन्नहृत्कर्णमस्तकाः ॥ ६० ॥ चिरं संज्ञामवापुस्ते गोपा गोप्यः सुवि स्मिताः ॥ तस्या उरस्स्थितं मान्तु जगृहुर्गोपिकाद्दताः ॥ ६१ ॥ आदाय दद्युर्मां मात्रे मृतं पुनरिवागतम् ॥ कुशलावयवं दृष्ट्वा मातुर्मोदोऽ भवन्मुने ॥ ६२ ॥ अथ गोप्यः समागत्य रक्षां मे चक्रुरद्भुताम् ॥ गवां रजोभिरुद्धृत्य गोमूत्रैः स्नानकर्म्म च ॥ ६३ ॥ गोपुच्छैर्भ्रामयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाथ सुजलैः स्नापयन्पुनः ॥ संस्नाताः प्रयताश्चैव न्यासं चक्रुरतन्द्रिताः ॥ ६४ ॥ आत्मनोंगेषु पूर्व्वं तां रक्षां कृत्वा तु मेंगके
न्यासं चक्रुर्विधानेन प्रसिद्धैर्विष्णुनामभिः ॥ ६५ ॥ पादौ तु पातु विश्वात्मा अजो विष्णुश्च जानुनी ॥ ओष्ठौ नरकजित्पातु घ्राणं सौमि
त्रिवत्सलः ॥ ६६ ॥ नेत्रे देवेश्वरः पातु भालं भुवनपालकः ॥ केशवः केशवृन्दश्च कृष्णः सर्व्वत्र रक्षतु ॥ ६७ ॥ डाकिनीशाकिनीभूत
प्रेतमातृगणाश्च ये ॥ तावत्ते पान्तु देहं वै ततः सर्व्वे समेत्य च॥ ६८ ॥पूतनायाः शरीरञ्च छित्त्वा छित्त्वासुदूरतः॥ क्षिप्त्वा काष्ठैश्च संवेष्ट्य
दाहयाञ्चक्रुरञ्जसा ॥ ६९ ॥ दह्यमानस्य देहस्य धूमोऽभूदतिसौरभः ॥ कृष्णागुरोरपि महान्कृष्णांगस्पर्शकारणात् ॥ ७० ॥ न तन्मुक्तौ
भ्रमः कार्य्यः पापराशेरपि ध्रुवम् ॥ मदंगस्पर्शयोगेन किं भवेन्नहि भूतले ॥ ७१ ॥ अन्तर्म्मनसि मां ये च चिन्तयेयुः सकृन्मुदा ॥ तेषां
मुक्तिर्भवेदेव किं पुनर्म्मेंगसंगतः ॥ ७२ ॥ अहं वै परमं ब्रह्म सर्व्वव्यापि सनातनम् ॥ यजनाद्ध्यानतो मह्यं सद्यो मुक्तिर्भवेद्ध्रुवम् ॥७३॥
आत्माहं परमात्मा च अहं धर्म्मश्च शाश्वतः ॥ अहं सत्यमहं ज्ञानं शाश्वताऽनन्तसौख्ययुक् ॥ ७४ ॥ मच्चिन्तनान्मद्यजनान्मम साधन
तस्तथा ॥ जपनाल्लपनात्सौम्य सर्व्वसिद्धिर्विनिश्चिता ॥ ७५ ॥ मदंगस्पर्शयोगेन किं न सिद्धिर्भविष्यति ॥ ७६ ॥ नारद
उवाच ॥ देवदेव व्रजेशाद्य श्रुतं ते वचनं महत् ॥ अहन्ते सततं भृत्यस्त्वं मे नाथश्चिरं ततः ॥ ७७ ॥ इति विश्वासभावेन ततः पृच्छामि
तेऽनघ ॥ किं पुण्यं पूर्व्वमस्यास्तु पूतनाया बभूव ह ॥ ७८ ॥ तवांगस्पर्शनं लोके योगीशात्यन्तदुर्ल्लभम् ॥ तपस्विनस्तपो घोरं कृत्वा
पि परमर्षयः ॥ कथञ्चिदपि न प्राप्तास्तवांगस्पर्शनं महत् ॥ ७९ ॥ ईषद्विस्मयमानोऽहं श्रुत्वा तस्यास्तु सद्गतिम् ॥ ८० ॥ पृच्छामि

१ अडभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वां कृपासिन्धो संशयं छेत्तुमर्हसि ॥ ८१ ॥ ॥ श्रीकृष्ण उवाच ॥ साधु पृष्टं त्वया विप्र लोकान्साध्वनुगृह्णता ॥ कथयामि मुनि श्रेष्ठ पूतनापूर्व्वसम्भवम् ॥ ८२ ॥ यत्रासीत्सा यच्च कर्म्माकरोद्वै यस्मादाप प्राणिहिंसामवश्यम् ॥ सर्व्वं तुभ्यं विस्तरेण ब्रवीमि श्रोतुं श्रद्धा विद्यते चेत्तवात्र ॥ ८३ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे पूतनावधो नाम सप्तदशोऽध्यायः ॥१७॥ श्रीकृष्ण उवाच ॥ पुरा सरस्वतीतीरे वसति स्म द्विजोत्तमः ॥ कक्षीवान्परमब्रह्म ध्याता विष्णुपरायणः ॥ १ ॥ जितेन्द्रियो जितश्वासस्त पस्तेपे सुदुष्करम् ॥ अधश्शिरा ऊर्द्धपादः समुत्साहमना भृशम् ॥ २ ॥ तस्यैवं तप्यमानस्य तपसा भूरितेजसः ॥ तदाश्रममनुप्राप्तः काल भीरुर्महातपाः ॥ ३ ॥ सपत्नीकः सुतां रम्यां समादाय स्वयंवराम् ॥ नाम्ना चारुमतीं बालां सर्व्वाभरणभूषिताम् ॥ ४ ॥ तं समायान्त मालोक्य कक्षीवान्द्विजसत्तमः ॥ समुत्थायासनात्तूर्णं विधिना समपूजयत् ॥ ५ ॥ तां विलोक्य मुनेः कन्यां चकमेऽतिमनोहराम् ॥ सापि तञ्चकमे स्त्रीणां मनोनयननन्दनम् ॥ ६ ॥ समीक्ष्य कालभीरुश्च सुतायास्तं मनोरथम् ॥ ददौ तस्मै गुणाढ्याय कन्यां कक्षीवश र्म्मणे ॥ ७ ॥ दत्त्वा सम्यग्विवाहे तु कन्यां कमललोचनाम् ॥ तमुवाच महाभागः कालभीरुः प्रहर्षितः ॥ ८ ॥ ॥ कालभीरुरु वाच ॥ मुने कन्यापरित्यागः कर्त्तव्यो न कदाचन ॥ परत्र भीतैः पुरुषैरिति प्रोक्तं महर्षिभिः ॥ ९ ॥ देवविप्राग्निसान्निध्ये परिणीता हि कन्यका ॥ ज्ञातिदत्ता मन्त्रपूर्व्वं न त्याज्या सा कदाचन ॥ १० ॥ ॥ कक्षीवानुवाच ॥ सत्यं त्याज्या न कुलजा देवविप्राग्निस न्निधौ ॥ परिणीता यदा गृह्यश्रुत्युक्तैः संमता भवेत् ॥ ११ ॥ पतिव्रता गुणगणैरुपेता ह्यनुरागिणी ॥ सुशीला सत्यसंयुक्ता गृहका र्य्यपरायणा ॥ १२ ॥ पतिव्रता बन्धुयुक्ता आगतेष्वतिथिष्वपि ॥ अत्यादरपरा नित्यं न त्याज्या कुलजा वधूः ॥ १३ ॥ पतिधर्म्मरता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या च अविमुक्तकरा शुभा ॥ मिष्टवागनसूया च क्रोधेर्ष्यामानवर्जिता ॥ १४ ॥ कठोरवाक्या निद्रालुः पतिदूषणवादिनी ॥ रता परगृह
द्वारि त्याज्यैवेत्थंविधा वधूः ॥ १५ ॥ हीनजातिरता नारी पथि चान्यनिरीक्षिणी ॥ आत्मलावण्यनिरता संत्याज्येत्थंविधा वधूः ॥१६॥
श्रीकृष्ण उवाच ॥ इत्युक्ता तं मुनिर्विप्रः सन्तोषवचनैः शुभैः ॥ कन्यायास्तु करं तत्र जगृहे विधिपूर्वकम् ॥ १७ ॥ कालभीरुरथो कन्यां
दत्त्वा कक्षीवते ततः ॥ सपत्नीकः समायातः स्वाश्रमं मुदितो भृशम् ॥ १८ ॥ प्रस्थिते पितरि प्राह पतिधर्म्मपरायणा ॥ विश्वेशो हरि
रेवैकः सेव्यः सर्व्वजनैरिह ॥ १९ ॥ आवयोः समयो नूनं तत्सेवोपयिकः प्रभो ॥ पत्नीपरिग्रहो नूनं पतीनां नरकाय च ॥ २० ॥
यदि कृष्णो न मनसि धृतो विषयलम्पटैः ॥ एवं प्रबोधितः पत्न्या ततः प्रारभ्य शक्तिमान् ॥ २१ ॥ अभूत्कर्म्म परित्यज्य आत्मनो
बन्धमुक्तये ॥ न पिबत्यम्बुमात्रं हि विना विष्णुसमार्पितम् ॥ २२ ॥ हरिं त्रैलोक्यनाथं हि प्रत्यहं तोषयत्यलम् ॥ एवं गच्छति
काले तु भजतोरुभयोरपि ॥ २३ ॥ नित्यं हि कृष्णपदयोः प्रीतिरासीन्निरन्तरम् ॥ स्वयं वक्ति कथां विष्णोः प्रीत्या चैव शृणोति सः
॥ २४ ॥ सेवते च सदा विष्णुं पादसेवां करोति च ॥ अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २५ ॥ इत्थं नवविधां भक्तिं
कुर्व्वन्ननुदिनं द्विजः ॥ नयत्यहोरात्रयामान्स्त्रिया सह सदैव हि ॥ २६ ॥ भजतोरथ दम्पत्योः सन्तुष्टोऽहं मुनीश्वर ॥ कदाचित्तीर्थ
यात्रार्थं द्विजो गेहाद्विनिःसृतः ॥ २७ ॥ उपादिशत्प्रियां भार्य्यां पातिव्रत्येन रागिणीम् ॥ न कार्य्यो देहसंस्कारो विना मुद्रानुधार
णम् ॥ २८ ॥ भूषणानि न धार्य्याणि तुलसीमाल्यमन्तरा ॥ भोग्यानि नित्यं त्याज्यानि विना विष्णुनिवेदितम् ॥ २९ ॥ स्मर्त्तव्यो
भगवान्विष्णुर्न विस्मर्त्तव्य एव हि ॥ परगेहे न गन्तव्यं विना बन्धुनिमित्तकम् ॥ ३० ॥ पुंभिर्नाऽऽस्यं न वक्तव्यं विना नन्दमहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सवम् ॥ नृत्यगीतोत्सवं द्रष्टुं न गमः परवेश्मनि ॥ विना पर्व्वोत्सवं विष्णोस्तथा देवालयोत्सवम् ॥ ३१ ॥ परनिन्दा न कर्त्तव्या विना विष्णुविरोधिनः ॥ ३२ ॥ नातिथिर्विमुखः कार्य्यो विना देवनयाचकम् ॥ स्वगेहे स्थितया कार्य्यं मनः श्रीकृष्णपादयोः ॥ ३३ ॥ कालो नेयो वृथा नैव विना श्रीकृष्णसेवया ॥ एवमादिश्य भार्य्यां स्वां नाम्ना चारुमतीं तदा ॥ ३४ ॥ कक्षीवांस्तीर्थयात्रायै निर्जगाम गृहादपि ॥ साऽकरोत्तानि कर्म्माणि यथोदिष्टं महात्मना ॥ ३५ ॥ कदाचिद्धरिसेवार्थं फलपुष्पार्थिनी गता ॥ कानने स्वाश्रमप्रान्ते पातिव्रत्यपरायणा ॥ ३६ ॥ चिरादादाय पुष्पाणि परावृत्ता गृहं प्रति ॥ आगच्छन्ती गृहं साध्वी ददर्शागतमन्तिके ॥ ३७ ॥ कामिनं कञ्चिदायान्तं शूद्रं सह भुजिष्यया ॥ स दृष्ट्वा तां महापापी अकामामप्यकामयत् ॥ ३८ ॥ आगत्य सम्मुखं तस्यास्तां बालां समबोधयत् ॥ बहुधा मोहकैर्वाक्यैर्भ्रान्तिमेवालपच्छठः ॥ ३९ ॥ तानि वाक्यानि जानीहि तेनोक्तानि शृणुष्व मे ॥ देहिनो देहयोगेन विषयाः खलु सौख्यदाः ॥ ४० ॥ आब्रह्मकीटपर्य्यन्तं विषयेऽभिरतं सदा ॥ अज्ञा अन्यद्वदन्त्यत्र कुर्व्वन्तो यत्नसञ्चयम् ॥ ४१ ॥ देहान्ते मुक्तिकामास्ते मुक्तिं नैव समागताः ॥ नैवापुर्मुनयो मुक्तिं वृथा कष्टं समाश्रिताः ॥ ४२ ॥ तस्मान्न कार्य्यं देहस्य कदनं भोगभागिनः ॥ ततोऽनेकविधैर्भावैर्भजन्तं मां भजस्व च ॥ ४३ ॥ जीवितस्य फलं भोगो न भोगो दम्पती विना ॥ पतिं विनाऽतिक्लेशेन कालो यातिं मुधाऽबले ॥ ४४ ॥ किं क्लिष्टेन शरीरेण कोमलाङ्गि फलेच्छया ॥ दृश्यते परमं रूपं वयश्चापि मनोहरम् ॥ ४५ ॥ न यथा ते वृथा यातु तथा कुरु नितम्बिनि ॥ ४६ ॥ यत्साधारणदेहोऽयं मनुष्यस्याबुधैः कृतः ॥ वर्णभेदो हि तत्रापि जातिवृत्तादिकं वृथा ॥ पूज्यते विषयस्तावद्देहस्यैव च धारणे ॥ ४७ ॥ नष्टे देहे क्व विषयः क्व स्वर्गो मुक्तिरेव वा ॥ अतो मया सह शुभे भोगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्भुङ्क्ष्व मनोरमान् ॥ ४८ ॥ इत्यादिभिस्तस्य वाक्यैर्मूढा मूढत्वमागता ॥ न शशाक मनो धर्त्तुं कामस्य वशमागतम् ॥ ४९ ॥ मनो दुष्टं चञ्चलञ्च सङ्गाच्च परिवर्त्तते ॥ सत्सङ्गात्साधुतामेति दुस्संगाद्याति दुष्टताम् ॥ ५० ॥ दुष्टसंगो न कर्त्तव्यः आत्मनः श्रेय इच्छता ॥ सतां संगाद्धि मनुजो लोकद्वयसुखं व्रजेत् ॥ ५१ ॥ सा तस्य संगाद्दुष्टस्य दुष्टा स्वल्पादिनैरभूत् ॥ चिरं समागतस्तस्याः पतिस्तीर्थान्तरं गतः ॥ ५२ ॥ नाऽपश्यत्तां तथाभूतामपूर्वामतिकामुकीम् ॥ चलचित्तां पररतां गृहकार्य्याविधायिनीम् ॥ ५३ ॥ तथाप्यसौ द्विजो दुष्टां वनितां संन्यवारयत् ॥ तर्जनैः सान्त्ववचनैर्यदा तस्या मनोऽन्यथा ॥ ५४ ॥ कर्त्तुं न शक्तः कक्षीवान्क्षुब्धचित्तः शशाप ताम् ॥ प्रयातु राक्षसीं योनिं दुष्टे दुष्टप्रदूषिता ॥ ५५ ॥ त्वं वञ्चयित्वा मां नित्यं यदभूः कितवे रता ॥ पापकर्म्माणि कुर्वाणां दुष्टां लोकाहितैषिणीम् ॥ ५६ ॥ कदाचित्करुणासिन्धुः कृष्णः सन्तारयिष्यति ॥ निजभक्तिप्रभावेण भक्ता नो यान्ति दुर्गतिम् ॥ ५७ ॥ सख्यं कथञ्चिद्विष्णोस्त्वमकरोः सेवनं यतः ॥ ततो न सन्तु नरका नोचितं तव वर्त्तते ॥ ५८ ॥ इत्थं ब्राह्मणशापेन पूतना साऽभवन्मुने ॥ एतत्तेऽभिहितं सर्व्वं किमन्यच्छ्रोतुमिच्छसि ॥ ५९ ॥ नारद उवाच ॥ कृष्ण तस्यास्तु दुष्टायास्त्वया स्पर्शः कथं कृतः ॥ न तदेयं विशुद्धा किं स्तनं तस्याः पपौ भवान् ॥ ६० ॥ ॥ श्रीकृष्ण उवाच ॥ च्यवनः स्वाश्रमे पूर्व्वं तपसा गतकल्मषः ॥ मनो दधौ चात्मना तु सर्वात्मन्यखिलेश्वरे ॥ ६१ ॥ चिरमेवं प्रतपति मुनौ शान्तिमुपेयुषि ॥ जग्धुमारेभिरे दैत्याः पातालतलवासिनः ॥ ६२ ॥ च्यवनो ब्रह्म निर्व्वाणपरमं सुखमाश्रितः ॥ श्रुत्वा वचः समुत्तस्थौ छिन्धिभिन्धीतिवादिनाम् ॥ ६३ ॥ चुकोप दृष्ट्वा तान्दैत्यान्स्वान्तनुं च व्यलोकयत् ॥ अथ तस्य ततो देवाः समुत्पन्नास्त्वरान्विताः ॥ असुरांस्तान्निहन्युश्च षष्टिसाहस्रसंमितान् ॥ ६४ ॥ बद्धाञ्जलिसुराः प्रोचुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निहतेष्वसुरेष्वपि ॥ मुने ते किंकराः सर्व्वे किं कुर्म्मस्त्वं वदाशु नः ॥६५॥ च्यवन उवाच ॥प्रयात गिरिशं देवमुपधावत सर्व्वशः ॥ प्रणम्य परया भक्त्या ध्यानोपरतमीश्वरम् ॥६६॥ ते तथोक्तास्तत्र जग्मुर्ददृशुः शिवमव्ययम्॥ध्यानसंस्थं तदंके च पार्व्वतीं वीक्ष्य विस्मिताः ॥६७॥ जहसुश्च परं रूपं दृष्ट्वा कामविमोहिताः ॥ ततस्ते संस्मरुर्देवा निन्दां चक्रुर्मनस्सु च ॥ ६८ ॥ धिङ् मनो नः परं शत्रुभूतं धिक्छतशस्तथा ॥ दृष्ट्वा परस्त्रियं मोहं नाप्नुवन्ति महाबलाः ॥ ६९ ॥ परस्त्रीस्मरणे पापं किं पुनर्दर्शनादिषु ॥ अतः प्रसादयिष्यामः शिवं सर्वसुरेश्वरम् ॥ ॥ ७० ॥ यदा ध्यानावसाने तु बहिर्दृष्टिर्भविष्यति ॥ एवं ते चिरमातस्थुर्वीक्षन्तो ध्यानमोचनम् ॥ ७१ ॥ वर्षाणामयुते जाते महेशो ध्यानमत्यजत् ॥ अपश्यत्पार्व्वतीं शुद्धां ततस्ते तं व्यजिज्ञपन् ॥ ७२ ॥ बद्धाञ्जलिपुटाः सर्व्वे अपराधं यथाकृतम् ॥ समागता महादेव वयं ते दर्शनार्थिनः ॥ ७३ ॥ च्यवनाङ्गसमुद्भूता आगतास्तन्निदेशतः ॥ चिरं स्थिता दैववशात्पार्व्वतीरूपमोहिताः ॥ ७४ ॥ मुहूर्त्तमात्रं दुर्बुद्धिवशात्कामवशङ्गताः ॥ विप्रियं तेन पापेन समुद्धर्त्तुन्त्वमर्हसि ॥ यथा नैवं पुनः कर्म्म कुर्म्मो दण्डो विधीयताम् ॥ ७५ ॥ इति श्रुत्वा महादेवस्तुष्टस्तानिदमब्रवीत् ॥ भविष्यथ कृशानोस्तु पुत्रा यूयं महौजसः ॥ ७६ ॥ अग्निदशाः स्तनादानैः पूतनाया मरिष्यथ॥ कंसप्रणोदिता सा तु राक्षसी नन्दगोकुलम् ॥ ७७ ॥ यदा यास्यति हन्तुं वै कृष्णं लिप्त्वा स्तने विषम् ॥ अङ्के कृत्वा हरिं घोरा स्तन्यं यत्पाययिष्यति ॥ ७८ ॥ भवत्पीतावशिष्टन्तद्भगवान्पास्यति स्तनम् ॥ पीडयित्वा सह प्राणैस्तदा मुक्तिमवाप्स्यथ ॥ ७९ ॥ ॥ श्रीकृष्ण उवाच ॥ इति रुद्रवचः सत्यं कर्त्तुं तस्याः पपौ स्तनम् ॥ न कर्म्मबन्धनं पाशं छेत्तुमर्हति कश्चन ॥ ८० ॥ ॥ नारद उवाच ॥ यदा ते निहताऽऽसाध्वी पूतना बालघातिनी ॥ तदा नन्दोऽभवत्कुत्र ब्रजे वान्यत्र वा गतः ॥ ८१ ॥ एतन्मे ब्रूहि विश्वेश परं कौतूहलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम ॥ तृप्तिर्न जायते श्रुत्वा कथान्ते कलिनाशिनीम् ॥ ८२ ॥ अमृतं जायते यत्र तापशान्तिश्च मानसी ॥ स्वर्गापवर्गयोर्द्वारं द्वारं वै मोक्षभोगयोः ॥ ८३ ॥ श्रीकृष्ण उवाच ॥ मम जन्मदिने विप्र कृत्वा जन्मोत्सवं पिता ॥ दिनाष्टासु व्यतीतेषु गोपैः कतिपयैर्वृतः ॥ ८४ ॥ वार्षिकं भोजराजीयकरं दातुं पुरीं गतः ॥ तद्रात्रौ तृषितः श्रान्तो विश्रान्तः प्रातरेव हि ॥ ८५ ॥ गत्वा सज्ञो गृहन्तत्र नत्वा राज्ञे करं ददौ ॥ दत्त्वा तस्याधिकारिभ्य आजगामावमोचनम् ॥ ८६ ॥ श्रुत्वा शौरिस्तमायातं नन्दं सुहृदमात्मनः ॥ राज्ञे दत्तकरं ज्ञात्वा ययौ तद्दर्शनोत्सुकः ॥ ८७ ॥ ततो विलोक्य तं नन्दः शौरिं तत्र समागतम् ॥ उत्थाय संभ्रमेणाशु सहजप्रेमविह्वलः ॥ ८८ ॥ चिरं विमुच्य हृदयादुपवेश्य वरासने॥ वसुदेवमुवाचेदं किं पृच्छे दर्शनं तव ॥ ८९ ॥ जीवसीत्यद्भुतं जातं कंसे जीवति निश्चितम् ॥ बहवो निहता येन शिशवः पावकोपमाः ॥ ९० ॥ अवशिष्टा सुता चैका सापि तेन निपातिता ॥ तथाप्यदृष्टमाश्रित्य सुखं दुःखं न चाऽन्यथा ॥ ९१ ॥ दैवेऽनुकूले भवति सन्ततिः सुहृदां वर ॥ प्रतिकूले तथा दैवे सा नाशं व्रजति ध्रुवम् ॥ ९२ ॥ वसुदेव विदां बुद्धिर्न मोहाय हि कल्पते ॥ तत्र दैवमिति ज्ञात्वा न च शोचितुमर्हसि ॥ ईश्वरेण कृतं यत्तदुद्भवत्येव नान्यथा ॥ ९३ ॥ एवं श्रुत्वा नन्दवाक्यं तदानीं शौरिश्चैवं लब्धबुद्धिप्रसादः ॥ त्यक्त्वा शोकं मोहभारं तथैव यथागतं प्रस्थितो भावितात्मा ॥ ९४ ॥ याचकेभ्यो खिलेभ्यश्च व्रजेभूत्परमोत्सवः ॥ निहत्यैवं बकीं दुष्टां मुनेऽहं व्रजमास्थितः ॥ ९५ ॥ सुखयन्बालरूपेण तत्र सर्व्वान्व्रजौकसः ॥ कंसोऽपि लोके शुश्राव मृता घोरा व्रजे बकी ॥ ९६ ॥ स्तनौ गरलसंलिप्तौ दत्त्वा बालाय गर्व्विता ॥ स्वयं मृतेति कंसो वै मेने नान्येन हेतुना ॥ ९७ ॥ विक्रिया गरलस्यैव प्रवृत्ता मरणाय हि ॥ तयैवोक्तो यतः स्वप्नः सद्यो मरणसूचकः ॥ ९८ ॥ एवं वितर्कयन्तं तमाजगाम वृकोदरी ॥ ९९ ॥ वृकोदर्य्युवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृता मे भगिनी कंस तव कार्य्यार्थ सा गता ॥ किं जीवितेन तन्मेऽद्य गोपैरल्पैर्निपातिता ॥ १०० ॥ धिक्ते जन्म वृथा मानं तवैश्वर्य्यं पराक्रमम् ॥ त्वयि जीवति मे कान्ता भगिनी निहता व्रजे ॥१०१॥ अहो शृगालो बलवान्सिंहश्चैव निहन्ति किम् ॥ मार्ज्जारं मूषिको वापि सर्व्वं वै ह्यद्भुतं परम् ॥ १०२ ॥ क्षुद्राश्चैव व्रजे कंस ये वसन्ति वदामि किम् ॥ तेषां निकारो हस्तेन तव नापि महात्मनः ॥ १०३ ॥ बालाश्च प्रभवो यस्य तस्यान्ते जीवितात्सुखम् ॥ मरणे भाति मे कंस किं वदामि हताप्यहम् ॥ १०४ ॥ धिग्धिग्वीर्य्यं तवैवेदं धिग्राजत्वं वदामि किम् ॥ सर्व्वं वै विफलं जातं बालकेन हतं तथा ॥ १०५ ॥ अधुना किं वदिष्यामि वद कंस महाबल ॥ भगिनी निहता मे हि धिग्धिङ्‌ मां व्यर्थजीविनीम् ॥ १०६ ॥ विनाशसमये बुद्धिर्मर्त्यानां कालनौकसाम् ॥ विपरीता भवेद्भव्यं कोऽन्यथा कर्त्तुमीश्वरः ॥१०७॥ गमिष्यति पतिस्तस्या महाक्रोधी घटोदरः ॥ अघासुरो बको वाऽपि भ्रातरौ क्रोधिनौ ततः ॥ १०८ ॥ व्रजस्थानां च सर्व्वेषां ग्रसितारस्तु ते त्रयः ॥ गमिष्यंति फलं तेषां वैरस्य तु भविष्यति ॥ १०९ ॥ कंस उवाच ॥ स्वयमेव गरालिप्तस्तना मूढा गता हि सा ॥ दूषणं नहि केषांचित्तेषां वै व्रजवासिनाम् ॥ ११० ॥ यदि जानामि ते नाशं नीता वैरन्तु वै शुभम् ॥ अघासुरबकौ तत्र गच्छतौ बलवत्तरौ ॥ ॥ १११ ॥ अथ वाद्य तृणावर्त्तो भृशं मे चातिवल्लभः ॥ गमिष्यति मयाऽज्ञप्तो व्रजनाशाय साम्प्रतम् ॥ ११२ ॥ घटोदरादयो यावत समेष्यंति वृकोदरि ॥ तावत्त्वं तिष्ठमद्गेहे यावत्कार्य्यं प्रसिध्यति ॥ ११३ ॥ ॥ श्रीकृष्ण उवाच ॥ इति कंसवचः श्रुत्वा न स्थिता सा वृकोदरी ॥ जगाम भगिनीशोकमूर्च्छिता निजमन्दिरम् ॥ ११४ ॥ कंसोपि तद्वत्तस्मार राजकार्य्यं समाकुलः ॥ अहञ्च गोपसदने बालचेष्टाभिरद्भुतम् ॥ ११५ ॥ सुखम्महद्ददानस्तु तत्र नन्दयशोदयोः ॥ यदि मे जननी रात्रौ सुप्ता निद्राकुला भवेत् ॥ ११६ ॥ तदाहं रोदनमिषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्निद्राभङ्गं करोम्यलम् ॥ जागरं समवाप्याशु करोति करवादनम् ॥ ११७ ॥ सा गायति मुने गानं लालयन्ती भृशं हि माम् ॥ त्वं मे प्राणप्रियो वत्स त्वदाधारं हि जीवनम् ॥ ११८ ॥ रोदनं त्वं मा च कृत्वा सुखं शयनमाचर ॥ त्वयि जाग्रति जागर्मि त्वयि सुप्ते स्वपाम्यहम् ॥ ११९ ॥ स्तनं पिब क्षुधार्त्तोऽसि त्यक्त्वा रोदनमञ्जसा ॥ कदाचिदङ्कमारोप्य शयनं कारयत्यपि ॥ क्षणं निद्राऽभवत्तस्या जागरो जायते निशि ॥ १२० ॥ सुखमास्वादयन्ती मे चुम्बनालिङ्गनादिभिः ॥ जागरे दर्शनात्सौख्यं निद्रया स्वप्नदर्शनात् ॥ १२१ ॥ स्वभावात्पुत्रभावेन मयि स्नेहपराऽभवत् ॥ एवं निशा व्यतीता चेत्प्रातः कालो भवेद्यदि ॥ १२२ ॥ समुत्थायाथ जननी सुखं पश्यति मे भृशम् ॥ विलोक्य वदनं रम्यं सा तस्य नयनाम्बुजम् ॥ १२३ ॥ मोदमायाति परमं ततो वदति शोभनम् ॥ उत्तिष्ठ तात भद्रन्ते पश्यन्ती ते सुखाम्बुजम् ॥ १२४ ॥ सदा करोमि कार्य्याणि त्वन्मुखं मम मङ्गलम् ॥ एवं नन्दोऽपि मां वक्ष्य मोहमाप्नोति शाश्वतम् ॥ ॥ १२५ ॥ आरोप्यांकमथो मूर्द्ध्नि समाघ्राय समाहितः ॥ सुखं चुम्बाति मोदेन पुनः पश्यति मे सुखम् ॥ १२६ ॥ कदाचिदङ्क आदाय स्वकण्ठे योजयत्यपि ॥ अनुभूयाऽशेषसुखमुभाभ्यामुच्यते कथा ॥ १२७ ॥ परस्परानुमोदेन स्नेहेन मयि नारद ॥ आवां धन्यौ यतः पुत्रो गते वयसि शोभनः ॥ १२८ ॥ संबभूव प्रियो जीव्यात्सोयं वै शरदां शतम् ॥ विभवो दृष्टिदोषेण बहिस्थाप्यो न ते क्वचित् ॥ १२९ ॥ दृष्टिदोषनिवाराय भाले कज्जलकं कुरु ॥ कंठे व्याघ्रनखं चैव रामनामांकितं स्तवम् ॥ १३० ॥ आवयोर्जीवनं बालः सेवितः परमेश्वरः ॥ तेन पुण्येन पुत्रोऽसा आवयोरंकगः स्फुटम् ॥ १३१ ॥ एवं प्रातः समुत्थाय विलोक्य वदनं मम ॥ विचित्रवाक्यौ पितरौ नितराम्मुदमापतुः ॥ १३२ ॥ पश्चान्मे जननी मह्यं स्थापयित्वा निजान्तिके ॥ पश्यन्ती मन्मुखं शश्वन्ममन्थ दधि भाजने ॥ १३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गायन्ती मम कर्माणि गीतानि तु महोत्सवे ॥ यानि योगिभिरत्यन्तं कालत्रयकृतानि हि ॥ १३४ ॥ यत्किञ्चिद्गृहकर्म्माणि कुरुते हर्निशं तु सा ॥ गायन्ती मम कर्म्माणि पापं शामयतीत्यलम् ॥ १३५ ॥ तथैव नन्दगोपोऽपि न मां विस्मरति क्वचित् ॥ आगत्यानुदिनं तत्र गोप्यः सर्व्वाः समंततः ॥ १३६ ॥ मुखं विलोकयन्ति स्म गायन्त्यो नन्दमन्दिरम् ॥ न त्यजन्ति कदाचिद्वै बालरूपविमोहिताः ॥ १३७ ॥ आनयन्ति च गोप्यस्ताः सितां श्रीफलमिश्रिताम् ॥ वसनानि विचित्राणि तथोष्णीषञ्च कन्दुकम् ॥ १३८ ॥ अन्यच्च परिधानीयं ताम्बूलं तिलकं तथा ॥ तथा कुलोचितं ताश्च पूजितास्तु यशोदया ॥ १३९ ॥ यान्ति स्वंस्वं गृहं प्रातः पुनरायान्ति वीक्षितुम् ॥ अनेकसुखपूरैश्च गोपा गोप्यस्तथा व्रजे ॥ १४० ॥ विस्मृत्य गृहकार्य्याणि मां विलोकितुमागताः ॥ गणयन्ति न वै किञ्चिन्ममानन्दवशीकृताः ॥ १४१ ॥ निरीक्ष्य गोपान्गोपीश्च करोमि सुखदं स्मितम् ॥ एवं दिनान्यतीतानि एकाशीतिर्महामुने ॥ १४२ ॥ जन्मर्क्षयोगे चायाते ज्योतिर्विद्भिर्निवेदितम् ॥ समाहूतास्तत्र गोप्यः कुलजा मंगलान्विताः ॥ १४३ ॥ गायका नामकाराश्च तथान्ये सूतमागधाः ॥ जगुरुच्चैस्तालपूर्व्वं मम माहात्म्यसूचकम् ॥ १४४ ॥ अनन्तानन्द गोविन्द जगदीश जगत्पते ॥ नारायण हृषीकेश कृष्ण दामोदर प्रिय ॥ १४५ ॥ परेश परमानन्द जगदीश जगत्पते ॥ कृपासिन्धो मनोज्ञाङ्ग मारमोहन पावन ॥ १४६ ॥ श्रीपते सर्व्वकृद्विष्णो चिरं विभवदाच्युत ॥ भूतभावन भूतात्मन्भूतकोटयेकपालक ॥ १४७ ॥ मीन वाराह कूर्म्माग नृसिंह द्विजनायक ॥ श्रीराम नृपतिश्रेष्ठ सर्व्वेश्वर नमोऽस्तु ते ॥ १४८ ॥ इत्याद्युच्चैर्जगुर्गोप्यो नानारागमहोत्सवैः ॥ १४९ ॥ गोपा गोप्यो गोकुले भ्राजमानाः सर्व्वैर्भावैर्मोदमापुर्मुनीश ॥ ब्रह्मादयो देवगणाश्च तत्र तमुत्सवं द्रष्टुमुपाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताश्च ॥ १६० ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे कृष्णजन्मर्क्षयोगोत्सवो नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥ स्वधाम्नस्तक्षणे भूत्वा व्रजेशैः संयुतो विधिः ॥ शिवलोकादथ शिवः सगणः समगात्ततः ॥१॥ निरीक्ष्योत्सवमाश्चर्य्यं सर्व्वे विस्मयमाययुः ॥ अहो ब्रह्माण्डकोटीनामीशो बालस्वरूपधृक् ॥ २ ॥ अल्पपर्य्यङ्कमध्यस्थः शेते छन्नः स्वमायया ॥ शोभनं जन्म चास्माकं कृतञ्च परमं तपः ॥ ३ ॥ यत्पश्यामः शुभं रूपं कृतबालस्वरूपिणः ॥ एतावत्कालपर्य्यन्तं वृथा तप्तं तपो मया ॥ ४ ॥ यदस्य रूपं नो दृष्टमिदानीं तत्फलं मम ॥ धन्या गोपाश्च गोप्यश्च तथाऽन्ये च व्रजौकसः ॥ ५ ॥ एषां मोक्षपथं विष्णुर्जातो बालस्वरूपधृक् ॥ श्रुतयो यत्र पश्यन्ति नेतिनेतीति चाब्रुवन् ॥ ६ ॥ न जानन्ति चिरं सोऽत्र साक्ष्यात्मा बालरूपधृक् ॥ अहो भाग्यवती ह्येषा यशोदा नन्दगेहिनी ॥ ७ ॥ यदेनमङ्कमारोप्य कृष्णं नन्दति नित्यशः ॥ यज्ञेषु द्विजमुख्याद्यैराहूतो मन्त्रकोटिभिः ॥ ८ ॥ ना याति कर्हिचित्साक्षात्स एवास्याः सुतोऽभवत् ॥ योगिभिश्चिन्तितो नित्यमप्रमत्तैर्जितेन्द्रियैः ॥ ९ ॥ बहवः पुण्यकर्म्मिष्ठाः कर्म्मकृत्कृतबुद्धयः ॥ अनेकयत्ननिचयैः श्रुत्युक्तविधिवर्त्तिनः ॥१०॥ विलोकितुं न शक्तास्ते स्वरूपं धृतमैश्वरम् ॥ स एवास्याः पुत्रभावं प्राप्तोऽस्या भाग्यमद्भुतम् ॥ ११ ॥ नन्दोऽयं कृतपुण्यश्च पूर्त्तेष्टमकरोद्बहु ॥ भक्तियुक्तस्य देवस्य योऽसौ पश्यति तन्मुखम् ॥ १२ ॥ धन्या व्रजौकस इमे ये पश्यन्ति स्वरूपिणम् ॥ कृष्णश्च तद्यशो नित्यं गायन्ति त्वनुरागतः ॥ १३ ॥ यथा व्रजौकसां भाग्यं भवेत्को वर्णितुं क्षमः ॥ सुरासुराणामाध्येयं बालरूपिणमीश्वरम् ॥ १४ ॥ ये पश्यन्त्यनुगायन्ति प्रेम्णालिङ्गन्त्यभीक्ष्णशः ॥ ब्रह्मेति मम संज्ञेयं पितृपितामहौ च यत् ॥ १५ ॥ स्वयम्भूः सत्यलोकेशो वृथैव नहि चान्यथा ॥ यतो नाप्तं नन्दवन्मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शनालिङ्गनादिकम् ॥ १६ ॥ ईर्ष्यायुक्तो विधिस्तत्र दृष्ट्वा तच्च महोत्सवम् ॥ न सस्मार तनुं स्वीयां चित्रार्पित इवाभवत् ॥ १७ ॥ अथ तत्र शिवः प्राह कम्पयन्स्वशिरो मुहुः ॥ महामहायोगचर्य्याविद्यायाः फलमेव च ॥ १८ ॥ किमेतदद्भुतं दृश्यं मानवं रूपमीक्षितम् ॥ व्रजवासिजनैर्नित्यं किमेभिः सुकृतं कृतम् ॥ १९ ॥ उद्गायति च नृपते यद्दृष्टं रूपमद्भुतम् ॥ पत्न्यै त्वेवं समादिश्य त्यक्त्वा भस्मविलेपनम् ॥ २० ॥ कृत्वा घोरां योगचर्य्यां विचरामि प्रयत्नतः ॥ त्यक्त्वा भोगान्प्रियानेव ध्रियते हृदये मया ॥ २१ ॥ कामो नेत्राग्निना दग्धोऽद्य दृष्टोऽयं स्वरूपधृक् ॥ एते गृहोचितान्भोगान्भुञ्जन्ते कामिनः परम् ॥ २२ ॥ श्रुतयो मुनयश्चैव योगयुक्ताश्च योगिनः ॥ न विदुर्दुर्लभां मूर्त्तिं परेशरचितामहो ॥ २३ ॥ व्रजौकसो धन्यतमास्तां पश्यन्तीह नित्यशः ॥ धन्या यशोदा नन्दश्च धन्यो धन्या व्रजौकसः ॥ २४ ॥ येषामक्षिगतो भाति तनुजः परमेश्वरः ॥ धिग्जन्म तेषां मनुजैर्यैर्नैवाराधितो हरिः ॥ २५ ॥ भक्तिहीनैर्जनैः कैश्चिन्नालोकि परमेश्वरः ॥ न कीर्त्तितो हरिर्यैन चिन्तितो मनसा न च ॥ २६ ॥ वृथा च सन्ति ते येषां जीवितं भक्तिवर्जितम् ॥ एभिस्तु नवधा भक्तिः कृता वै व्रजवासिभिः ॥ २७ ॥ ये पश्यन्ति प्रतिदिनं रूपवद्ब्रह्म निर्गुणम् ॥ कृष्ण विष्णो परेशाद्य शिवरूपं वृथा मम ॥ २८ ॥ आनन्दभवसंप्लावैर्न सस्मार निजां तनुम् ॥ ततो नराधिपः प्राह धिगस्मान्देवरूपिणः ॥ २९ ॥ स्वर्गस्थैरपि यैर्नैव सुखमत्रानुभूयते ॥ इत्थमन्येऽपि लोकेशा यमाग्निवरुणादयः ॥ ३० ॥ ऊचुर्मया कटाक्षेण वीक्षितास्तुष्टिमागताः ॥ ततोऽहं बालरूपेण प्रारोदन्मोहयंश्च तान् ॥ ३१ ॥ विमोहितास्ते प्रययुः स्वं स्वं स्थानं प्रणम्य माम् ॥ अद्भुतं कथयंश्चैव यद्दृष्टं परमोत्सवम् ॥ ३२ ॥ ॥ श्रीकृष्ण उवाच ॥ मुने गोपाश्च गोप्यश्च गायमानाः परस्परम् ॥ आनन्दसंप्लवे मग्ना गता दूरं ममान्तिकात् ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रेङ्खस्थितं मां विस्मृत्य प्रसुप्तमिव मां विदुः ॥ आत्मनो गुणगानस्य श्रवणेऽभून्मनो मम ॥ ३४ ॥ नाहं वसामि वैकुण्ठे योगिनां हृद
ये न च ॥ मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥ ३५ ॥ नित्यं शृण्वन्ति गायन्ति मत्कीर्त्तिं ते व्रजौकसः ॥ मनुष्यबुद्धया पश्यन्ति
लोका मामन्धदृष्टयः ॥ ३६ ॥ मद्भक्तसदृशो लोके पिता माता गुरुर्न हि ॥ न बन्धुर्नापरे चैव इति वेदविदो विदुः ॥ ३७ ॥
ये मत्कीर्त्तौ जनं सक्तं पृथक्कुर्व्वन्ति मानवाः ॥ तथा मद्द्वेषिणो नित्यं पतन्ति नरकेऽशुचौ ॥ ३८ ॥ शृणोमि स्वयशोगानं प्रेम्णा
भक्तैरुदाहृतम् ॥ कृतं गोपैश्च गोपीभिर्गानं त्यक्त्वा च कौतुकम् ॥ ३९ ॥ ततः प्ररुद्य रोषात्तु पद्भ्याञ्च शकटो हतः ॥ शकटः पर्य्यगा
च्छिन्नभाण्डोपस्कारपूजितः ॥ ४० ॥ निशम्य शकटं भग्नं किमेतदिति विस्मिताः ॥ तत्रागता मां ददृशुरक्षतं हृष्टमानसम् ॥ ४१ ॥ उत्था
यांकगतं चक्रुस्तर्कयन्ति सचित्रधा ॥ केनेदं शकटं भग्नं दृश्यतेऽस्य न कारणम् ॥ ४२ ॥ बाला ऊचुरनेनेति शकटः प्रपदा हतः ॥
विपर्य्यगान्न सन्देहो दृष्टमस्माभिरत्र हि ॥ ४३ ॥ तेषां न श्रद्दधुर्वाचो बालभाषितमित्युत ॥ अन्यभावास्तेन तत्र गोपा गोप्यः सम
न्ततः ॥ ४४ ॥ सम्यग्विधाय शकटं ततो दानान्यदुर्मुदा ॥ गाः स्वर्णरूप्यवासांसि रत्नान्यन्नानि श्रद्धया ॥ ४५ ॥ आशिषः प्रददौ
विप्राः कोटीः सन्तुष्टमानसाः ॥ यशोदया च नन्देन गोप्यो गोपाश्च पूजिताः ॥ ४६ ॥ प्रययुः स्वगृहाण्येव दत्त्वा च परमाशिषः ॥
आगत्य नानादेशेभ्यः याचकास्तत्र आवसन् ॥ ४७ ॥ संगृह्य नन्ददानानि परं ते धनिनोऽभवन् ॥ श्रुत्वा दानं महत्तत्र दीना विद्यो
पजीविनः ॥ ४८ ॥ वसन्ति स्म व्रजे नित्यं न यान्त्यन्यत्र कर्हिचित् ॥ आधिव्याधिविनिर्मुक्तास्तापत्रयविवर्जिताः ॥ ४९ ॥ आस
न्व्रजौकसः सर्व्वे मन्निवासेन नारद ॥ यत्र मे श्रवणादीनि मङ्गलानि भवन्ति हि ॥ तत्र किञ्चिन्न दुःखं स्यात्किं पुनर्मम वासतः ॥५०॥

CC-0. In Public Domain. Digitization by eGangotri

नारद उवाच ॥ भगवन्देवदेवेश श्रीकृष्ण करुणाकर ॥ श्रुत्वा ते बालचरितं न मनस्तृप्यते मम ॥ ५१ ॥ इन्द्राद्यैः संस्तुतं को नु तद्बालचरितं हरे ॥ न शृणोत्यभितो मर्त्त्यैः श्रोतव्यममरोत्तमैः ॥ ५२ ॥ कृपया ब्रूहि मे नाथ आत्मीयं बालचेष्टितम् ॥ यस्य श्रवणमात्रेण शुध्यन्ति मलिना जनाः ॥ ५३ ॥ भगवानुवाच ॥ शृणु नारद वक्ष्यामि बालचेष्टितमात्मनः ॥ शृण्वतां परमानन्दकारणं भक्तिसाधनम् ॥ ५४ ॥ अंकमारोप्य जननी यदा पश्यति मे मुखम् ॥ ब्रवीति पुत्र वत्सेति तदा मे जायते स्मितम् ॥ ५५ ॥ अहो बलं मे मायायाः सर्व्वेशमपि मामियम् ॥ जानाति पुत्रं बाल्येन सुस्मितास्यसुखप्रदम् ॥ ५६ ॥ इति ज्ञात्वा मया मात्रे पुत्रप्रेमनियोजितम् ॥ जानूपरि तु संवेश्य सर्व्वांगं वीक्ष्य मामकम् ॥ ५७ ॥ पृच्छन्त्यां नाना वार्त्तां मां मम संजायते स्मितम् ॥ न वदाम्यति बालत्वाद्वाच्यमानो निरन्तरम् ॥ ५८ ॥ तद्वीक्ष्य गोपगोपीनां जायते परमं सुखम् ॥ न करोति कदाचिद्वै मां हि दृष्टिपथाद्बहिः ॥५९॥ स्वप्नेऽपि मां लालयन्ति पश्यंत्यानन्दकारणम् ॥ एवं व्रजौकोभिः सार्द्धं बाललीलां करोम्यहम् ॥ ६० ॥ पूतनायाः पतिर्गेहे आजगाम घटोदरः ॥ श्यालाभ्यां सहचान्याभ्यां नानुलोक्यात्मवल्लभाम् ॥ ६१ ॥ सुप्तां वृकोदरीं वीक्ष्य तामुत्थाप्याह दुःखितः ॥ अघासुरो बकश्चैव भ्रातरौ ते महाबलौ ॥ ६२ ॥ वृकोदरीह मे भार्य्या नापयाति गृहात्कचित् ॥ क्व गता सा वदाशु त्वं मनो मेऽतीव पीडितम् ॥६३॥ यदंगसंगाद्बालानां मरणं विधिनिर्मितम् ॥ भवत्यवश्यं सा बाला क्व गता वद तत्त्वतः ॥ ६४ ॥ श्रुत्वा घटोदरवचो भगिनी शोकपीडिता ॥ उवाचाश्रुमुखी भूत्वा संतता सा वृकोदरी ॥ ६५ ॥ घटोदर महाबुद्धे कंसो दुःस्वप्नदुर्मनाः ॥ बालकानां विनाशाय पूतना प्रेषिता व्रजे ॥ ६६ ॥ मयाऽनुमोदिता सापि कंसप्रियचिकीर्षया ॥ मृता तत्रैव नायाता परावृत्त्य प्रिया तव ॥ ६७ ॥ कंसं पृष्ट्वा तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छ श्यालौ बाह्यं नियोजय ॥ व्रजौकसां विनाशाय यैर्भार्य्या ते विनाशिता ॥ ६८ ॥ स इत्थं तद्वचः श्रुत्वा क्रुद्धः कंसान्तिकं ययौ ॥ अघासुरबकाभ्याञ्च सहितः कम्पयन्महीम् ॥ ६९ ॥ उवाच कंसमासाद्य भार्य्या मे किं विनाशिता ॥ अतिप्रिया नराहारा बलिष्ठा बालघातिनी ॥ ७० ॥ पूतनाभ्रातरौ क्रुद्धा ऊचतुः कंसमातुलौ ॥ आवां व्रजविनाशाय व्रजावो यैर्विनाशिताः ॥ ७१ ॥ प्रेष्ठा नो भगिनी राजंस्त्वमाज्ञापय मा क्रुधः ॥ भक्ष्यमिष्टं विनिर्दिष्टं विधात्रा व्रजसंज्ञितम् ॥ ७२ ॥ तेषां तद्वचनं श्रुत्वा कंसोऽप्याहातिसान्त्वयन् ॥ घटोदर महाबुद्धे अघासुरबकासुरौ ॥ ७३ ॥ ममैव प्रेषिता घोषं पूतना चात्महेतवे ॥ दुःखप्रदर्शनेनालं भीते नासुरसत्तमाः ॥ ७४ ॥ बालकानां विनाशाय तया चैवान्यथा कृतम् ॥ गरलं स्वस्तने लिप्त्वा कैतवं रूपमाश्रिता ॥ ७५ ॥ विचरन्ती व्रजेकश्चिज्जगृहे बालकं परम् ॥ स्वभावात्तेन बालेन स्तनेऽकारि नखक्षतः ॥ ७६ ॥ ततो गरलदोषो वै प्रविष्टो रक्तमार्गतः ॥ मृता गरेण सा मूढा आत्मबुद्धिविकारतः ॥ ७७ ॥ अतो न कस्यचिद्दोषो व्रजवासिजनस्य हि ॥ यदि वैरं कृतं वस्तैर्व्रजवासिजनैरलम् ॥ ७८ ॥ तदाहं प्रेषयाम्यद्य तृणावर्त्तं महाबलम् ॥ महावातस्वरूपेण मानवान्नेष्यते दिवम् ॥ ७९ ॥ नानाकाशपथे नीत्वा मारयत्यखिलांस्ततः ॥ घातयिष्यामि युष्माकं प्रीतये न चिरेण हि ॥ ८० ॥ एवं कंसोऽवारयद्दैत्यमुख्यांस्तेऽपि श्रुत्वा तोषमापुर्मुनीन्द्र ॥ ज्ञात्वा चैतान्मानसं स्वप्रिय हि कंसं प्रोचुः साधु ते मंत्रितं वै ॥ ८१ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे अघासुरादिकंसविचारो नामैकोनविंशोऽध्यायः ॥ १९ ॥ श्रीकृष्ण उवाच ॥ ॥ आकर्ण्य तत्कंसवचस्त्रयस्तेऽतिप्रहर्षिताः ॥ आहुश्च राजंस्त्वं शीघ्रं तृणावर्त्तं समाह्वय ॥ १ ॥ अथ कंसस्तृणावर्त्तं प्रसुप्तं बहुकालतः ॥ दूतैरानाययामास दृष्ट्वा तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरतः स्थितम् ॥ २ ॥ उवाच वचनं घोरं तीक्ष्णबुद्धिर्महाबलः ॥ उवाचोच्चैस्तृणावर्त्तं भूतहिंसापरायणम् ॥ ३ ॥ तृणावर्त्त महाबाहो कार्य्यं मे समुपागतम् ॥ अत्यल्पमपि तत्कार्य्यं नान्यस्त्वत्तोऽस्ति मे प्रियः ॥ ४ ॥ इदं त्वल्पतरं ते हि व्रजमानवमारणम् ॥ पूर्व्वं दुःस्वप्नप्रयोगेन पूतना प्रेषिता मया ॥ ५ ॥ सा प्रनष्टात्मदोषेण गरलेन प्रमादतः ॥ तथापि तत्पतिर्द्वेषं त्यजते न घटोदरः ॥ ६ ॥ तत्पितृव्यात्मजौ घोरावघासुरबकासुरौ ॥ क्रुद्धौ मारितुमुद्युक्तौ दुर्ब्बलान्व्रजवासिनः ॥ ७ ॥ मया निवारितास्तेऽद्य प्रजाघातभयेन हि ॥ महावातस्वरूपेण बालकं तत आनय ॥ ८ ॥ अथ वा येन नीता सा पूतना बालघातिनी ॥ दृष्ट्वा सौम्यस्वरूपेण पूर्व्वमेव व्रजौ कसा ॥ ९ ॥ क्व गता मारिता केन मानवं तं विलोक्य च ॥ ततो वातस्वरूपेण पूतनाकालबालकम् ॥ १० ॥ नीत्वा नान्ये निहन्तव्या आनेयः स हि बालकः ॥ पूतना येन नीतान्तं स हि मृत्युं समर्हति ॥ ११ ॥ अतस्त्वमेव गच्छाद्य सर्व्वेषां प्रीतिमावह ॥ इति श्रुत्वा तृणावर्त्तो मुदितः कंसमब्रवीत् ॥ १२ ॥ यदि त्रैलोक्यघातार्थं मामाज्ञापयसि प्रभो ॥ न दुष्करं नैतदपि किन्तु विज्ञापयामि ते ॥ १३ ॥ अकस्माद्वेपथुश्चासीद्धृदये मम साम्प्रतम् ॥ सीदन्ति मम गात्राणि वामः स्फुरति मे भुजः ॥ १४ ॥ स्वप्ने दृष्टा च जननी मृतं मां कण्ठसंगिनम् ॥ कृत्वारुदद्भृशं पुत्र कृष्णस्त्वां मारयिष्यति ॥ १५ ॥ इत्युक्तान्तर्हिता सद्यः स्वप्नाच्चाहं समुत्थितः ॥ प्रातरेव त्वयाहूत आगतोऽस्मि तवान्तिकम् ॥ किं करोमि तवाज्ञा का यद्भाव्यं तद्भविष्यति ॥ १६ ॥ कंस उवाच ॥ ॥ तृणावर्त्त न ते मृत्युर्भविता दैवैतरपि ॥ किं पुनर्मानुषादेव तत्र चाप्यतिबालकात् ॥ १७ ॥ असुरास्ते प्रियाः सर्व्वे सुरास्त्वल्पबलास्त

१ दिवर्मिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व ॥ भयाल्लोकांस्त्यजन्त्याशु निलीयन्त इतस्ततः ॥ १८ ॥ यदि स्वप्नगता वार्त्ता सत्या भवति नित्यशः ॥ तदा मे स्वप्नवाक्यं
त्वं विश्रब्धं च शृणष्व हि ॥ १९ ॥ पर्व्वतारोहणं स्वप्ने दूरदेशगतिस्तथा ॥ संगमः पुत्रभार्य्याभिर्बन्धुभिर्न हि दृश्यते ॥ २० ॥
सुतेन पुरुषेणेह भुङ्क्ते भोगमनल्पकम् ॥ क्लेशितं विविधं प्रातः स्वप्ने दृष्टं मृतं ततः ॥ २१ ॥ अतो गच्छ व्रजं शीघ्रं मद्वाक्यञ्च
विधत्स्व भोः ॥ दास्येऽहं विविधान्भोगान्कार्यं कृत्वाऽऽगमिष्यसि ॥ २२ ॥ श्रीकृष्ण उवाच ॥ इति कंसवचः श्रुत्वा हर्षितोभून्महा
सुरः ॥ उवाच कंसमाभाष्य वीटकं देहि मे नृप ॥ २३ ॥ व्रजाम्यद्य तवाज्ञा चेन्निहन्म्येव व्रजौकसः ॥ इत्युक्तस्तेन कंसोऽपि प्रददौ
वीटकं शुभम् ॥ २४ ॥ स गृहीत्वा प्रचलितस्तृणावर्त्तो महाबलः ॥ तथा प्रचलिते दैत्ये विधवा मुक्तमूर्द्धजा ॥ २५ ॥ कापि स्त्री
पावकं नीत्वा सधूमं पुर आययौ ॥ तथान्या रुदती काचिदागता पतिताडिता ॥ २६ ॥ हाहेति शब्दं कुर्व्वाणा घ्नती स्वशिर उत्क
चम् ॥ तथाऽपि चलितो दृष्ट्वा दुष्टोप्यशकुनं पुरः ॥ गणयित्वा न दुर्बुद्धिः प्रविवेश व्रजान्तरम् ॥ २७ ॥ पृच्छमानो महादुष्टः पूतना
गमनादिकम् ॥ तत्राविशन्नन्दगृहं श्रुत्वा तत्र विचेष्टितम् ॥ २८ ॥ अंके प्राप्तं यशोदाया मां दृष्ट्वा स गतो वने ॥ व्रजादथ विनिर्गत्य
ततो वातस्वरूपधृक् ॥ २९ ॥ दैत्योऽभूत्स प्रचण्डोऽतिभीषयंश्च व्रजौकसः ॥ तृतीयप्रहरे चाथ प्रविवेश महाबलः ॥ ३० ॥
तदाहं मातुरंकस्थो विचार्य्यासुरसंक्षयम् ॥ अंगातिभारं कृतवान्सा मेने गिरिगौरवम् ॥ ३१ ॥ भुवि तत्याज सहसा दैत्योऽपि जगृहेऽ
थ माम् ॥ आवृत्य रोदसी पांशुनिचयेनैव चोत्पतत् ॥ ३२ ॥ मुञ्चन्घोरतरं नादं रुन्धंश्चक्षूंषि रेणुभिः ॥ नापश्यत्कश्चिदात्मानं परं वा
रेणुबद्धदृक् ॥३३॥ अन्धकारे प्रवृत्ते स मां जहार नभो गतः ॥ न शशाक ततो मन्तुं भूरिभारप्रपीडितः ॥ ३४ ॥ मया गृहीतकण्ठोऽसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पो मोचयितुं नहि ॥ पातितश्च शिलापृष्ठे विशीर्णावयवो ह्यभूत् ॥ ३५ ॥ अहन्तेन यदा नीतो यशोदा मामपश्यती ॥ रुरोद करुणं तूच्चैर्द्धावन्ती च इतस्ततः॥३६॥ निशम्य रुदितं तस्या हा पुत्र क्क गतः स्थितः॥ गोप्यः समन्ताद्धाजग्मुरुरुदुः समदुःखिताः॥३७॥ मुहूर्त्तमात्रं तत्रासीन्महापीडाकरं व्रजे ॥ गते तस्मिन्नन्धकारे ततः सर्व्वे व्रजौकसः ॥ ३८ ॥ मामन्वेषितुमुद्युक्ताः शुश्रुवुश्च महास्वनम् ॥ ३९ ॥ शिलायां पततस्तस्य तत्र जग्मुः समाकुलाः ॥ ददृशुस्तन्तु पतितं महाकायं महासुरम् ॥ ४० ॥ विशीर्णसर्व्वावयवं मद्गृहीतगलं मृतम् ॥ दृष्ट्वा तं तादृशं भीता विस्मिताश्च परस्परम् ॥ ४१ ॥ न जानीमः कुतो दुष्टः समागत्याऽपतद्व्रजे ॥ केन वा घातितोऽयं वा बालको रक्षितः कथम् ॥ ४२ ॥ नन्द पुण्योदयस्तेद्य जातः सर्व्वैर्व्रजालयैः ॥ समागतः पुनर्बालो दृष्टस्तस्मान्निरामयः ॥ ४३ ॥ अहो अत्यद्भुतं चैव नाशं कर्त्तुमिहागतः ॥ बालकस्यासुरोऽयं वै स्वयं मृत्युवशं गतः ॥ ४४ ॥ गृहेऽरण्ये जले चाग्नौ पर्व्वते रिपुसङ्कटे ॥ स एव रक्षिता शश्वद्गर्भे रक्षति यो विभुः ॥ ४५ ॥ नाऽयं बालो हि सामान्यो नन्दभाग्योदयस्तव ॥ विष्णुर्व्वा विष्णुसदृशो जातोऽयं कश्चिदीश्वरः ॥ ४६ ॥ पिता पालय पुत्रं त्वं लालयाऽतिचिरं भृशम् ॥ त्रैलोक्यनाथो भगवान्विष्णुश्चेत्तव बालकः ॥ ४७ ॥ कृतार्थस्त्वं किमित्यत्र वयं चाऽपि समेधिताः ॥ इत्युक्त्वा तेऽखिला गोपास्तमालोक्य सुविस्मिताः ॥ ४८ ॥ विशीर्णसर्व्वावयवं तञ्च दूरं विचिक्षिपुः ॥ तं ज्योतिरद्भुततममुत्थितश्चापि चाविशत् ॥ ४९ ॥ सुरा जयजयेत्यूचुर्धन्यधन्येति वै पुनः ॥ पापोऽसुरो मत्संस्पर्शान्मदीयं प्राप सङ्गमम् ॥ चित्रं नैतन्मत्प्रभावात्सर्व्वेषामुत्तमा गतिः ॥ ५० ॥ ॥ श्रीनारद उवाच ॥ तृणावर्त्तोऽसुरः पापः भृशं रुधिरभोजनः ॥ कथं त्वया विनिहतो गृहीत्वा कण्ठ एव हि ॥ ५१ ॥ स्पर्शो यस्य न कर्त्तव्यः तं मृतश्चास्पृशद्दृशम् ॥ उचिता कुत्सिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य प्राप्तोऽसौ तां गतिं कथम् ॥५२॥ किं प्राक्तनं शुभं तस्य पूर्व्वजन्मनि तत्कृतम् ॥ संशयो मे महाञ्जातस्त्वं तच्छेत्तुमिहार्हसि ॥५३॥
॥ श्रीकृष्ण उवाच ॥ शृणु विप्र महच्चित्रं यज्जातं प्राग्भवेऽस्य वै ॥ मद्भक्तिकार्य्यं सुमहद्ययौ तत्फलमुत्तमम् ॥ ५४ ॥ पुराऽऽसीद्राविडे
कश्चिद्भूतो भागवतः कृती ॥ नाम्ना विश्वरथः ख्यातो हरेर्भजनवल्लभः ॥ ५५ ॥ बलवान्बन्धुसत्कर्त्ता विद्वान्भागवतः कृती ॥ तस्य राष्ट्रे
प्रजाः सर्व्वा मम भक्तिपरायणाः ॥ ५६ ॥ वसन्ति स्वसुखं सौख्यं यथोक्तकरदायिनः ॥ आधयो व्याधयश्चैव न भवन्ति कदाचन ॥
॥ ५७ ॥ प्रतापान्मम भक्तस्य कालो ग्रासपराङ्मुखः ॥ अहर्निशं पुरे देशे भेरीदुन्दुभिनिस्वनैः ॥ निवेदयति लोकेभ्यो भजतालं प्रजा
हरिम् ॥ ५८ ॥ उद्धारं न च वै विद्धि लोकानां भजनं विना ॥ गतिः स परमा चैव आश्रयश्च ततः परम् ॥ ५९ ॥ एवं प्रवर्त्तमाने वै
नरदेवशिरोमणौ ॥ समाजः समभूत्क्वाऽपि कीर्त्तनातुरचेतसाम् ॥६०॥ तत्र कश्चिद्वैष्णवाग्र्यो ब्राह्मणो द्रष्टुमागतः ॥ स दृष्ट्वा कीर्त्तनं विप्रः
चलितः स्वगृहं प्रति ॥ ६१ ॥ एतस्मिन्समये चौराः कस्यचित्पुरवासिनः ॥ चोरयित्वा धनं भूरि चरितास्त इतस्ततः ॥ ६२ ॥
ज्ञात्वा राजभटास्तांश्च पुरपृष्ठेष्वनुद्रुताः ॥ चौराः केऽपि न लब्धास्तैर्दृष्टः स द्विजसत्तमः ॥ ६३ ॥ चौरोऽयमिति मत्वा तैर्गृहीतस्ताडितः
पथि ॥ ततस्तैर्निर्दयैर्भृत्यैस्ताडितो बद्ध एव च ॥ ६४ ॥ कारागृहे निबद्धश्च रक्षितोऽतीव कष्टतः ॥ तस्यापि पूर्व्वजन्मोत्थकर्मपाकफलेन
हि ॥ ६५ ॥ तर्ज्जितं राजभृत्यैर्यत्ताडनं बन्धनात्यये ॥ यमलोके स संगम्य ह्यसंख्यैर्व्वत्सरैः स्थितः ॥ ६६ ॥ तन्मेऽत्यनुग्रहात्तस्य
जातं यत्स्वल्पदुःखदम् ॥ नाभुक्तं क्षीयते कर्म्म जन्मान्तरशतैरपि ॥ ६७ ॥ मद्भक्त्या तद्बहु स्वल्पं विपरीतमभक्तितः ॥ स कारागृह
बद्धोऽपि न विषादं चकार ह ॥ ६८ ॥ गायन्मम यशोऽतीव विस्मितश्च स्मरन्मुहुः ॥ गतोऽहं कीर्त्तनं द्रष्टुं धृतश्चौरभ्रमाद्भटैः ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो बलवती विष्णोर्म्मायेयं सुखदुःखदा ॥ यदत्र कृतमेतर्हि तत्प्राप्तं कर्म्मणः फलम् ॥ ७० ॥ नृणां सुखस्य दुःखस्य न दाता कोऽपि वर्त्तते ॥ इत्थं चिन्तयतस्तस्य रात्रिशेषः क्षयं गतः ॥ ७१ ॥ प्रातस्ते नृपतिं प्रोचुः तेनाज्ञप्ताश्चरास्ततः ॥ ततो मारयितुं निन्युर्बद्ध्वा च द्विजसत्तमम् ॥ ७२ ॥ पौराः खलु द्विजं रात्रौ धृतं चौरविशंकया ॥ अपश्यंस्तत्र ते गत्वा विष्णुभक्तं धृतं बलात ॥ ॥ ७३ ॥ ऊचुश्च किंकरान्राज्ञो निगृहीतः कथं द्विजः ॥ चौरो नाऽयं विष्णुभक्तो जानीमः सर्व्वे एव हि ॥ ७४ ॥ समाजोऽभूद्वैष्णवानां कीर्तनार्थं हरेर्निशि ॥ तत्र स्थितोऽसौ संहृष्टो वृत्ते प्रचलितो गृहम् ॥ ७५ ॥ गच्छन्पथि धृतः साधुर्भवद्भिश्चौरबुद्धितः ॥ अस्य धर्म्मवतो राज्ञः कथं मेऽसदृशो नयः ॥ ७६ ॥ पीडनं तु द्विजे यत्र तत्र स्यात्सर्व्वसंक्षयः ॥ किं पुनर्म्मरणेऽप्यस्य शुभं राज्ञो भविष्यति ॥ ७७ ॥ मुच्यताम्मुच्यतामाशु न विप्रो वधमर्हति ॥ वपनं द्रविणादानं देशान्निःसारणं तथा ॥ ७८ ॥ एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ ब्रह्मबन्धुर्न हन्तव्य आततायिविवर्जितः ॥ ७९ ॥ तथा भवद्भिर्व्विधृतश्चास्य दोषो न कश्चन ॥ इति श्रुत्वा राजभृत्यो राज्ञे तद्वन्न्यवेदयत् ॥ ८० ॥ राजन्नसौ महाभागः परस्वेषु पराङ्मुखः ॥ वैष्णवो रक्षितः स्वामिन्बद्ध्वा कारागृहे निशि ॥ ८१ ॥ न दण्डयाश्च वयं राजंस्तवादेशातिवर्त्तिनः ॥ बिभीमश्चौरदण्डेन तद्देयमभयं नृप ॥ ८२ ॥ अतः परन्तु किं कुर्म्मो हन्मो वा रक्षयामहे ॥ इत्थं निशम्य भीतस्तु तानुवाच महामतिः ॥ ८३ ॥ विक्रुश्य कृष्णकृष्णेति ममागःप्रशमः कथम् ॥ आनयध्वं ममादेशाद्भृशं भृत्या हरेः प्रियम् ॥ ८४ ॥ विष्णुरेव पुण्यनामा ख्यातः पतितपावनः ॥ इत्याज्ञाता राजभृत्या विष्णुभक्तमथानयन् ॥ ८५ ॥ दृष्ट्वाऽयान्तं नृपश्रेष्ठो ननाम शिरसा भुवि ॥ तमुवाच मुनिश्रेष्ठं जहि मां पापकारिणम् ॥ ८६ ॥ अथोपदेशं श्रुत्वा च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्तं भविष्यति ॥ कथं मम भवेन्मोक्षो वैष्णवाच्च विधानतः ॥ ८७ ॥ विष्णुभक्तकृतं द्रोहं निराकर्त्तुं न शक्नुयात् ॥ जनो जन्म
शतोद्भूतैः सुकृतैर्व्विविधैरपि ॥ ८८ ॥ मया यत्क्रियते पापं पारावारो न तस्य हि ॥ अतस्त्राहि कृपासिन्धो त्वामहं शरणं गतः ॥ ८९ ॥
किमत्र विहितं ब्रह्मन्ममानृण्यमनुत्तमम् ॥ यत्कृत्वाऽहं तमो घोरं न गच्छेयं कदाचन ॥ ९० ॥ इति राज्ञो वचः श्रुत्वा प्रोवाच द्विज
सत्तमः ॥ श्रुतिस्मृतिपुराणोक्तं वैष्णवद्रोहमुल्बणम् ॥ ९१ ॥ न शक्यते वारयितुं कल्पकोटिशतैरपि ॥ स इत्थमुक्त्वा राजानं गतो विप्रः
स्वमालयम् ॥ ९२ ॥ देहमुत्सृज्य राजाऽभूत्तृणावर्त्तो महासुरः ॥ ९३ ॥ हतो मयाऽत्र विपिने गतः स परमं पदम् ॥ ९४ ॥ तृणावर्त्त
वधं श्रुत्वा कंसोऽमन्यत चाशुभम् ॥ स्वप्नदृष्टं भवेत्सत्यं यथायं निहतोऽसुरः ॥ ९५ ॥ पार्षदाश्च हरेर्लोके चरन्ति च्छन्नरूपिणः ॥
बालं नीत्वा यदा व्योम्नि स्थितस्तैर्निहतो ध्रुवम् ॥ ९६ ॥ अतोऽन्यथा बालकतो मृतिः कथं भवेदमुष्यामितविक्रमस्य ॥ स्वर्गेऽपि
विख्यातगतेर्महाऽद्भुतं सम्यग्विचार्य्याहमतो विधास्ये ॥ ९७ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे
तृणावर्त्तवधो नाम विंशोऽध्यायः ॥ २० ॥ श्रीकृष्ण उवाच ॥ श्रुत्वा तृणावर्त्तवधं कंसोभूदतिदुर्म्मनाः ॥ समाहूय भृत्यवर्गानब्रवीत्ता
न्सुरद्विषः ॥ १ ॥ यूयं मम प्रियाः सर्वे तथाचातिहितैषिणः ॥ गत्वा तत्र तृणावर्त्तवधो निश्चीयतामिति ॥ २ ॥ कथं मृतो हतः
केन कुत्र वा पतितोऽभवत् ॥ दृष्ट्वा व्रजौकसो लोकान्समागच्छत मा चिरम् ॥ ३ ॥ ते यथार्थं वदिष्यन्ति विधेयन्तु समाहितम् ॥
तथेत्युक्त्वा व्रजं सर्वे समागत्य व्रजौकसः ॥ ४ ॥ अपृच्छंस्तेऽब्रुवंस्तेभ्यस्तृणावर्त्तो यथा गतः ॥ वात्यारूपधरो दुष्टो धृत्वा बालं
गतो नभः ॥ ५ ॥ क्षणादकस्मात्पतितो बालकेन सहैव तु ॥ विशीर्णसर्वावयवो ममाराश्मनि पातितः ॥ ६ ॥ को वेद केन निहतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं वा पतितः क्षितौ ॥ बालको नन्दपुण्येन मृत्योर्नहि वशं गतः ॥ ७ ॥ एवं निशम्य कंसाय प्रोच्य जग्मुः स्वमालयम् ॥
कंसो मेने तस्य वधो दुःस्वप्नादभवद्ध्रुवम् ॥ ८ ॥ विधात्रा विहितं मृत्युं कोऽपमार्ष्टुं क्षमो भवेत् ॥ व्रजे तु साधवो गोपा निवसन्ति
च वेद्म्यहम् ॥ ९ ॥ तेषां न दोषश्चास्तीह कालग्रस्तो मृतोऽसुरः ॥ अत्र शोको न कर्त्तव्यो मृत्युर्नोल्लंघ्यते क्वचित् ॥ १० ॥
घटोदरो बकाद्याश्च यदा यास्यन्ति ते गृहान् ॥ तदा विचारः कर्त्तव्यो हिताहितविधौ स्वके ॥ विचार्यैवं तदा कंसः स्वगेहमविशद्गु
तम् ॥ ११ ॥ श्रीनारद उवाच ॥ तृणावर्त्तवधात्कृष्ण किमकार्षीर्महाप्रभो ॥ तव लीलाकथा श्रोतुर्मनसोऽत्र सुखप्रदा ॥ १२ ॥
त्वत्कीर्त्तनं फलं वाचां त्वद्गुणश्रवणं श्रुतेः ॥ नेत्रयोस्तव सन्दर्शस्त्वद्भक्तानाञ्च दर्शनम् ॥ १३ ॥ पादयोर्व्रजनं तद्वत्तव तीर्थे
महोत्सवे ॥ नासिकायास्तवोत्तीर्णतुलसीगन्धसेवनम् ॥ १४ ॥ अज्ञानां तव पादाब्जजलसेकोऽखिलं फलम् ॥ अन्यथा निष्फलं सर्वं तव
प्रेमविवर्जितम् ॥ १५ ॥ देहगेहादिकं व्यर्थं श्मशानसदृशं खलु ॥ दुर्लभं मानुषं जन्म सत्सङ्गस्त्वतिदुर्ल्लभः ॥ १६ ॥ त्वत्कथाश्र
वणं सद्भिस्तत्र वाप्यतिदुर्लभम् ॥ वक्तारो बहवः सन्ति परेषां वृद्धिदा भुवि ॥ १७ ॥ दामोदरवशो भक्तो दुर्लभः खलु भूतले ॥
त्वमेव कृष्ण सर्वज्ञ त्वं मे ब्रूहि दयानिधे ॥ १८ ॥ श्रीभगवानुवाच ॥ धन्योऽसि त्वं मुनिश्रेष्ठ मत्कथाश्रवणे रतः ॥ अतस्तेऽहं
प्रवक्ष्यामि शृणुष्वावहितो मम ॥ १९ ॥ कंसः स भावनाविष्टः सुप्तश्च कशिपौ शुभे ॥ चिन्तयामास किं कार्यं मया स्वहितासि
द्धये ॥ २० ॥ सस्मार वचनं तस्या हता सा कन्यका मया ॥ तया यदुक्तं भो मन्द किं मया हतया बत ॥ २१ ॥ यत्र क्व वा समु
त्पन्नो यस्त्वां मारयिता ध्रुवम् ॥ २२ ॥ नारद उवाच ॥ किं जातं किं कृतं तेन कंसेनात्महितेच्छुना ॥ २३ ॥ श्रीकृष्ण उवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मुने कन्यां गृहीत्वा स निशीथे स्वगृहं गतः ॥ वसुदेवस्तथैवासीद्बद्धः शृङ्खलयाऽभवत् ॥ २४ ॥ ततो रुरोद सा कन्या स्वरेणोच्चैर्नि
शम्य तत् ॥ समुत्थिता द्वारपालाः कंसेनैव नियोजिताः ॥ २५ ॥ शीघ्रं कंसभिया गत्वा तदुत्पत्तिश्च चक्रिरे ॥ कंसः श्रुत्वा खड्ग
 पाणिः सहसा समुपस्थितः ॥ २६ ॥ त्यक्त्वा तु शयने मूढः सुतां पत्नीं समाययौ ॥ त्वरया धावमानोऽसौ स्खलितो न्यपतद्भुवि
॥ २७ ॥ शिरसः पतितं दूरमुष्णीषमसुरस्य हि ॥ तथाऽधरोष्ठभंगेन रक्तस्रावस्ततोऽभवत् ॥ २८ ॥ तथापि मार्गयन्गत्वा जगृहे क
न्यकाञ्च ताम् ॥ देवकी विनयेनोच्चैर्निर्जगाद तमग्रजम् ॥ २९ ॥ भ्रातस्तवानुजाहं वै कृपापात्रं दयानिधे ॥ हता मे बहवः पुत्राः कन्य
कैका प्रदीयताम् ॥ ३० ॥ निर्भर्त्स्य भगिनीं कंसो हस्तादाच्छिद्य कन्यकाम् ॥ प्रोवाचेयं निहन्तव्या मुच्यतामिति मा वद ॥ ३१ ॥
तव गर्भसमुद्भूताष्टमापत्येन मे वधः ॥ इत्युक्त्वा तां समादाय पद्भ्यामुत्थाय निर्दयः ॥३२॥ यावत्प्रक्षेप्तुकामोऽभूच्छिलापृष्ठे स दुर्मतिः ॥
तावद्धस्ताद्विनिर्गत्य सा देव्यम्बरमास्थिता ॥३३॥ बभूव दर्शनीयाङ्गी सायुधाष्टमहाभुजा॥यया संमोहितं विश्वं देहगेहसुतादिषु ॥ ३४ ॥
कुतस्स्नेहमथो याति भोक्तुं नरकयातनाः ॥ संस्तूयमाना देवौघैः सा प्रोवाच महाशठम् ॥ ३५ ॥ कंसमत्युच्चया वाचा समाभाष्य नरा
धमम् ॥ किं मया हतया मन्द किं कार्यमभवत्तव ॥ ३६ ॥ यत्र क्वचित्पूर्वशत्रुर्जातः खलु तवान्तकृत् ॥ इत्युक्त्वान्तर्हिता सद्यस्ततः
कंसोऽतिविस्मयः ॥ ३७ ॥ देवकीं वसुदेवञ्च गत्वा पाप उवाच ह ॥ वसुदेव महाबुद्धे शृणु देवकि मे वचः ॥ ३८ ॥ साधू युवां सुखं
दातुमुचितौ दुःखितौ मया ॥ अनृतं केवलं मर्त्त्यो वदेदिति विनिश्चयः ॥ ३९ ॥ देवताप्यनृतं वक्ति किं करोमि प्रतारितः ॥ यद्विश्र
म्भादहं मूढो हतवांश्च शिशूंस्तव ॥ ४० ॥ महापापस्य मे घोरा भवित्री गतिरुल्बणा ॥ वसुदेवापराधो मे क्षन्तव्यः साधुबुद्धिना॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न साधुर्दूषणं पश्येद्गुणदृष्टिरनुत्तमः ॥ साधूनां समचित्तानाममित्रोदास्तविद्विषाम् ॥ ४२ ॥ प्रसादः सर्वदा तेषामघकारिष्वपि स्फुटम् ॥ भगिनीत्थं त्वया दुःखं न कर्त्तव्यं कदाचन ॥ ४३ ॥ मृताः पुत्रास्तव शुभे को लङ्घेदन्तकं नरः ॥ गर्भाविष्टं जायमानं बालं यौवनसंस्थितम् ॥ वृद्धश्च मानवङ्कालो ग्रसत्येव न संशयः ॥ ४४ ॥ इत्थं ज्ञात्वा नैव शोकः कर्तव्यो ज्ञानिभिर्नरैः ॥ धात्रा विनिर्मितं कर्मफलं मार्ष्टुं क ईश्वरः ॥ ४५ ॥ श्रीश्वर उवाच ॥ एवं श्रुत्वा कंसवाक्यं वसुदेवोऽथ देवकी ॥ कंसमाभाष्य वचनं सुप्रसन्नौ बभूवतुः ॥ ४६ ॥ कंस नात्रापराधस्ते यद्भाव्यमभवत्खलु ॥ त्वयैवोक्तं विधातुर्हि विधानं कोतिलङ्घयेत् ॥ ४७ ॥ धात्रा दत्तं कर्मफलं भोक्तव्यं सर्वदेहिनाम् ॥ नान्योऽन्यदुःखं भुङ्क्तेऽत्र स्वयमेव हि सृज्यते ॥ ४८ ॥ विचार्यैवं ज्ञानवता परदोषो न मन्यते ॥ कंसस्तयोर्वचः श्रुत्वा तुष्टोऽगच्छन्निजालयम् ॥ ४९ ॥ राज्याभिमानतो ज्ञानं क्षणान्नष्टमभूत्पुनः ॥ कदाचिच्छयनारूढः सुतः कान्तास्तनान्तरे ॥ ॥ ५० ॥ सस्मार देव्या वचनं बालिकाया भयं गतः ॥ त्वं मारयिष्यते मूढ वृथैवोग्रमनन्तव ॥ ५१ ॥ इति सञ्चिन्त्य मनसा स विचारपरोऽभवत ॥ बकीपतिश्चेदायाति ह्यघासुरबकासुरौ ॥ ५२ ॥ आगच्छतस्तदा कार्यं विचार्य सुहितम्मिथः ॥ बकीवधविषादेन ते स्वपन्ति विमोहिताः ॥ ५३ ॥ एवं निश्चित्य संसुतः पुनरेव महाबलः ॥ एकदाहं तदुत्सङ्गे वर्त्तमानो महामुने ॥ ५४ ॥ अचिन्त्यं दर्शयामि निजाङ्गस्यातिगौरवम् ॥ सा पश्यन्ती मम मुखं चुम्बन्ती च पुनः पुनः ॥ ५५ ॥ लालयन्ती वचोभिश्च हसतो वदनं मम ॥ यावच्चुम्बितुमुद्युक्ता पुनः स्नेहभराप्लुता ॥ ५६ ॥ तावद्ददर्श वदने ब्रह्माण्डमखिलं ततः ॥ जङ्गमं स्थावरं विश्वं भुवनानि चतुर्दश ॥ ॥ ५७ ॥ साद्रिद्वीपाब्धिभूगोलं खगोलं ज्योतिषां गणम् ॥ वनान्युपवनान्येव नदीनगरसंघकान् ॥ ५८ ॥ दृष्ट्वा मम मुखे माता सद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसीत्सुविस्मिता ॥ निमील्य नयने चैव भीता दध्यौ परं हि माम् ॥ ५९ ॥ बुद्धया निश्चित्य तनुजं भाराशक्ता तदा जहौ ॥ अतः परञ्च जानुभ्यां सपाणिभ्यां चलन्नहम् ॥ ६० ॥ सुखमत्यन्तमगममकथ्यं वचनेन हि ॥ मात्रा मे किङ्किणीजालमाबद्धं कटिपादयोः ॥ ६१ ॥ गच्छंस्तद्रवमाश्रुत्य प्राद्रवं द्रुतमद्भुतम् ॥ तादृशं माञ्च पश्यन्त्यो गोप्यो मुमुदिरे भृशम् ॥ ६२ ॥ धावन्पात्रं जलं चान्यद्वस्तुजातं स्पृशाम्यहम् ॥ तत्रतत्र जनन्या मे हाहाशब्दमथोच्यते ॥ ६३ ॥ इदञ्च स्थापितं वस्तु देवपूजार्थमेव हि ॥ समाप्य पश्चाद्दास्यामि तिष्ठ मा स्पर्शनं कुरु ॥ ६४ ॥ एवं मातुर्वचः श्रुत्वा निवृत्तोपि पुनर्मुने ॥ तद्दृष्टिमन्तरेणैव तद्द्रव्यमस्पृशं तथा ॥ ६५ ॥ समागत्य वदेन्माता किं कृतं तात ते द्रुतम् ॥ ममाक्रोशभयान्माता न ताडयति मां क्वचित् ॥ ६६ ॥ अतिस्नेहवती यस्मादेकपुत्रपरायणा ॥ मेति[1] वाक्यं स्फुटं वच्मि अस्पष्टमखिलं पुनः ॥ ६७ ॥ मम वाक्यविनोदेश्च पितरौ मुदमापतुः ॥ कदाचिद्रोषमादाय विलुण्ठामि धरातले ॥ ६८ ॥ अल्पेन प्रतिवाक्येन सुप्रसन्नो भवाम्यहम् ॥ जननी प्रीतिसंयुक्ता न त्यजत्येव मां क्वचित् ॥ ६९ ॥ कृशानुकण्टकफणिस्पर्शभीता निरन्तरम् ॥ भुञ्जाना मां भोजयते पिबन्ती पाययत्यपि॥७०॥ मय्यर्प्य पूर्वं सा भुङ्क्ते यत्किञ्चित्प्रियमात्मनः ॥ तथा नन्दोऽपि नो भुङ्क्ते मां विन वस्तु किञ्चन ॥ ७१ ॥ स्वाभाविकी तयोर्भक्तिरासक्तिप्रेमातियन्त्रिता ॥ आगच्छन्ति यदा गोप्यो विलोक्य वदनं मम ॥ ७२ ॥ प्राप्नुवन्ति मुदं नूनं पश्यन्त्योऽपि पुनः पुनः ॥ दृष्ट्वा चिरं प्रगच्छन्ति तासां पश्चाद्व्रजाम्यहम् ॥ ७३ ॥ किङ्किणीरवमाश्रुत्य पश्यन्त्यावृत्य गोपिकाः ॥ तदा पलायनं कृत्वा मातुरङ्के विशामि च ॥ ७४ ॥ परीत्य कौतुकेनालं पुनरायांति गोपिकाः ॥ इति व्रजेऽनेकविधां कुर्वँल्लीलां

१ 'मा' इत्यव्यक्तवाग्बालकभाष्यमाणशब्दानुकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रजौकसः ॥ ७५ ॥ सुखयामि मुने नित्यं गोपान्गोपींश्च गोकुले ॥ अचिरेणैव कालेन पद्भ्यामेवाचरं पुनः ॥ ७६ ॥ तदा चलस्वभावेन गोपिकागृहमाविशम् ॥ प्रतिगेहं स्वभावेन यद्यत्कर्म्म कृतं मया ॥ ७७ ॥ तत्तद्गोप्यो यशोदायै कथयन्ति पुनः पुनः ॥ गर्गो यदूनां हि गुरुः पूज्यः सर्वप्रभुर्मुनिः ॥ ७८ ॥ कदाचिद्वसुदेवेन समाहूय निमन्त्रितः ॥ भोजितः परमान्नेन दत्त्वा ताम्बूलदक्षिणाम् ॥ ७९ ॥ तुष्टं गुरुं निरीक्ष्याथ प्राह शौरिः परं वचः ॥ यथा कृष्णस्य जननं नन्दो वेत्तुं न मद्गृहे ॥८०॥ न कोऽपि नामकरणं मुने वेत्तु त्वया कृतम् ॥ (तथा त्वया विधातव्यं तत्र गत्वा महामुने) तथैव ते कारिष्यामीत्युक्त्वा प्रचलितो मुनिः ॥ ८१ ॥ व्रजमेत्याथ नन्दस्य विवेश भवनोत्तमम् ॥ नन्दोऽपि दूरात्तं वीक्ष्य सर्वविद्याविशारदम् ॥ ८२ ॥ समुत्थाय ततः शीघ्रं ननाम भुवि दण्डवत् ॥ दत्त्वासनञ्च पाद्याद्यैः पूजयामास तत्त्ववित् ॥ ८३ ॥ भोजितं परमान्नेन तथान्यद्रव्यसम्पदा ॥ ताम्बूलं दक्षिणां दत्त्वा तदोवाच हि तं मुनिम् ॥ ८४ ॥ नन्द उवाच ॥ सतां प्रवेशमात्रेण शुद्ध्यन्ति मलिना इह ॥ दर्शनैः स्पर्शसंलापकरणैः पापिनो जनाः ॥ ८५ ॥ तेषां गृहाभिगमनं गृहस्थानां शुभोदयम् ॥ भवेद्ब्रह्मन्भाग्यचयैरनाहूता विशन्ति हि ॥ ८६ ॥ कृपापरा भवन्तश्चापुण्यकर्मफलं ततः ॥ आवश्यककुटुम्बादिपोषणाकुलचेतसाम् ॥ ८७ ॥ नाशयन्ति समागत्य ततोत्यन्तं सुखं भवेत् ॥ गृहस्थकर्मससंक्तैरपूर्णैरस्मदादिभिः ॥ ८८ ॥ किं पूज्यसे महाभाग तथाप्याज्ञापयस्व माम् ॥ करवाणि तवाज्ञां कां वदस्व मुनिसत्तम ॥ ८९ ॥ ज्योतिःशास्त्रं प्रदीपं हि जन्मत्रयप्रकाशकम् ॥ श्रीमतां तत्तु विदितं कृतं चानेकधा हि तत् ॥ ९० ॥ वसुदेवस्य रोहिण्यां जातः पुत्रोत्र वर्त्तते ॥ ममापि तनयो जात उभयोः पश्य जातकम् ॥ ९१ ॥ गर्गोऽथ नन्दस्य वचो निशम्य प्रोवाच कंसोऽतितरामसाधुः ॥ कदाचिदाशंक्य निपत्य हन्याद्भवेत्तदानी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनयो महांश्च ॥ ९२ ॥ ॥ इति श्रीआदिपुराणे नारदशौनकसंवादे गर्गागमनं नामैकविंशोध्यायः ॥ २१ ॥ नन्द उवाच ॥ रहःस्थितो
मामकैश्च ह्यज्ञातोस्मिन्गृहे मम ॥ अनयोर्नामकर्मादि कुरुष्व सुसमाहितः ॥ १ ॥ गर्ग उवाच ॥ ॥ एवं चेत्तर्हि निश्चित्य संस्कारमनयो
र्द्वयोः ॥ करोमि कुलयोग्यं वै मा विलम्बं वृथा कृथाः ॥ २ ॥ कन्यकावचनं श्रुत्वा स्मृत्वा बालौ च संस्कृतौ ॥ मन्यते वसुदेवस्य पुत्रावत्र
व्रजे स्थितौ ॥ ३ ॥ आगत्य क्रोधपूर्णश्च मारयेदनयो महान् ॥ अतो रहस्थिते गेहे संस्कार्य्यावर्भकाविमौ॥४॥ परं सुदिनमद्यैव भवाद्य कृत
मङ्गलः ॥ पत्न्या सह समागच्छ आरभस्वोचितां क्रियाम् ॥ ५ ॥ भगवानुवाच ॥ श्रुत्वा नन्दोपि गर्गस्य वचनं सर्वमाचरन् ॥
रहो यशोदया सार्द्धं गर्गान्तिकमुपागमत्॥ ६ ॥ गर्गोऽपि बालकं वीक्ष्य उवाच परमं वचः ॥ एतयोर्जन्मभं सर्वगुणयुक्तं समीक्ष्य च ॥७॥
ग्रहाश्च शोभनफलसूचकाः सर्व एव हि ॥ अवतारे यथा विष्णोस्सुशुभग्रहराशयः ॥ ८ ॥ विष्णुरात्मनि संलीनं विश्वमीक्ष्य सिसृक्षया ॥
सुप्तशक्तिषु सर्वासु जगृहे रूपमैश्वरम् ॥ ९ ॥ वीक्ष्य भूमिं भराक्रान्तामसुरैर्नृपरूपिभिः ॥ स्तुतो ब्रह्मादिभिर्देवैः सूक्तैः पुरुषसंज्ञितैः
॥ १० ॥ तदा प्रसन्नो भगवानुवाचाथ नभोगिरा ॥ भो देवाः सर्वमेवैतद्दुःखं ज्ञातं मया भुवः ॥ ११ ॥ तदर्थं यत्नवानस्मि यूयं शृणुत मे
वचः ॥ अवतीर्णा यदोर्वंशे भवन्तु सह भार्यया ॥ १२ ॥ अहमप्यात्मनोंऽशेन शेषेण धरणीतले ॥ अवतारं विधायाशु हरिष्यामि
भुवो भरम् ॥ १३ ॥ कीर्त्तिं वितत्य लोकेषु गमिष्यामि निजं पदम् ॥ मत्कीर्त्तेः श्रवणं कृत्वा नराणां पापराशयः ॥ १४ ॥ विलयं
यान्त्यतो लोके ह्यवतारान्करोम्यहम् ॥ विचरिष्याम्यहं यावत्तावद्रूपमवास्थितः ॥ १५ ॥ सा योगमाया देवक्या गर्भमाकृष्य बाल
कम् ॥ सन्निधास्यति रोहिण्यां मां च नन्दालये शुभे ॥ १६ ॥ तत्रानेकविधां लीलां कृत्वा गोकुलमध्यगः ॥ पुनश्च यमुनावारिबृहद्वृन्दाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नादिषु ॥ १७ ॥ यां श्रुत्वापि मुदं गच्छेर्तिक पुनर्दर्शनेन हि ॥ एवं निशम्याथ विधिर्देवानाह पुरस्थितान् ॥ १८ ॥ देवाः शृणुत वाक्यं मे यदाह परमेश्वरः ॥ श्रुत्वा कुरुत तद्वाक्यं जायन्तां यादवे कुले ॥ १९ ॥ तत्रैव भगवान्विष्णुरंशेनावतरिष्यति ॥ इत्युपादिश्य धातापि देवान्स्वं लोकमागमत् ॥ २० ॥ ततो यदुकुले देवा अवतीर्णा वसन्ति हि ॥ वसुदेवसुतो यो वै गर्भ संकर्षणाद्भुवि ॥ २१ ॥ संकर्षणेति नाम्ना च बलाधिक्याद्बलस्तथा ॥ बलभद्रो बलदेवः सीरपाणिर्हलायुधः ॥ २२ ॥ लोकानां रमणाद्रामस्तालांको मुसलायुधः ॥ बालस्तवानन्दकरो लोकानां यद्भविष्यति ॥ २३ ॥ नन्दनन्दन इत्येषोऽनन्तोऽनन्तगुणादपि ॥ हृदये सर्वभूतानां प्रेम्णा वसति सर्वदा ॥ २४ ॥ वासुदेव इति ख्यातो भविष्यति न संशयः ॥ नराणामाश्रयत्वाच्च नारायण इति स्मृतः ॥ ॥ २५ ॥ प्रवृत्तिश्च निवृत्तिश्चाप्युभे वै कृष्णसंज्ञिते ॥ कर्षणात्कृष्णनामायं विख्यातो विष्णुसंज्ञकः ॥ २६ ॥ हृषीकाणामिन्द्रियाणामानन्दकरणाद्विभुः ॥ हृषीकेशो गोषु गच्छन्गोविन्द इति विश्रुतः ॥ २७ ॥ दाम चैवातिविततमुदरे यस्य वर्त्तते ॥ दामोदर इति ख्यातो विगता कुण्ठतास्य च ॥ २८ ॥ विकुण्ठ एव वैकुंठः सर्वार्तिहरणाद्धरिः ॥ उरुभिर्गीयमानश्च यद्यशोऽस्य भविष्यति ॥ २९ ॥ उरुगाय इति स्थानाच्च्यवनादच्युताभिधः ॥ बहुना किमिहोक्तेन नानानन्तगुणो ह्यसौ ॥ ३० ॥ अनन्तकर्माऽनन्तश्रीस्तथैवानन्तरूपवान् ॥ नामान्यस्य भविष्यन्ति गुणः कर्माकृतिर्यथा ॥ ३१ ॥ युगेयुगेऽवतारस्य त्रयो वर्णा युगानुगाः ॥ कृते शुक्लो धर्ममूर्तीं रक्तस्त्रेतायुगे क्रतुः ॥ ३२ ॥ विरिञ्चिभवमुख्याश्च यस्य मायावशीकृताः ॥ स एवायं वशे भक्तैः कृतो भक्त्या निरन्तरम् ॥ ॥ ३३ ॥ तस्मादीश्वर एवासौ यदि ते पुत्रतां गतः ॥ परित्यजेश्वरज्ञानं पुत्रपुत्रेति तं शुभम् ॥ ईश्वरेच्छैव भक्तानां पालनीया प्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्नतः ॥ ३४ ॥ श्रीकृष्ण उवाच ॥ ॥ इति नन्दमुपादिश्य पूजितोऽभिययौ मुनिः ॥ नन्दो मां मुदितो विश्वं ज्ञातवान्परमेश्वरम् ॥
 ॥ ३५ ॥ मुनौ विनिर्गते नन्द आत्मानं पूर्णमाशिषाम् ॥ मेने मया यद्विहितं शृणुष्व मुनिसत्तम ॥ ३६ ॥ यदा प्रचलितः पद्भ्यां
गोपिकाप्रेमयन्त्रितः ॥ तासां प्रतिगृहं गच्छन्नानाचेष्टामचीकरम् ॥ ३७ ॥ तासांतु मय्यभूत्प्रेम दिनानुदिनमृद्धिमत् ॥ नन्दालये
च गमनं विना कार्यं विनाऽदरम् ॥ ३८ ॥ निधाय भाण्डमन्यत्र त्वदानयनकैतवात् ॥ भित्त्वा पात्रं मया भुक्तं घृतं दध्या
दिकञ्च यत् ॥ ३९ ॥ पुनः पात्रमभग्नं तद्दृष्टं गोरसपूरितम् ॥ नानाबालविनोदेन तासां हृष्टमभून्मनः ॥ ४० ॥ यशोदा बाल
रूपं मां निश्चिनोति निरन्तरम् ॥ कदाचिदहमेवासां गृहं गच्छामि नारद ॥ ४१ ॥ बालकैर्गोपकैः सार्द्धं विनोदाधिक्यसिद्धये ॥
या नार्पयत्यहं तस्या बलादप्याद्मि गोरसम् ॥ ४२ ॥ भक्ता मह्यं प्रयच्छन्ति भक्ते भोगं ददाम्यति ॥ पूर्वं निवेदितं भक्तैर्देहागारसुतादि
कम् ॥ ४३ ॥ तेषां यत्किञ्चिदस्तीह धनं मे तत्र चान्यथा ॥ व्रजे बालविनोदेन सर्वं गृह्णामि तद्वसु ॥ ४४ ॥ मोहशोकौ क्रोधलोभौ
क्रूरत्वं मदमत्सरौ ॥ न सन्ति मम भक्तानामतो मोदो व्रजौकसाम् ॥ ४५ ॥ शिक्यस्थितं समालोक्य गोरसं तज्जिघृक्षया ॥ पीठोलू
खलमाश्रित्य तदारुह्य मया हृतम् ॥ ४६ ॥ भुक्तं किञ्चित्तथा दत्तं बालकेभ्यस्तदेव च ॥ शेषं निक्षिप्य भूमौ वाऽगमं तत्र गृहाद्गृहम् ॥
॥ ४७ ॥ गृहेश्वरी गृहस्थो वा प्रविश्यालोक्य चेष्टितम् ॥ भग्नं क्षितं हृतं द्रव्यं दृष्ट्वा संक्रोशते भृशम् ॥ ४८ ॥ केन मेऽपहृतं द्रव्यं
दधिदुग्धादिकं सखि ॥ समीपस्था वदत्येषा नन्दपुत्रो गतोऽधुना ॥ ४९ ॥ आगतः सखिभिः सार्द्धं बालकैश्च समन्वितः ॥ भुक्त्वा पी
त्वाथ दत्त्वा च गतो नूनं विलोक्यते ॥ ५० ॥ वक्तुं समुद्यताऽहं त्वा केनचिन्मुद्रितं मुखम् ॥ इति वार्त्तां वदन्तीं तां समीपस्थां सखीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु सा ॥ ५१ ॥ गृहीत्वा दर्शयामास गोपिकां निजमन्दिरम् ॥ यावद्विशति सा द्रष्टुं कृष्णप्रभवचेष्टितम् ॥ ५२ ॥ तावत्तस्या गृहं गत्वा तथैवाचरितं मया ॥ पुनरागत्य सा गेहमात्मनस्तत्र चाखिलम् ॥ ५३ ॥ मयैवापहृतं द्रव्यं वीक्ष्य गोपी सुविस्मिता ॥ तदाक्रोशं कृतवती केनागत्य कृतं त्विदम् ॥ ५४ ॥ अधुनैव गता गेहादन्यस्या गहमीक्षितुम् ॥ मम गेहेऽखिलः केन नाशितो भाण्डगोरसः ॥ ५५ ॥ कुण्डोपघृतपात्राणि विक्रेतुं संव्रजाम्यहम् ॥ गृहेगृहे समाक्रोशः कृतः स्त्रीभिः परस्परम् ॥ ५६ ॥ तत एवाथ ताः सर्वा मातरं वक्तुमुद्यताः ॥ अभिजग्मुस्ततः सर्वा यशोदायै निवेदितुम् ॥ ५७ ॥ वीक्षितुं मुखपद्मं मे कर्म चात्यन्तमद्भुतम् ॥ आगत्योचुर्यशोदायै मत्कर्म बलसूचकम् ॥ ५८ ॥ ॥ गोप्य ऊचुः ॥ हे यशोदे महाभागे नन्दपत्नि-वरानने ॥ शृणु पुत्रकृतं कर्म यदस्माभिर्निगद्यते ॥ ५९ ॥ त्वद्गृहे शिशुरेवायं साधुवत्स विदृश्यते ॥ यत्करोत्यात्मजोऽयं ते कोपि वक्तुं न तत्क्षमः ॥ ६० ॥ प्रविशन्तं न पश्यामः कदा प्रविशति ह्यसौ ॥ प्रविश्य भुङ्क्ते दध्यादि भोजयत्यन्यबालकान् ॥ ६१ ॥ रिक्तपात्रमथाक्षिप्य भूमौ याति निरन्तरम् ॥ कुत्रापि दृश्यते नैव पश्चादन्ये वदन्ति हि ॥ ६२ ॥ यदा किंचिन्न लभते रोदायित्वाऽथ बालकान् ॥ विधाय विपुलं क्लेशं याति शीघ्रमलक्षितः ॥ ६३ ॥ उपायानाखिन्वेत्ति चौरवृत्त्या च शङ्कितः॥ उच्चैः संवीक्ष्य पीठाद्यैर्विरचय्य विधिं स्वयम् ॥६४॥ अधिरुह्य वयस्यांसे गृह्णाति द्रव्यभाजनम् ॥ विभज्य वानरेभ्योऽथ बालेभ्यः स्वयमत्ति च ॥६५॥ आरुह्य गोपकस्यांसे भित्त्वा भाण्डं प्रयात्यसौ ॥ यदाक्रोशनमत्युच्चैः कुर्मः स हसति स्फुटम् ॥ अद्य बालतनुर्मातः किमग्रेऽसौ करिष्यति ॥ ६६ ॥ श्रीकृष्ण उवाच ॥ गोपीष्वेवं वदन्तीषु शृण्वन्त्यां मम मातरि ॥ न वदामि न पश्यामि यशोदाभयशंकितः ॥ ६७ ॥ गोपीनां वचनं श्रुत्वा यशोदा किं वदेदिति ॥ अधोदृष्ट्या प्रपश्यामि पुनर्वाचो वदन्ति ताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६८ ॥ लिप्तेषु चित्रितेष्वेव भवनेषु तवात्मजः ॥ करोति मेऽन्यथा याति नाना भीत्या प्रतर्जनैः ॥ ६९ ॥ बालकान्प्रेष्य पात्राणि
चास्फोटयति कुत्रचित् ॥ एवं प्रकुरुते प्रातः प्रत्यहन्तु तवात्मजः ॥ ७० ॥ किं कुर्मः कुत्र गच्छामो यशोदे वारयात्मजम् ॥ इति
श्रुत्वा यशोदा च प्राह गोपीः समन्ततः ॥ ७१ ॥ अहो मेऽद्भुतमाभाति ह्येतासां वचने ध्रुवम् ॥ गृहे भवति बालोऽसौ न कुत्रापि च
गच्छति ॥ ७२ ॥ हा विभीतो न वै याति परगेहं पुनः कुतः ॥ प्रातः केन क्रमेणासौ यय़ं विभ्रान्तबुद्धयः ॥ ७३ ॥ भवतीनां मनो यादृ
क्तथा बाले निगद्यते ॥ वृथा परापराधेन को लाभो वा भविष्यति ॥ ७४ ॥ युष्माकमाशीर्वचनैर्बालकः समभून्मम ॥ वद्धयोंऽमोघाभि
राशीर्भिर्न चाक्रोश्यः कदाचन॥७५॥ आक्रोशवाक्ये मम चेन्मनोऽतीव भयाकुलम्॥किं पुनश्चास्य बालस्य स्वभावात्सौम्यरूपिणः॥७६॥
बालकोऽयं मम प्राणः किं वेत्ति व्रजयोषितः ॥ नापराध्यति कस्मैचित्किं वा सर्वा वदन्ति मे ॥ ७७ ॥ ततोऽहमब्रुवं किञ्चिद्रुदिव विमो
हयन् ॥ वचनं श्रोत्रसुखदं तासामपि मनोहरम् ॥ ७८ ॥ कुत्रत्याः क्व गृहं मातश्चैतासां न च वेद्म्यहम् ॥ वृथा जल्पन्ति जननि प्राग
तोऽत्र समागताः ॥ ७९ ॥ अहं बिभेमि सततं वानरेभ्यः कुसङ्गिनः ॥ तान्वानरान्सखीनेता वदन्त्येवातिविभ्रमात् ॥ ८० ॥ त्वयैकस्मि
न्दिने मातर्वानराद्भीषितो यतः ॥ तत आरभ्य कुत्रापि न गच्छामि गृहान्तरात् ॥ ८१ ॥ पीत्वा स्तनन्तु तृप्तः संस्तवोत्संगगतो ह्यहम् ॥
क्व गतो गृहमेतासां कश्च भुक्तस्तु गोरसः ८२ ॥ त्वया गृहे यन्महता दीयते तु प्रयत्नतः ॥ तन्मे न रोचते चौर्य्यं कथमन्यगृहे कृतम्
॥ ८३ ॥ ध्रुवं मिथ्या वदन्त्येताः परकीयमहं गृहम् ॥ न वेद्मि किं प्रजल्पन्ति प्रत्यक्षं त्वं विचारय ॥ ८४ ॥ यावत्पिता गृहे तिष्ठे ॥४६॥
त्तावन्मां लालयत्यसौ ॥ पश्चात्त्वमेव मां मातर्न मुञ्चसि कदाचन ॥ ८५ ॥ तवांगुलिमथालम्ब्य प्रविशामि गृहान्तरम् ॥ गृहाद्बहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वापि तथा त्वया सार्द्धं व्रजाम्यहम् ॥ ८६ ॥ एता ब्रुवन्ति सखिभिः सहास्माकं गृहं गतः ॥ सखायः स्वगृहे सन्ति वानराश्च वनान्तरे ॥ ८७ ॥ अहं तवान्तिके नित्यं किमुन्मत्ता वदन्ति वै ॥ यदि बाला सखायो म आयान्ति क्रीडिते तदा ॥ गृहांगणे गृहद्वारि क्रीडा भवति नान्यतः ॥ ८८ ॥ गेहं गन्तुं चोत्सुका व्रीडिताश्च ह्येतच्छ्रुत्वा गोपिकास्तास्समस्ताः ॥ वचो नोचुः किञ्चिदेवोत्तरं वा ह्यात्मभ्रान्तिं मेनिरे तास्तदा हि ॥ ८९ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकसंवादे कृष्णचौर्यवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीभगवानुवाच ॥ श्रुत्वा तथा मम वचो यशोदा संशयं गता ॥ गोपिकानां सविनयं समाधानमथाकरोत् ॥ १ ॥ भवतीनां वचः सत्यं यद्ब्रुवन्ति समागताः ॥ नायं ममैव बालोऽयं युष्माकमपि नान्यथा ॥ २ ॥ स्वकीयबालककृतैरपराधैर्न पीड्यते ॥ इति तद्व चनं श्रुत्वा वदनं वीक्ष्य मे चिरम् ॥ ३ ॥ यशोदा मानितास्ताश्च स्वगृहाण्यभितो ययः ॥ हसन्त्यः कथयन्त्यश्च यशोदावचनादलम् ॥ ४ ॥ धन्यं जनुर्यशोदाया यस्या बालोऽयमीदृशः ॥ किशोरवयसास्मभ्यं यशोदानिकटे शिशुः ॥ ५ ॥ ब्रूते किं कारणं तच्च न विद्मस्तस्य चेष्टितम् ॥ अस्पष्टं वचनं वक्ति त्वरया न चलत्यपि ॥ ६ ॥ अस्माकमेव वचनं मिथ्या च कुरुतेऽखिलम् ॥ यशोदाऽपि च प्रत्येति तद्वचः सर्वमेव हि ॥ ७ ॥ किं कुर्मः कथयामः क कः प्रत्येष्यति नो वचः ॥ आगमिष्यति चेदस्मद्गृहं बालः पुनः पुनः ॥ ८ ॥ तं गृह्णीमो बलाद्गोप्यो यथीभूय व्रजाबलाः ॥ गृहीत्वा तं नयिष्यामस्तदा किं कथयिष्यति ॥ ९ ॥ यस्या गृहे विशत्यद्य दत्त्वा गेहे कपाटकम् ॥ स्वाक्रोशन्तु भृशं सर्वा आयास्यामो द्रुतं श्रवात् ॥ १० ॥ सख्यो गच्छति श्रीकृष्णः शीघ्रं कृत्वा पलायनम् ॥ ततोप्येनं ग्रहीष्यामः करिष्यामो मनोगतम् ॥ ११ ॥ यास्यामः सदनं नीत्वा यशोदायाः पुनर्व्वयम् ॥ वक्ष्यामः खलु तं तस्मै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा सा किं वदिष्यति ॥ १२ ॥ इदमेव परं कार्यं कथयित्वा गृहं गताः ॥ रात्रौ ताः शयने सुप्ता ददृशुस्तत्तदेव हि ॥ १३ ॥
काचिद्गृह्णाति मामङ्के समालिङ्गति चुम्बति ॥ काचित्पश्यति मे कान्तं मुखमत्यन्तमद्भुतम् ॥ १४ ॥ काचिद्यशोदापुरतो ब्रूते बालस्य
चापलम् ॥ काचिदालक्ष्य हसति मन्मुखं मदनाकुला ॥ १५ ॥ सुमनागपि गोपीनामन्तरायो न विद्यते ॥ तथा जाग्रदवस्थायां
तथा स्वप्ने महत्सुखम् ॥ १६ ॥ व्यतीतायां निशायान्तु प्रातरेवाहमुत्सुकः ॥ सखीनाहूय सकलानिदं वचनमब्रुवम् ॥१७॥ भोः सखायः
शृणुध्वं मे वचनं यद्ब्रवीमि वः ॥ पलायितेषु सखिषु मां ग्रहीष्यन्ति गोपिकाः ॥ १८ ॥ पलायनं विधास्यामि तासां पाणिगतोप्यहम् ॥
गृहीतो बहुशस्ताभिरुन्मुच्यापि पलायितः ॥ १९ ॥ करिष्येऽनेकशः क्रीडास्ताभिः सह मनोरमाः ॥ ते मामूचुर्गोपबाला राम कृष्ण त्वया
सह ॥ २० ॥ भोक्ष्यामस्तत्र गत्वा च न तिष्ठामो भये सति ॥ तावत्ते संगिनो नूनं यावन्नायांति गोपिकाः ॥ २१ ॥ दृष्ट्वा गोपी
रुपैष्यामः पलाय्य निजमन्दिरम् ॥ इति तेषां वचः श्रुत्वा गोपास्तानहमब्रवम् ॥ २२ ॥ ज्ञातं मया यदुक्तं वै का शक्तिश्चरतामिह ॥
अहमेव बलं बुद्धिरहमेव स्वलंक्रिया ॥ २३ ॥ अहं गमिष्ये गोपीनां गृहेष्वेवं विनिश्चितम् ॥ एष्यन्ति चेन्मयि गते गोप्यो वेष्टयितुं
बलात् ॥ २४ ॥ तदात्मानं विमोक्ष्यामि भवन्तो यान्तु बालकाः ॥ वर्त्तमाना भवेन्नैव गृहिणी यत्र सद्मनि ॥ २५ ॥ तत्र प्रविश्य
भोक्तव्यमस्माभिर्गोपबालकाः ॥ व्रजमध्ये चरिष्यामो वीक्षमाणाः परस्परम् ॥ २६ ॥ विलोक्यैव गृहं शून्यं प्रवेक्ष्यामो द्रुतं वयम् ॥
एवं विचार्य कस्याश्चित्प्रविष्टोहं गृहान्तरम् ॥ २७ ॥ गोपी गृहं प्रविश्याथ मामुवाचागतो भवान् ॥ केशेष्वद्य गृहीत्वा त्वां यामो मातु
स्तवान्तिकम् ॥ २८ ॥ तदाहं लज्जितस्तस्या वचनश्रवणेन हि ॥ भ्रामिता मोहिता सान्यत्रावोचत्किञ्चिदेव न ॥ २९ ॥ तया कैतव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रेण गोपीभिर्मन्त्रितं यथा ॥ गृहीतमखिलं तस्याः पश्यन्त्यप्यवदन्न च ॥ ३० ॥ वयं भुक्त्वा च पीत्वा च यदा गन्तुं समुद्यताः ॥ तदा पप्रच्छ मां गोपी कथं कृष्ण समागतः ॥ ३१ ॥ सुमुख स्थीयतां तात मद्गृहं शोभितं कुरु ॥ मया चोक्तमहं मात्रा ताडितो बहुशो गृहे ॥ ३२ ॥ क्षुधितोऽहं प्रदेयन्ते किञ्चिच्च भोजनं मम ॥ सखायश्चागता नेतुं क्षुधार्त्तो न व्रजाम्यहम् ॥ ३३ ॥ सा सत्यमिति मत्वैव मोहिता मद्वचःश्रवात् ॥ उत्तार्य्य पात्रे गव्यञ्च बहुशोदात्सुसंस्कृतम् ॥ ३४ ॥ मया च भुक्तं सखिभिः ततोन्यस्या गृहं गतः ॥ बहिर्मयि गते सा च मोहमाप व्यचिन्तयत् ॥ ३५ ॥ किं मया मन्त्रितं मार्गे गोपीभिः किमिदं कृतम् ॥ पश्यन्त्या मे हृतं गव्यं सखिभ्यश्च समर्पितम् ॥ ३६ ॥ भुक्त्वा पीत्वा गताः सर्वे ह्यहो मे बुद्धिमोहनम् ॥ कृतमासीत्प्रपश्यन्त्या गतेष्वथ करोमि किम् ॥३७॥ पुनरेष्यन्ति चेदत्र करिष्यामि निजं हितम् ॥ अथाऽन्यासदने चाहं प्रविष्टः सखिभिः सह ॥ ३८ ॥ यावदुत्तार्य्य तद्गव्यं भोक्तुमेव समुद्यताः ॥ तावत्प्राता गृहं गोपी द्वारमारोध्य संस्थिता ॥ ३९ ॥ उवाच सास्मान्के यूयं मद्गृहं समुपागताः ॥ तदाहमब्रुवं तस्यै वञ्चयन्नथ युक्तिभिः ॥ ४० ॥ पित्रा नन्देन मात्रा च प्रेषितस्तव सन्निधौ ॥ अतिथिर्मे मुनिः कश्चित्सह शिष्यैरुपागतः ॥ ४१ ॥ दधिदुग्धादि यत्किञ्चिद्भवेदद्य तवालये[1]॥ चिरं स्थितो भवद्गेहे भवती न गृहे स्थिता॥ ४२ ॥ साऽब्रवीन्मां मया वस्तु सर्वं तुभ्यमिहार्पितम्॥ गोरसस्तु कथं रक्ष्यस्तावके गृहवस्तुनि ॥ ४३ ॥ इत्युक्त्वा दधिदुग्धादि ददौ कैतववञ्चिता ॥ मया च समुपादाय सखिभिर्द्वारि प्रापितम् ॥ ४४ ॥ तत्र पीतश्च भुक्तश्च तावत्सा च समागता ॥ पप्रच्छ किं हृतं बाला भवद्भिर्वञ्चितास्मि किम् ॥ ४५ ॥ कथयामि यशो

१ तद्देहीति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४८॥ दाये यत्कृतं मम वञ्चनम् ॥ मयोक्तं मुनिरेवाहं शिष्येभ्योऽपि च पायितम् ॥ ४६ ॥ तदातिरोषिता गोपी तत्र व्याक्रोष्टुमुद्यता ॥ पश्य
ध्वं कैतवोक्त्याहं वञ्चिता बालकेन वै ॥ ४७ ॥ पूर्वस्मिन्दिवसेऽस्माभिर्विचारः परमः कृतः ॥ विद्राविते मयाद्यैवं शृण्वन्त्या चास्य
भाषितम् ॥ ४८ ॥ गोप्यः पश्यन्तु बालानां चेष्टितं सदने मम ॥ इति ता वचनं श्रुत्वा प्रहस्याऽखिलगोपिकाः ॥ ४९ ॥ समु
द्यतास्ता मां धर्त्तुं वयं शीघ्रं पलायिताः ॥ ताः प्रहस्याऽब्रुवन्भूयो भूयस्तच्चेष्टितं मम ॥ ५० ॥ गतं तद्गतमेवास्तु कर्त्तव्यं किं मयाधुना ॥
बुद्धिरुत्पद्यते नृणां समये निर्गते सति ॥ ५१ ॥ एवं निगदमानास्ता प्रययुः स्वं स्वमालयम् ॥ ततो गतोऽहमन्यस्या भवनं सखिभिः
सह ॥ ५२ ॥ दृष्ट्वा तद्गृहिणीशून्यं प्रविष्टोऽभ्यंतरं गतः ॥ दधिदुग्धसमाकीर्णं नवनीतञ्च यत्स्थितम् ॥ ५३ ॥ नानारसविशेषैश्च पक्वा
न्नादियुतैः शुभैः ॥ विलोक्याहं भृशं प्रीतः सखायो मुदिता मम ॥५४॥ निविष्टा मण्डलीकृत्य वीक्षमाणा मुहुर्मुहुः ॥ दत्त्वा द्वारि कपाटञ्च
ह्यखादिष्म यथेच्छया ॥ ५५ ॥ तद्गृहस्येश्वरी द्वारं दृष्ट्वा बद्धकपाटकम् ॥ उच्चैराक्रोशनञ्चक्रे को ममास्ति गृहान्तरे ॥ ५६ ॥ मोच
याशु कपाटं वै प्रविशामि गृहे निजे ॥ इति सा द्वारि संरावमकरोद्गोपबालकैः ॥ ५७ ॥ तावद्भुक्तं यथेष्टञ्च मया च प्रीतमानसैः ॥
अहं जानामि मां सौम्य किं करिष्यति गोपिका ॥ ५८ ॥ सा समुत्तीर्य सदनं प्रविश्यापश्यदालये ॥ दधि दुग्धञ्च पक्वान्नं न किञ्चि
दवशेषितम् ॥ ५९ ॥ भुक्त्वा पीत्वा भुवि क्षिप्त्वा भाण्डं भग्नं कृतं च तैः ॥ दृष्ट्वा चुक्रोश सदनेऽब्रवीदानीय बल्लवी ॥ ६० ॥ हे हे
सख्यः समायान्तु पश्यन्तु मम मन्दिरम् ॥ पात्राणि रिक्तभग्नानि यच्चान्यदखिलं कृतम् ॥ ६१ ॥ इदानीं निर्गता गेहात्तदाऽगत्यापि नाशि ॥४८॥
तम् ॥ दधिदुग्धादिकं सर्वं सञ्चितं यद्गृहे स्थितम् ॥ ६२ ॥ क्व यामि किं करिष्यामि क्षणं त्यक्तुं न शक्यते ॥ गृहात्सख्यः कदाचिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहिर्यामि सदा स्थिता ॥ ६३ ॥ यशोदा मन्यते चैव बालको मम पुत्रकः ॥ नैव किञ्चित्करोतीह मिथ्यैवाहुर्व्रजांगनाः ॥ ६४ ॥ मुक्तद्वारे मम गृहे प्रविष्टो बालकैः सह ॥ दत्त्वा द्वारि कपाटञ्च द्रव्यं भुक्तं च नाशितम् ॥ ६५ ॥ परावृत्याऽभिगच्छामि यावत्तावत्पलायिताः ॥ मया ज्ञात्वा धृतो मोहो मुक्त्वा गृहकपाटकम्[1] ॥ ६६ ॥ अहं मम सखी काचिद्रक्षावो यत्नतो गृहम् ॥ तदा यशोदामानीय दर्शयिष्यामि निश्चितम् ॥ ६७ ॥ गते कार्य्ये सदा नृणां भवत्येव विचारणा ॥ पूर्वतो जायते बुद्धिः कथं कार्यं विहीयते ॥ ६८ ॥ इत्येवं बहुधा चोक्तः सखिभिर्विचराम्यहम् ॥ ततोऽन्यसदने यावत्प्रविशामि त्वरान्वितः ॥ ६९ ॥ तावद्गृहान्तराद्गोपी निःसृताऽसौ तु सत्वरा ॥ तदाहमब्रुवं ताञ्च क्यात इति भाषिणीम् ॥ ७० ॥ सखाऽस्माकं पलायित्वा निविष्टस्तव सद्मनि ॥ अहं गव्यं द्रुतं हित्वा बहिर्जातस्तवाखिलम् ॥७१॥ मां वीक्ष्यान्तर्गता ह्येत्य बहिर्नाऽपश्यदागता ॥ वीक्ष्य सर्वं हृतं द्रव्यं बालानाञ्च पलायनम् ॥ ७२ ॥ चुक्रोश किं यदेतेन कैतवोक्त्या प्रतारिता ॥ ज्ञातं तच्चेष्टितं मेऽद्य वचनं चावधारितम् ॥ ७३ ॥ पुनश्चेदेष्यति गृहे तत्करिष्ये यदीप्सितम् ॥ एवमुक्त्वा च सा गोपी विरराम गृहे स्थिता ॥ ७४ ॥ ततोऽहमन्यसदनं प्रविष्टः सखिभिः सह ॥ मिलित्वा कतिचिद्गोप्यो मां ग्रहीतुं समुद्यताः ॥ ७५ ॥ ता दृष्ट्वा मे सखायश्च पलायनपरा ययुः ॥ अहमेको धृत स्ताभिर्भीता नैवान्तिकं ययुः ॥ ३६ ॥ ता ऊचुरद्य का वार्त्ता क्व यासि भवनादितः ॥ त्वां गृहीत्वा यशोदायाः पुरो यास्यामहे द्रुतम् ॥ ७७ ॥ सर्वापराधांस्ते कृष्ण वदिष्यामस्तदग्रतः ॥ त्वमस्माकं वशे यातः सखायस्ते पलायिताः ॥ ७८ ॥ त्वं चैव शपथं कुर्याः पुनरेष्यामि न क्वचित् ॥ तदा त्यजामस्त्वामद्य नान्यथा हि कथञ्चन ॥ ७९ ॥ ततोऽहमब्रवं ताभ्यो युष्मद्भीतिर्न वर्त्तते ॥ क्रीडन्नहं प्रविष्टोऽत्र सखिभिः सहितो यदा ॥ ८० ॥ का हानिर्वः कृता मेऽद्य नापराधं

१ कपाटकं मुक्त्वा—अन्यत्र गमनं कृतमिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विना भयम् ॥ यशोदायै च किं यूयं वदिष्यथ ब्रुवन्तु मे ॥ ८१ ॥ मिथ्यागसं न मां माता कदाचित्ताडयिष्यति ॥
इति मद्वचनं श्रुत्वा ता विहस्याब्रुवन्पुरः ॥ ८२ ॥ स्त्रीभिस्त्वमधुना नूनं शीघ्रमागत्य वेष्टितः ॥ क्षणावस्थानमात्रेण सापराधो
न यत्कृतम् ॥ ८३ ॥ उवाचान्या ममेदानीं गृहे नागः कृतं त्वया ॥ तद् ब्रूहि तत्र नीत्वा त्वां दर्शयिष्यामहे वयम् ॥ ८४ ॥ एवं
विवदमानानां तासां, मण्डलमध्यगः ॥ चिरं विमृश्य कस्याश्चिद्द्वारं च त्रोटितं मया ॥ ८५ ॥ च्युता यतस्ततो
मुक्तास्ता धर्तुं यावदन्यतः ॥ तावत्पलायितः शीघ्रं ताश्च हा हेति चुक्रुशुः ॥ ८६ ॥ कथं हस्तगतो यातः पुनरेष्यति न क्वचित् ॥
धूर्त्तविद्याविदो बालः प्रौढोऽयं नात्र संशयः ॥ ८७ ॥ कपाटरोधं पूर्वं च कृत्वास्माभिर्न वेष्टितः ॥ गते काले नृणां बुद्धिः पुनर्भवति
निश्चितम् ॥ ८८ ॥ गतं तद्गतमेवास्तु पुनः कालो भविष्यति ॥ ८९ ॥ इत्थं चोक्त्वा गोपिका हासपूर्वं स्मृत्वा स्मृत्वा चेष्टितं यत्कृतं मे ॥
अन्योन्यश्च प्रेमपूर्वं कथा मे संजल्पन्त्यः स्वालयान्येव जग्मुः ॥ ९० ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौ
नकसंवादे गोपीधृतकृष्णमोक्षो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीभगवानुवाच ॥ अथान्यदिवसे प्रातः समानीय सखीनहम् ॥
वानरानपि संगृह्य कृतवान्यच्छृणुष्व मे ॥ १ ॥ कस्मिंश्चिद्गोपिकागेहे प्रविष्टोऽहं त्वरान्वितः ॥ उत्तार्य्य दधि शिक्याच्च भोक्तुं यावत्समु
द्यतः ॥ २ ॥ तावद्गोपी समागत्याब्रवीत्किं क्रियते त्वया ॥ कथमुत्तारितं पात्रं कुत्रेदं दधि नीयते ॥ ३ ॥ तदाहमब्रवं गोपीं धन्ये न क
लिरागतः ॥ तव भ्राता मम सखा तेनाहूताः समागताः ॥ ४ ॥ सखायोऽन्ये गता एकश्शयेऽहं भवने तव ॥ गन्तुं सुतोत्थितो यावदु
द्यतः शिक्यसंस्थितम् ॥ ५ ॥ पात्रं पिपीलिकाव्याप्तं दृष्टमेतन्मया द्रुतम् ॥ ततः पात्रं समुत्तार्य क्रियते तन्निरासनम् ॥ ६ ॥ विपरीतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव ज्ञानं गुणे दोषोऽवधारितः ॥ एवमुक्ताऽब्रवीत्सा मां चिरं जीवेति वञ्चिता ॥ ७ ॥ ततोऽहमन्यसदनं प्रविष्टः सखिभिः सह ॥ वर्तमाना गृहे गोपी दृष्ट्वा मामुत्थिता द्रुतम् ॥८॥ आगच्छागच्छ मद्गेहे किमर्थं समुपागतः ॥ ततोऽहमब्रवं ताञ्च वक्ष्ये विश्राम्य च क्षणम् ॥ ९ ॥ मम मातुः प्रियाऽसि त्वं तस्यास्त्वर्थाधिकारिणी ॥ द्वितीया भगिनी या ते तामाहूय वदाम्यहम् ॥ १० ॥ तामानेतुं गता यावत्तावद्द्रव्यं मया हृतम् ॥ भुक्तं दत्तञ्च गोपेभ्यो वानरेभ्यस्त्वशेषतः ॥११॥ पलायिता गृहात्तस्माद्यावदायाति गेहिनी ॥ सा भागिन्या समागत्य दृष्ट्वात्मगृहभाजनम् ॥१२॥ इतस्ततः परिक्षिप्तमुवाच भगिनीं पुरः ॥ यदेतश्चालिता भ्रान्ता बुद्धिर्नासीत्तदा मम ॥ १३ ॥ कामद्य कथयाम्येतद्यतो बुद्धिभ्रमो मम ॥ भगिन्यै दर्शयित्वा च विरराम गृहे स्थिता ॥ १४ ॥ ततोऽन्यभवनं गत्वा यत्कृतं तन्मुने शृणु ॥ कस्याश्चिद्गोपिकायास्तु गृहं गोप्यः समागताः ॥ १५ ॥ मिलिता मंगले कार्य्ये गानवाद्यमहोत्सवे ॥ तत्र यावद्गतोऽहं ता मां दृष्ट्वा सहसोत्थिताः ॥ १६ ॥ ऊचुश्च चौर आयातः सखिभिर्गोपबालकैः ॥ गृह्णीमः सर्वतश्चेमं वेष्टयित्वाऽथ मा चिरम् ॥ १७ ॥ गोपिका मन्त्रयित्वेति रुद्ध्वा द्वारि कपाटकम् ॥ त्यक्त्वा गानञ्च वाद्यञ्च यावद्धर्त्तुं समुद्यताः ॥ १८ ॥ तावन्मयोक्तं हे गोप्यः शृणुताऽस्मद्वचः स्फुटम् ॥ पित्रा मात्रा प्रेषितोऽहं भविताद्य महोत्सवः ॥ १९ ॥ यूयं तत्र समाहूताः शीघ्रं गच्छत मा चिरम् ॥ श्रुत्वा मद्वचनं गोप्यो हर्षिता मामथाऽब्रुवन् ॥ २० ॥ उच्यते सत्यमथवाऽनृतं कृष्ण वदस्व नः ॥ नानृतं वच्म्यहं क्वापि न तथा वोऽभिःच क्वचित् ॥ २१ ॥ सर्वे व्रजौकसश्चैव सखायो गोपबालकाः ॥ ते प्रोचुरेवमेवेति ततस्ता गन्तुमुद्यताः ॥ २२ ॥ विनिर्गता यदा गेहाद्गत्वाऽस्माभिर्गृहान्तरम् ॥ हृतं पक्वान्नमखिलं दधिदुग्धादिकञ्च यत् ॥ २३ ॥ विनिस्सृत्य पुनः पश्चाद्गत्वाऽग्रे गोपदारकाः ॥ अब्रुवन्नास्ति त्वद्गेहे किञ्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दद्य क्व गम्यते ॥ २४ ॥ यूयं च वञ्चिताः सर्वा मोक्षणार्थं निजात्मनः ॥ नाहूताः केनचिच्चातो निवृत्तास्स्वं स्वमाल यम् ॥ २५ ॥ एतच्छ्रुत्वा वचो गोप्यः प्रोचुर्बालैस्तु किं हृतम् ॥ कृष्णस्य दूतानेतान्हि न कश्चिद्वेत्ति कोपिका ॥ २६ ॥ गानवाद्ये न्तरायो भूत्तथा गव्यादिकं हृतम् ॥ स्पर्शोऽपि नैषां भवति किं कुर्मः कुत्र याम वा ॥ २७ ॥ अहो विचेष्टितं तस्य गोपीनां वञ्चनं द्रुतम् ॥ तयोर्वृद्धत्वसमये जातोऽयं बालकः प्रियः ॥ २८ ॥ स ताडयति नो वक्ति प्रत्येति न च मद्वचः ॥ ब्रूते बालो न जानाति न किञ्चित्कुरुते हि सः ॥ २९ ॥ कि कुर्मस्सा तथा वक्ति यथा स्नेहो न हीयते ॥ गृहे वित्तादिकं तावत्सर्वं संजायते पुनः ॥ ३० ॥ स्नेहभग्नभयादेव गुरोर्वक्तुं न गम्यते ॥ इत्यागता गृहं स्वंस्वं ता युक्ता गोपनायिकाः ॥ ३१ ॥ काश्चिद्दानं पुनश्चक्रुस्तत्र यत्राभवत्पुरा ॥ अहं चान्यगृहं यातः सखिभिः सह वानरैः ॥ ३२ ॥ काचिद्गृहाङ्गणे गोपी स्थितापि परमासने ॥ तां दृष्ट्वा हं शनैर्यातः कृतवानक्षिमुद्रणम् ॥ ३३ ॥ सा जानीते सखी काचित्कुरुते नेत्रमुद्रणम् ॥ न चुक्रोश विदित्वैवं काचिद्धास्यमचीकरत् ॥ ३४ ॥ यदा गृहीत्वा गव्यादि सखायो मम निःसृताः ॥ मया मुक्ताऽथ सा दृष्ट्वा मां चुक्रोश गृहाङ्गणे ॥ कस्त्वं कस्त्वमिति प्रोच्चैस्तावत्सर्वे पलायिताः ॥ ३५ ॥ पुनरन्यगृहे यावद्यामि सा द्वारमास्थिता ॥ तामुक्तवानहं मात्रा प्रेषितो वत्सचारणे ॥ ३६ ॥ यामि वत्साँश्चारयितुं वत्साँस्त्वमपि मोचय ॥ सा तदाकर्ण्य मुदिता तथा कर्त्तुं समुद्यता ॥ ३७ ॥ गता यत्र स्थिता वत्साः प्रविष्टास्तद्गृहे वयम् ॥ भुक्त्वा पीत्वा बहिर्याताः वत्सानुन्मुच्य साऽऽगता ॥ मयैते मोचिता वत्साः क्व कृष्णः क्वच बालकाः ॥ ३८ ॥ कयाचिदुक्तं बालास्ते शीघ्रं शीघ्रं पलायिताः॥ गृहीत्वा त्वद्गृहात्सर्वं सा श्रुत्वा गृहमाविशत् ॥ ३९ ॥ ददर्श भाण्डं भग्नञ्च भुक्तं पीतञ्च गोरसम् ॥ ४० ॥ चुक्रोशोच्चैरनेनेह किं कृतं नन्दसूनुना ॥ अहोयं नन्दत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयः किं जातश्छद्मसारकः ॥ ४१ ॥ कथं प्रतारिता तेन बालेनाहं वयोधिका ॥ अकस्मादागमद्गेहं निर्गतो वानरैः सह ॥ ४२ ॥ मामुवाच क्व ते वत्साः कति वानय तानिह ॥ स्ववत्सैश्चारयिष्यामि तच्छ्रुत्वाऽहं विमोहिता ॥ ४३ ॥ अहं गता तथा कर्त्तुं बालकैर्लुण्ठितं गृहम् ॥ यशोदा नहि कस्याश्चिद्वचनं मनुते ध्रुवम् ॥ ४४ ॥ यद्गतं गतमेवास्तु न वक्तव्यं मयापि हि ॥ एतावदुक्त्वागोपीभ्यो विररामाथ मानिनी ॥ ॥४५॥ गृहं प्रविष्टा सुसुखी स्मरन्ती कैतवं मम ॥ गहेऽन्यस्मिन्प्रविष्टोऽहं सखिभिर्वानरैः सह ॥ ४६ ॥ सुप्तामालक्ष्य गोपीं तां शनैर्गत्वा गृहान्तरे ॥ उत्तार्य दधिदुग्धादि भुक्तं सर्वैर्यथेच्छया ॥ ४७ ॥ भुञ्जानेष्वथ वास्मासु स्वप्नेऽपश्यत्तथैव सा ॥ जग्राह मां स्वप्न एवोवाच मां यास्यहो कथम् ॥ ४८ ॥ कृत्वा बहुतिथश्चौर्य्यं मद्गृहेऽथ पलायिताः ॥ त्वं धृतोऽस्यद्य नेष्यामि यशोदायास्तथान्तिकम् ॥ ४९ ॥ इत्थं तस्या विकर्षन्त्या निद्रानाशोऽभवत्ततः ॥ उत्तिष्ठन्तीं विलोक्याऽरं वयं सर्वे पलायिताः ॥ ५० ॥ समुत्थिता तु साऽपश्यद्यथास्वप्ने विलोकितम् ॥ समाहूय सखीवृन्दमस्मत्कृत्यमुवाच तत् ॥ ५१ ॥ कुत्रचिच्छून्यसदनं प्रविश्य हरते स्वयम् ॥ धूर्तोऽयं विविधैर्यत्नैः प्रतारयति गोपिकाः ॥ ५२ ॥ न काऽपि चास्य बालस्य चेष्टितं वक्तुमर्हति ॥ किं ब्रूमः कुत्र गच्छामो बालकेनातिमोहिताः ॥ ५३ ॥ अयं चास्मद्गृहात्सर्वं हरते नावशिष्यते ॥ एवं विवदमानासु गोपीष्वन्य गृहेऽगतम् ॥ ५४ ॥ तत्रस्था गोपिका काचित्पर्य्यङ्कासनसंस्थितम् ॥ भ्रातरं लालयन्ती च गायन्ती मद्गुणाञ्छुभान् ॥ ५५ ॥ मां दृष्ट्वा सा समुत्थाय ददावासनमुत्तमम् ॥ प्राह मा गच्छ तिष्ठेति सखिभिः सह मानद ॥ ५६ ॥ किमर्थमिह चायातः किमिच्छसि गृहाण तत् ॥ ब्रूहि मे करणीयं यत्त्वदाज्ञा च न लंघ्यते ॥ ५७ ॥ सा मयोक्ता तव स्नेहादागतोऽस्मि तवान्तिकम् ॥ सखायो मे क्षुधार्त्तास्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोक्तुमिच्छाम किञ्चन ॥ ५८ ॥ देहि नस्ते यदि श्रद्धा तेन दध्यादि गोरसम् ॥ तच्छ्रुत्वा साऽतिहर्षेण समानीय च गोरसम् ॥ ५९ ॥
ददौ प्रेम्णा स्मितं कृत्वा प्रीत्या भोक्तुं यथेष्टकम् ॥ तस्याश्च प्रीतिभावेन तोषितोऽहं मुने भृशम् ॥ ६० ॥ भुक्त्वा दत्त्वाऽथ गोपेभ्यो
वानरेभ्यो विशेषतः ॥ तस्यां मम कृपा जाता सर्वं द्रव्यमनन्तकम् ॥ ६१ ॥ या मह्यमर्पयेत्प्रीत्या तस्यास्तन्न क्षयं व्रजेत् ॥ न चार्प
येद्या हि रक्षेद्धानिस्तस्यास्तु जायते ॥ ६२ ॥ इति मे प्रकटीकृत्य दर्शितं मुनिसत्तम ॥ याऽगोपयत्तु दध्यादि मत्तो भीता हि गोपिका ॥
॥ ६३ ॥ तस्या हृतं मया सर्वं बलेनाऽथ च्छलेन वा ॥ सञ्चितं नाशमायाति दत्तमानन्त्यमृच्छति ॥ ६४ ॥ यत्किञ्चिद्वस्तुमात्रं हि सर्वं
मत्तो न चान्यतः ॥ यो नार्पयित्वा भुङ्क्ते स स्तेन एव न संशयः ॥६५॥ अतोऽन्यासान्तु भवने नाशितं चाखिलं मया ॥ तस्यास्तु वर्द्धितं
या मे प्रीत्या सर्वं समर्पयत् ॥ ६६ ॥ इत्यहं शिक्षयन्घोषे अटामि प्रतिवासरम् ॥ गोपा गोप्यस्तथा गावो वृक्षा वीरुत्तृणानि च ॥
॥ ६७ ॥ एतत्सर्वं च विज्ञेयं ममैवानन्दविग्रहम् ॥ सर्वान्व्रजस्थान्ये मत्तो भिन्नान्पश्यन्ति दुर्धिया ॥ ६८ ॥ तेषां हि मूढबुद्धीनां
गतिर्नात्र परत्र च ॥ ततो व्रजे विनोदेन मुनेऽक्रीडमहर्निशम् ॥ ६९ ॥ ततस्तस्या गृहे भुक्त्वा पीत्वा प्रीततरा वयम् ॥ गन्तुमुच्चलिताः
सर्वे ह्यन्यगोप्या गृहं प्रति ॥७०॥ सा चास्मान्वीक्ष्य दूराद्धि गृहद्वारगता सती ॥ ययावन्यापदेशेन गोपीनां सा गृहेगृहे ॥ ७१ ॥ विलोक्या
स्मान्गृहे विष्टान्समाहूय व्रजस्त्रियः ॥ समागता ततो द्वारमारुद्धय प्रसभं स्थिताः ॥ ७२ ॥ यदा गृहाद्बहिर्यासि कृष्णत्वां सर्वयोषितः ॥
धृत्वा यशोदाभवनं नयामश्च विचारय ॥७३॥ एवमुक्त्वा स्थिता द्वारि चास्माभिर्भुक्तमेव हि ॥ तज्ज्ञात्वा सुभृशं भीताः सखायस्ते
पलायिताः ॥ ७४ ॥ गोपीभिर्न धृताः केऽपि मत्पलायनशङ्कया ॥ अहमेकः स्थितस्तत्र द्वारि दत्त्वा कपाटकम् ॥ ७५ ॥ अद्योपलब्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुभिर्दिवसैर्यत्नतो भृशम् ॥ कथं ते गमनं चाद्य भविष्यति विचारय ॥ ७६ ॥ बहूनि त्वं दिनान्यत्र कृतवान्हि गतागतम् ॥ चौराणां समयाः सन्ति बहुशोऽथानुवासरम् ॥ ७७ ॥ साधोः कदाचित्समयश्चैकदा सर्वसाधकः ॥ तस्मादद्य विधास्यामो यथाऽस्माकं मनोगतम् ॥ ७८ ॥ गृहीत्वा त्वां विनेष्यामो यशोदाभवने वयम् ॥ एवं बहुविधा वाचो जल्पन्त्यो मामवेष्टयन् ॥ ७९ ॥ भुञ्जानेन मया क्षिप्रं दधि दुग्धादि तत्र च ॥ गृहीत्वा नेत्रयोः क्षिप्तं कस्याश्चिद्याकुलाभवत् ॥ ८० ॥ लब्धमार्गो बहिस्तस्मान्मण्डलात्प्रस्थितोऽस्म्यहम् ॥ उवाच ताः कथं यत्नः सफलो निष्फलोऽथवा ॥ ८१ ॥ नाहं कैश्चिद्धृतः क्वापि बलिष्ठैरपि पूरुषैः ॥ एतावद्यत्ननिचयैर्द्धार्य्यः स्त्रीभिरहं कथम् ॥ ८२ ॥ भवतीनामिह प्रेमरशना मम शृङ्खला ॥ तथा यत्नं विचार्य्याशु कुरुध्वमविलम्बितम् ॥ ८३ ॥ यथा मम गतिर्नैव कदाचिज्जायतेन्यतः ॥ ता ऊचुरात्मग्रहणोपायं कृष्ण वदाशु नः ॥ ८४ ॥ बहुधा तु कृतोऽस्माभिः प्रयत्नस्त्वं न गृह्यसे ॥ कथंचिद्वेष्टितो यत्नात्तथापि त्वं बहिर्गतः ॥८५॥ केन त्वं शिक्षितो नानाच्छलमार्गविचक्षणः ॥ त्वत्समो भूतले कश्चिन्न भूतो न भविष्यति ॥ ८६ ॥ सखायस्त्वाभितो यान्ति न तिष्ठन्ति क्षणं क्वचित् ॥ अतः पितृभ्यां तनयस्ताड्यते नहि लाल्यते ॥ ८७ ॥ त्वं पित्रोर्वयसोतीते जातः संलाल्यसे ततः ॥ धृष्टो भवसि तेन त्वं सखिभिर्भ्राम्यसि व्रजे ॥८८॥ गृहं प्रविश्य पात्राणि भिनत्स्यात्सिगोचरसम् ॥ प्रयत्नैर्बहुभिर्नापि लभ्यसे त्वं कथञ्चन ॥ ८९ ॥ इत्थं हस्तगतोऽस्माकं यशोदाग्रे नयामहे ॥ सर्वं त्वच्चेष्टितं मातुःपुरतः कथयामहे ॥ ९० ॥ प्रतिवासरमागत्य करोषि किल कर्म यत् ॥ कथं सहेतानुदिनं हानिमात्यन्तिकीं गृही ॥ ९१ ॥ वासिष्याम्यन्यतो गत्वा व्रजं त्यक्त्वाधुनैवहि ॥ न वारयत्यात्मसुतं यशोदा स्नेहयंत्रिता ॥ ९२ ॥ आत्मवस्तु च सर्वेषां भ्राजतेऽप्याधिकं भवेत् ॥ ततस्ते चात्मजे प्रीतिर्नास्माकं गृहवस्तुषु ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिपु० गोप्यस्तत्र प्रोचुरन्योन्यमेवं धर्त्तुं ता मामुद्यताश्च प्रयत्नात्॥ ज्ञात्वा चाहं भित्तिमुत्पत्य तस्या गेहाज्जग्मुर्गोपकाश्चात्मसद्म॥९४॥ इति श्रीआ
॥५२॥ दिपुराणे नारदशौनकसंवादे कृष्णचौर्यलीलावर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ भगवानुवाच ॥ प्रातरुत्थाय गोप्यस्तायशोदासन्निधिं अ०
ययुः ॥ यन्मन्त्रितं पूर्वदिने तद्वक्तुं मम चेष्टितम् ॥ १ ॥ गोप्यऊचुः ॥ अम्बाम्ब व्रजमात्मीयं गृहाण सुखदं वयम् ॥ यास्यामोन्यत्र वासा २५
र्थं निरुपाधिस्थलं यतः ॥ २ ॥ वस्तव्यं यत्र कुत्रापि न हानिर्यत्र जायते ॥ हानिश्चेत्क्वापि भवति वासस्य किमु तत्सुखम् ॥ ३ ॥ यद्ये
कस्मिन् दिने किञ्चिद्वैकल्यं मनसो भवेत् ॥ भूयोभूयो नित्यशस्तत्सोढव्यं स्यात्कथं पुनः॥४॥बालकोऽयं चिरञ्जीवी भवेत्तु व्रजराट् प्रिये॥
तव स्नेहाद्व्रजे किञ्चिन्न दुःखमनुभावितम् ॥ युवयोर्नित्यसंसर्गाज्जातं सुखमनुत्तमम् ॥ ५ ॥ यास्यामोऽतः परं यत्र तत्र किं भविताऽस्ति नः
॥६॥अत्र नित्यं तव सुतः सखिभिर्वानरैः सह॥ अकस्माद्विशतेऽस्माकं भवनेषु हि नित्यशः ॥७॥ भुङ्क्तां यदि स्वयं किञ्चिद्भवने नः परं
सुखम्॥न तथा कुरुते कृष्णोभोजयत्यपरान्पशून् ॥८॥ भुञ्जते गोपबालाश्च नहि दुःखाय तद्धि नः॥ यद्वानरान्भोजयति भुवि प्रक्षिपतीति
च ॥९॥ यद्भिनत्ति च पात्राणि ततो दुःखं करोति च ॥ आगत्यागत्य पश्यामः कृतं कर्मात्मजस्य ते ॥१०॥ विक्रुश्य बहुशो गेहे तिष्ठामः
क्षुब्धमानसाः ॥ गतं तद्गतमेवास्तु किं कुर्म्म इति निश्चिताः॥ यत्र कुत्राप्यसौ याति कैतवोक्त्या प्रवञ्चयन् ॥ ११ ॥ भुङ्क्ते बालैश्च
कपिभिश्चलेन च बलेन च ॥ वेष्टितोऽपि च गोपीभिर्भूयोभूयः पलायते ॥ १२ ॥ बालान्रावयते क्वापि रोदित्यपि च धावति ॥
गृहे मूत्रपुरीषञ्च कुरुते लिप्तमार्ज्जिते ॥१३॥ वाग्वज्रताडनं क्वापि तथा तर्जनभर्त्सने ॥ प्रत्यहं कुरुतेऽस्माकं कथं सोढुं हि शक्यते ॥१४॥ ॥५२॥
नेत्रेषु धूलिं क्षिपति हारञ्च त्रोटयत्यलम् ॥ वस्त्राणि पाटयित्वा च भयादिव पलायते ॥ १५ ॥ भक्त्वा पीत्वा दधि पयः सखिभिर्वानरैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह ॥ यद वयं व्यग्रधियो गृहकृत्येषु भामिनि ॥ १६ ॥ तदा गृहं प्रविश्याशु गृहोत्सादं करोत्यसौ ॥ नशक्नुमस्ततः कर्त्तुं गृहकार्य्यञ्च किञ्चन ॥ १७ ॥ व्रजत्यागे मनोऽस्माकं नान्यत्कर्त्तुं हि शक्यते ॥ अथवा स्वसुतं देवि निवारय कथञ्चन ॥ १८ ॥ तदा वासो भवेन्नूनमस्माकं नान्यथा क्वचित्॥व्रजे वासः सुखायैव न त्यजामः कदाचन ॥ १९ ॥ तव पुत्रस्य कृत्येन व्रजत्यागो भविष्यति ॥ २० ॥ कृष्ण उवाच ॥ इति तासां वचः श्रुत्वा यशोदा सुस्मिता सती ॥ मामुवाच कथं पुत्र गोपिकाः कथयन्ति हि ॥ २१ ॥ दध्यादिकं गृहे सर्वं वर्त्ततेऽत्र चतुर्विधम् ॥ कथं परगृहे यासि मया किं नैव दीयते ॥ २२ ॥ सदादत्स्वाखिलं नूनं विद्यते तव सद्मनि ॥ यद्यदिच्छसि कर्त्तुं त्वं तत्कुरुष्व निरन्तरम् ॥ २३ ॥ कथं व्रजसि गोपीनां गृहेषु परसद्मसु ॥ बालका वानराश्चैव किं करिष्यन्ति ते हितम् ॥ २४ ॥ यैः सार्द्धं परगेहे च व्रजसि त्वं हि नित्यशः ॥ नववध्वोऽखिला गोप्यो यद्वा तद्वा वदन्ति ताः ॥ २५ ॥ या वदन्ति प्रवयसस्ता विचार्य्य वदन्ति वै ॥ तवापराधादेतासां वचनं सह्यते मया ॥ २६ ॥ विनापराधं कः कस्य सहते रुशती गिरः ॥ यदि त्वं न व्रजस्यासां गृहेषु कथयन्ति किम् ॥ २७ ॥ स्वल्पमन्यापराधं हि परस्तु बहु मन्यते ॥ आत्मीयानां न गणयत्यपराधं कदाचन ॥ २८ ॥ यदि मे वचनं कुर्य्यात्कदाचिदपि मा भवान् ॥ अन्यासां भवनं गच्छेत्ताडयिष्यामि चान्यथा ॥ २९ ॥ इति तस्या वचः श्रुत्वा अवोचं मोहयन्निव ॥ एतासां वचनं मातः किं वदामि न शक्यते ॥ ३० ॥ वक्तुं तथापि वक्ष्यामि न प्रतीतिं करोषि किम् ॥ क्रीडन्तमात्मनो द्वारि सह मां गोपबालकैः ॥ ३१ ॥ आनयन्ति समाहूय बलादप्यात्मनो गृहम् ॥ गोप्य एतास्तर्जयन्ति न च वेद्मि कथञ्चन ॥ ३२ ॥ पितामहाय पित्रे च मात्रे मातामहाय च ॥ प्रयच्छन्ति हि गालीश्च शतशोथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्रशः ॥३३॥ करौ गृहीत्वा कर्षन्ति मां चरन्तमितस्ततः ॥ काचिदञ्जनमादाय नेत्रे अञ्जयति ध्रुवम् ॥३४ ॥ काचिन्मे वसनं काचिन्मा लां वलयमेव च ॥ वंशीञ्च किङ्किणीं पादयुगाभ्यां ता हरन्ति हि॥३५॥ रुष्टोऽहं कर्म्मणा तेन तत्स्थानाच्चलितस्ततः॥ रुन्धन्ति मम मार्गंच तदा गोप्यश्च संघशः ॥३६॥ भग्ने पात्रे स्वयं ताभिर्गोरसः क्षिप्यते बहिः॥ वदन्ति च यशोदाग्रे सर्वा गत्वा च निश्चितम् ॥३७॥ वयं तथा वदिष्यामो यथा त्वां ताडयिष्यति ॥ यद्यदेता वदन्ति त्वां तदहं न व्यथां क्वचित् ॥ ३८ ॥ एता आगत्य संघेन तवाग्रे कथयन्ति वै ॥ मातस्त्वं वेत्सि मे कर्म्म त्वत्तो गोप्यं न किञ्चन ॥३९॥ क्षुधितास्तृषिता बालाः परगेहं प्रयान्ति हि ॥ कदाहं भोजितो नैव त्वया मातर्गृहाद्गतः ॥ ४० ॥ अनिशं मां भोजयसि परगेहं कुतो व्रजे ॥ इति मद्वचनं श्रुत्वा माता गोपीस्तदाऽब्रवीत् ॥ ४१ ॥ गोप्य आत्मीयकर्म्माणि सङ्गोप्य परकर्म्म वै ॥ कथयन्त्यो न संलज्जा धन्या यूयं व्रजाङ्गनाः ॥ ४२ ॥ क्षुधितास्तृषिता बालाः परगेहं प्रयान्ति हि ॥ नायं क्षुधार्त्तस्तृषितो राशयः सन्ति सर्व्वशः ॥ ४३ ॥ अनुव्रजाम्यहं नित्यं पिब भक्षेतिवादिनी ॥ कदाचित्पिबति प्रीत्या कदाचिन्न पिबत्यपि ॥ ४४ ॥ एवं भुङ्क्ते न भुङ्क्ते च बालकोऽयं निजेच्छया ॥ अतिक्लेशैर्मया प्राप्तः बालोऽयं त्वत्प्रसादतः ॥ ४५ ॥ रोरुदीति च सोच्छ्वासो मद्भीत्या बालको ह्यसौ ॥ मम प्राणाधिकप्रेयान्न ताड्योऽयं वृथा मया ॥ ४६॥ यदि रागः कृतोऽनेन तदा कुरु विनिग्रहम् ॥ श्रुत्वा चोक्तीर्यशोदायाः पुनरूचुश्च गोपिकाः ॥ ४७ ॥ प्रतीतिं बालवाक्ये च कुरुषे नास्मदीरिते ॥ ४८ ॥ न चेत्प्रतीतिं कुरुषे किं कुर्म्मः कथयाम किम् ॥ वयं मिथ्यातिवादिन्यो नहि सोऽयं तवात्मजः ॥४९॥ चित्रमस्माकमित्येव वक्तुं केन सुशिक्षितः ॥ जिह्वा न तालु स्पृशति समयोक्तिं वदत्यपि ॥ ५० ॥ तथा त्वमपि जानासि साधुरेष ममात्मजः ॥ आत्मीये परकीये च समता न भवेन्नृणाम् ॥ ५१ ॥ बालको लालि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः पूर्व्वं कदाचिन्न तु ताडितः ॥ ज्ञास्यतीयं यदा बालस्त्वामेवोद्वेजयिष्यति ॥ ५२ ॥ लालने बहवो दोषास्ताडने बहवो गुणाः ॥ तस्मा द्धितार्थी बालांश्च ताडयेन्न तु लाडयेत् ॥ ५३ ॥ परन्तु वार्द्धके जाते जातोऽयं युवयोः सुतः ॥ तस्मात्ताडयितुं नैव कुरुते भवतीमनः ॥ ॥ ५४ ॥ भवत्विदानीं गच्छामो यदा किञ्चित्करिष्यति ॥ नीत्वा त्वां दर्शयिष्यामस्तदा किं वा वदिष्यति ॥५५॥ इत्युक्त्वा तास्ततो गोप्यः स्वकीयनिलयं ययुः ॥ गतासु तासु गोपीषु यशोदा मामशिक्षयत् ॥ ५६ ॥ न गच्छेरन्यवेश्मानि न वदेर्दुर्व्वचः क्वचित् ॥ न गालीर्दापयेः पित्रोर्न ब्रूया अनृतं वचः ॥ ५७ ॥ पापं कर्म्म न कुर्व्वीथाश्चौर्य्यं कपटमेव च ॥ तथ्यं प्रियं ततो ब्रूयाः कुर्य्याः कर्म्म सुखावहम् ॥ ५८ ॥ नोद्वेजयेस्तथा कञ्चिदनाहूतो न वेश्मनि ॥ न गच्छेस्त्वं कदाचिच्च कुरु मे शिक्षितं वचः ॥५९॥ यदि बाला वानराश्च प्रियाः पुत्र तवान्ति कम् ॥ आनयस्व गृहे सर्व्वान्पिब भुङ्क्ष्व ददस्व च ॥ तदा सुखं मे भविता नान्यथा किञ्चिदेव हि ॥ ६० ॥ श्रुत्वेति वचनं तस्या अह मप्यब्रुवं ततः ॥ न प्रतीतिं मद्वचासि कुरुषे त्वं ततः करु ॥ ६१ ॥ गोपं प्रौढं निजं कञ्चिन्मदीयं सहचारिणम् ॥ तं पृष्ट्वा ज्ञास्यसे मातः सर्व्वमेव च चेष्टितम् ॥ ६२ ॥ तासामपि च कर्म्माणि वदिष्यति स एव ते ॥ यत्र कुत्रापि क्रीडन्तं वीक्ष्य मां वेष्टयन्ति ताः ॥ ६३ ॥ गृहकर्म्माणि सन्त्यज्य तिष्ठन्ति मम सन्निधौ ॥ बलाद्गृहीत्वा स्वोत्संगे नयन्ति स्वगृहं प्रति ॥ ६४ ॥ अत्यन्तात्मेच्छया चैव यामि कृत्वा पलायनम् ॥ आनीय गृहपात्राणि स्वयमेव हि गोपिकाः ॥ ६५ ॥ प्रयच्छन्ति सखिभ्यश्च भोजयन्ति स्वभावतः ॥ पश्चाद्गृहीत्वा वसनं ताडयन्ति सखीनपि ॥ ६६ ॥ कथं दधि पयोऽस्माकं भुक्तं पात्रञ्च भेदितम् ॥ तदा तानपि कृच्छ्रेण मोचयामि कथञ्चन ॥ ६७ ॥ भुक्त्वा च ते पलायन्ते गोप्यो गृह्णन्ति मां तदा ॥ तदा क्रोशन्ति बहुशो यद्वा तद्वा वदन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ ६८ ॥ ॥ इति श्रीआदिपुराणे नारदशौनकसंवादे यशोदाकृष्णसंलापो नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ श्रीभगवानुवाच ॥
यशोदा मद्वचः श्रुत्वा प्रतीतिमकरोत्तदा ॥ अहमप्यन्यदिवसे तासां वेश्म तथाविशम् ॥ १ ॥ बलेन च्छद्मना वापि गृहीतं चाखिलं वसु ॥
कुत्रचिद्भुक्तमेवाथ पात्रभङ्गश्च कुत्रचित् ॥ २ ॥ वस्त्रस्य पाटनं क्वापि हारशङ्खविभेदनम् ॥ महाक्रोशो बभूवाथ व्रजस्त्रीणां गृहेगृहे ॥ ३ ॥
कस्मिंश्चिद्भवने सौम्य प्रौढायौवनगर्व्विता ॥ रुरोध मां सखीभिश्च स्वयं धर्त्तुं समुद्यता ॥ ४ ॥ मया च सा बलात्क्षिप्ता पपात धरणी
तले ॥ हस्तयोः स्फुटिताः शंखा हारश्छिन्नो द्विधाभवत् ॥ ५ ॥ वस्त्रञ्च गात्रे रुधिरस्रावो वै तत्रतत्र हा ॥ उत्थिता सा तथाभूता यशोदायै
न्यवेदयत् ॥ ६ ॥ अहं मृषाश्रुर्गच्छामि रुदन्वै सदनं प्रति ॥ ततो यशोदा मामाह कथं रोदिषि पुत्रक ॥ ७ ॥ मयोक्तं शृणु मातर्मे वचनं
यद्ब्रवीम्यहम् ॥ इयं पश्चान्ममागत्य पृष्ठे संताडय पाणिना ॥ ८ ॥ चचाल वेगादपतत्स्खलिता च स्वयम्भुवि ॥ मिथ्या वदति
मे दोषमियं त्वत्पुरतः स्थिता ॥ ९ ॥ तदाकर्ण्य यशोदा च बहुधा तामभर्त्सयत ॥ त्वं सदा यौवनोन्मत्ता बन्धनं कुरुषे भृशम् ॥ १० ॥
बाला गृहेगृहे सन्ति काऽपि कस्याऽपि दूषणम् ॥ न ब्रवीति यथा नित्यं कृष्णस्याखिलगोपिका ॥ ११ ॥ इति साक्षेपवाक्यानि श्रुत्वा
सा लज्जिता ययौ ॥ नैतद्ब्रह्मादिभिर्देवैरनुभूतं हि तत्सुखम् ॥ ॥ १२ ॥ यल्लब्धं बल्लवस्त्रीभिरेवंभूतमनेकथा ॥ कदाचिद्देवपूजार्थमु
द्यता जननी मम ॥ १३ ॥ अकरोद्बहुपक्वान्नदधिदुग्धादिसञ्चयम् ॥ संपाद्य सर्वां सामग्रीं गोपीराह्वातुमुद्यता ॥ १४ ॥ मामुक्त्वा
गृहरक्षाऽत्र सम्यक्कार्या त्वयाऽनघ ॥ यावत्स्त्रियः समाहूय आनयामि स्ववेश्मनि ॥ १५ ॥ अथ तस्यां गतायान्तु मयाऽहूताश्च ॥५४॥
बालकाः ॥ वानराश्चागताः सर्व्वे ते मया भोजिताः सुखम् ॥ १६ ॥ आगता सा परावृत्य समाहूय व्रजस्त्रियः ॥ दृष्ट्वा भूयो सत्कृतश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभूवाऽथ समाकुला ॥ १७ ॥ मामुवाच तदा माता किं कृतं शून्यसद्मनि ॥ आगत्यागत्य गोपीभिर्यदुक्तं जातमद्य मे ॥ १८ ॥
यदीहैतादृशो बालो देवकार्य्यं कुतश्च वै ॥ त्यक्तं मयाऽधुना सर्व्वं देवकार्य्यादिकञ्च यत् ॥ १९ ॥ आयास्यन्ति समाहूताः किं वदिष्यन्ति
योषितः ॥ सर्व्वा एव हसिष्यन्ति ज्ञात्वा मां तव चेष्टितम् ॥ २० ॥ एवं वदन्त्यां तस्यान्तु व्रजवध्वः समागताः ॥ तां दृष्ट्वा क्षोभितां
प्रोचुः किमर्थं क्लिश्यते त्वया ॥ २१ ॥ यशोदोवाच ॥ अहं पुरैव सर्व्वाणि कर्म्माणि प्रेक्ष्य च स्थिता ॥ सन्ततिर्नास्ति यद्गेहे तद्गेहे मङ्गलं
कुतः ॥ २२ ॥ देवताः पितरश्चैव न पुनः पूज्यता मम ॥ इति त्यक्तं मया सर्व्वं यदाऽयं बालकोऽभवत् ॥ २३ ॥ कुर्व्वन्नरः कुलाचारं
सर्व्वमाप्नोति शोभनम् ॥ इति वेदविदां वादः समारब्धो मया ततः ॥ २४ ॥ देवाश्च पितरश्चैव पुत्रे जातेऽतिविस्मृताः ॥ पुत्रस्नेहवशाद्गोप्य
किञ्चित्कर्त्तुं न शक्यते ॥ चित्तोत्साहादिदानीन्तु समारब्धन्तु किञ्चन ॥ २५ ॥ आस्थाप्य विविधं द्रव्यं देवकार्य्यार्थमद्य वै ॥ भवतीनां
समाह्वानं कर्त्तुं यावद्गता ह्यहम् ॥ २६ ॥ तावत्प्रणाशितं सर्व्वं बालेनातिचलेन हि ॥ शिक्षयित्वाऽथ विधिवत्सम्यगेनं गता बहिः ॥ २७ ॥
यस्य सद्मनि पुत्रोऽयं वर्त्तते चपलो ह्यति ॥ तत्र देवाश्च पितरः कथं पूज्या भवन्ति हि ॥ २८ ॥ अद्यारभ्य कदाचिन्न पूजयिष्यामि
कञ्चन ॥ समाहूता भवन्त्यो मे यात स्वं वं निकेतनम् ॥ २९ ॥ गोप्य ऊचुः ॥ ज्ञातं त्वया पुत्रकर्म्म न प्रत्येषि कदाचन ॥ अस्माभि
रुक्तं बहुधा त्वं जानासि मृषैव हि ॥ ३० ॥ सम्यक्तं त्वया कृष्ण वस्तुजातं च नाशितम् ॥ प्रतीतिं नाकरोत्क्वापि यशोदा वचने पुन
॥ ३१ ॥ यावन्न लभते दुःखमात्मनो मानवः क्वचित् ॥ तावदन्यस्य दुःखेन प्रतीतिं नाधिगच्छति ॥ ३२ ॥ श्रीकृष्ण उवाच ॥ ॥
इति तासां वचः श्रुत्वा तदा सा जननी मम ॥ आक्रुश्य बहुधा भूयो मां ग्रहीतुं समुद्यता ॥ ३३ ॥ अहं साक्षेपवचनै रुष्टो गेहाद्ब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिर्गतः ॥ सा मामनुजगामाऽथ गोप्यश्च स्म गृहान्ययुः ॥ ३४ ॥ मया विचारितं सा मां त्यक्त्वाभूद्देवपूजने ॥ मतिर्भविष्यति ततो
वस्तु तत्र न रक्षितम् ॥ ३५ ॥ व्यभिचारपरो धर्म्मो न मे तोषाय कल्पते ॥ यावन्मे पूजनं नास्ति तावद्देवान्न वै यजेत् ॥ ३६ ॥
मयि प्रपूजिते देवाः पितरश्चैव पूजिताः ॥ यथा सिक्ते वृक्षमूले पत्रशाखादिसेचनम् ॥ ३७ ॥ तथा मे पूजने जाते सर्व्वेषां पूजनं भवेत् ॥
न भक्ता भक्तिमन्तोऽपि येन्यदेवार्च्चने रताः ॥ ३८ ॥ यथा स्त्री कुलटा मूढा न याति पतिलोकताम् ॥ योऽनन्यभक्त्या मां नित्यं
भजेत मनुजो मुने ॥ ३९ ॥ तस्याधीनोऽस्मि सततं नैवान्यत्र व्रजे क्वचित् ॥ अनन्यभक्तिसदृशं नान्यत्प्रियतमं मम ॥ ४० ॥
भजन्तोऽनन्यभक्ताश्च सर्व्वे तेऽव्यभिचारिणः ॥ इत्याशयाद्यशोदायाः कृता विप्रगृहे स्थितिः ॥ ४१ ॥ अन्यासामपि गोपीनां यद्भुक्तं
तद्गृहे गृहे ॥ ता मद्भक्ताश्च मामेव मोहिता नार्च्चयन्ति हि ॥ ४२ ॥ ताश्चात्मलीलावृद्ध्यर्थं मोहिता नान्यथा मुने ॥ यदि सर्व्वेऽ
न्यथा भावा भवेयुर्व्रजवासिनः ॥ ४३ ॥ तदा लीलाविवृद्धिश्च नसम्यग्जायते व्रजे ॥ मत्कर्म्मभिर्मत्स्नेहेन मयि तेषां स्थितं मनः ॥४४॥
ततोप्यनन्यभावस्तु न तेषां क्वापि हीयते ॥ एकदा च गता माता मोहिता मम मायया ॥ ४५ ॥ त्यक्त्वा क्रोधं पुत्र पुत्र गच्छ मा
गच्छ माऽब्रवीत् ॥ मयोक्तं नैव ते गेहे आयास्यामि कथञ्चन ॥ ४६ ॥ देवपूजाकुलायास्ते मया किं कार्य्यमस्ति वै ॥ न तथा वर्त्तते
प्रेम क्षुधिते तृषिते मयि ॥ ४७ ॥ देवेतररतायास्ते नाहं यामि गृहान्तरम् ॥ इत्युक्त्वाऽहं रुदंस्तत्र स्थितः सा भीषयत्तदा ॥४८॥
तत्रैव मर्कटः क्रोधी रुदंतमनुधावति ॥ आगत्य नासिकाकर्णौ लुनात्येव न संशयः ॥ ४९ ॥ अत उद्धृह्य शीघ्रं हि प्रविशामो
गृहं सुतम् ॥ इति तद्वचनं श्रुत्वा प्ररोदमहमुच्चकैः ॥ ५० ॥ सा मामपृच्छद्धसिता कथं रोदिषि पुत्रक ॥ तदाहमब्रुवं मात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

रयमल्पबलः कपिः ॥ ९१ ॥ मां च लंघयितुं कोपि नेशो मत्सेवकं विना ॥ न नित्यं यत्र मे भक्तिस्तत्र मोहो मया कृतः ॥९२॥ ते न बाधो न मोहश्च केवलं सुखमेव हि ॥ यन्मया मोहिता त्वं च मां वेत्सि तनयं स्वकम् ॥ ९३ ॥ ममैश्वर्य्यं न जानासि ततो भीषयसे हि माम् ॥ इति श्रुत्वा यशोदा मामब्रवीदतिविस्मिता ॥ ९४ ॥ कथं पश्येयमैश्वर्य्यमहं जानामि यद्विभुम् ॥ ततो मयोक्तं समये दर्शयिष्ये स्ववैभवम् ॥ ९५ ॥ त्वं गच्छ नाधुना गेहं गमिष्यामि कथञ्चन ॥ अथ सा मामनुद्रुत्य धृत्वांके चानयद्गृहम् ॥ ९६ ॥ विसस्मार मयोक्तं यद्गृहाऽऽसक्ता सती तु सा ॥ ९७ ॥ इत्थं नित्यं गोकुले क्रीडमानः सर्व्वांल्लोकानात्मसौख्यप्रसक्तान् ॥ कृत्वा गोपीर्मोहयित्वा विनोदैः कालं निन्ये योगिनामप्यदृश्यः॥९८॥इति श्रीआदिपुराणे नारदशौनकसंवादे कृष्णस्वगृहचौर्यवर्णनं नाम षड्विंशोऽध्यायः ॥२६॥ ॥ श्रीभगवानुवाच ॥ तस्मिन्दिने व्यतीते तु सखीनाहूय वानरान् ॥ तैः सार्द्धं विपिनं गन्तुमुद्यतः प्राह तानहम् ॥ १ ॥ अद्य सर्व्वे वयं मल्लयुद्धेन विहरामहे ॥ ते ऊचुः कृष्ण ते तुल्यः कोपि नास्तीह बालकः ॥ २ ॥ भवान्केन कथं चापि मल्लक्रीडां करिष्यति ॥ बलः कृष्णमथोवाच कुरु युद्धं मया सह ॥ ३ ॥ तदाहमब्रवं भ्रातस्त्वं मे मान्यतरोऽग्रजः ॥ कथमत्र भवेद्योग्यं युद्धं श्रुतिविदूषितम् ॥ ४ ॥ तदाह बलदेवो मां कुरु युद्धं ममेच्छया ॥ तथेत्युक्तं मया तत्र चावयोरभवद्रणः ॥ ५ ॥ नानारणविधानेन बलो मामजयत्पुरा ॥ ततः सर्व्वे सखायश्च जहसुर्मामभीक्ष्णशः ॥ ६ ॥ कृष्ण नेयं बकी दुष्टा तृणावर्त्तो न वासुरः ॥ अयं हि बलिनां श्रेष्ठो बलभद्रो तवाग्रजः ॥ ७ ॥ मया कृतश्च मृद्भक्षं कथितुं मातरं ययौ ॥ चकार साक्षिणो गोपांस्तत्र गत्वा जगाद ह ॥ मृदं भक्षितवान्कृष्णः कथयामि तवाग्रतः ॥ ८ ॥ रोगोऽत्यन्तं च भविता निवारय ततो द्रुतम् ॥ इति त्ववस्थितो यावद्बलभद्रोहमागतः ॥ ९ ॥ यशोदा मामुवाचेदं तदाक्रोशसमन्विता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कथं मृदं भक्षितवान्रोगस्ते भविता खलु ॥ १० ॥ तथैव जायते वत्स देहवैवर्ण्यमेव च ॥ उवाचाहं सखायो मे सर्व्वे मिथ्याभिशंसिनः ॥
 ॥ ११ ॥ यदि सत्यगिरस्ते हि समक्षं पश्य मे मुखम् ॥ व्यादेहीति तयोक्तस्तु मुखं व्यादितवानहम् ॥ १२ ॥ स तत्राखिललोकांश्चापश्य
त्कौतुकमोहिता ॥ भूपातालककुब्व्योम ज्योतिश्चक्रं सुरासुरान् ॥ १३ ॥ लोकाँल्लोकाधिपांश्चान्यान्गिरीन्नानानदीनदान् ॥ नगरग्रामसंघाँश्च
व्रजमात्मानमेव च ॥१४॥ गोपानखिलगोपीश्च गोवत्साँश्च ददर्श ह ॥ ततः क्षणेन सा गोपी स्मृतियुक्ता बभूवह ॥ कृष्णं बलं चात्मनोऽग्रे
दृष्ट्वा विस्मयमागता ॥ १५ ॥ वितर्कयन्ती बहुधा निश्चयं नाधिगम्य च ॥ स्वप्नो वा बुद्धिमोहो वा दैवी मायाऽथवासुरी ॥ १६ ॥ अथवा
पुत्ररूपेण जातोऽयं भगवान्स्वयम् ॥ १७ ॥ एतावत्कालपर्य्यन्तं मोहिताऽनेन मायया ॥ अधुना शरणं प्राप्ता मामुद्धर जनार्दन ॥ १८ ॥
त्वत्तो न किञ्चिद्भिन्नं हि दृश्यते सचराचरम् ॥ प्रतीयते हि मिथ्यापि समवस्थानसत्तया ॥ १९ ॥ यथा सूर्य्यस्य किरणे मृगतृष्णाजल
भ्रमः ॥ शुक्तौ रूप्यन्तथार्थेषु सत्यबुद्धिः कुमेधसाम् ॥ २० ॥ विषयाः स्वप्नसङ्काशा यथा मायामनोरथौ ॥ सर्व्वे एते प्रणश्येयुस्तथा
सर्व्वमिदं जगत् ॥ २१ ॥ तडिच्चञ्चलमायुश्च यौवनं कुसुमोपमम् ॥ सस्वादाश्च विनश्यन्ति तथा प्राणिसमागमाः ॥ २२ ॥ गन्धर्वनगर
प्रख्याः कस्तत्र रमते नरः ॥ माया ते महती ब्रह्मंस्त्वया संमोहितं जगत् ॥ २३ ॥ न पश्यति जनो मुग्धस्त्वामीश्वरमुपद्रुतः ॥ न वेत्ति
कश्चनात्मानमनया मोहितो जनः ॥ २४ ॥ अविवेकप्रणष्टाक्षो यथान्धो दर्पणे मुखम् ॥ एवं विदिततत्त्वायां यशोदायां पुनर्मया ॥ २५ ॥
प्रसारिता महामाया पुत्रस्नेहमयी परा ॥ विसस्मार तदा सर्व्वमपूर्व्वं तत्त्वबोधनम् ॥ २६ ॥ उवाच पुत्र आगच्छ क्षुधितोसि स्तनं पिब ॥
त्वं मे प्राणप्रियः कृष्ण भुङ्क्ष्व क्रीड सुखेन हि ॥ २७ ॥ इत्यादिस्नेहवाक्येन यशोदा मामलालयत् ॥ यत्तु मत्तत्त्वविज्ञानान्मुक्तिः स्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रमत्र किम् ॥ २८ ॥ सांसारिकैः स्नेहपाशैर्बन्धान्मुक्तिस्तु यद्भवेत् ॥ तत्राश्चर्य्यं मुनेऽत्रेति मोहिता मायया तु सा ॥ २९ ॥ मयि प्रसन्ने मज्ज्ञानं भवत्येव न दुर्ल्लभम् ॥ पुत्रेति मयि यत्प्रेम तद्दुर्ल्लभतरं नृणाम् ॥ ३० ॥ अतः प्रसारिता माया पुत्रस्नेहमयी मया ॥ अतो यशोदा मत्स्नेहं चक्रे मुदितमानसा ॥ ३१ ॥ वेदोऽपि यं न जानाति योगिनो यमुपासते ॥ यजन्ति यज्ञैर्विप्राश्च तं मां सा वेत्ति बालकम् ॥ ३२ ॥ अपालयत्पुत्रबुद्ध्या मामतीव सुखेच्छया ॥ तस्याश्च सदृशं भाग्यं नान्यस्य भुवि विद्यते ॥ ३३ ॥ न पुण्यपुञ्जैर्न तपोभिरुग्रैर्न देवतीर्थाटनयज्ञयोगैः ॥ न दृश्यते क्वापि च यः कथञ्चित् सोऽहं हरिः पुत्रतनुश्च यस्याः ॥ ३४ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे नारदशौनकसंवादे कृष्णमृद्भक्षणलीलावर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ कदाचित्प्रातरुत्थाय यशोदा जननी मम ॥ दासीषु कर्म्मसक्तासु निर्म्ममन्थ स्वयं दधि ॥ १ ॥ गायन्ती मम कर्म्माणि गीतानि च सुरादिभिः ॥ प्रचलत्क्षौमवसना संस्वनद्रसनादिका ॥ २ ॥ रज्वाकर्षवशस्वेदकणव्याप्तमुखाम्बुजा ॥ चलत्केयूरबलयहारालकसुकुण्डला ॥ ३ ॥ श्वासोच्छ्वासचलन्नीवित्रिवलीव्याकुलोदरा ॥ तत्रागत्य मया मन्थो हस्तेन क्रामितो रुषा ॥ ४ ॥ तथापि नात्यजन्माता दधि मन्थनमेव हि ॥ ममातिशययत्नेन कथञ्चिद्दधिमन्थनम् ॥ ५ ॥ त्यक्त्वाङ्के मां समाधाय प्रीत्या स्तनमपाययत् ॥ मुहुर्मुहुर्मम मुखमपश्यन्मुदितानना ॥ ६ ॥ चुल्ह्यामारोपितं दुग्धं वीक्ष्य यात्पात्रतो बहिः ॥ पतदग्नौ जलैः सेक्तुं मां त्यक्त्वा द्रुतमुद्ययौ ॥ ७ ॥ अहो दुरत्यया माया लोकस्यार्थप्रणाशिनी ॥ यया विमोहितं सर्व्वं जगद्भ्रमति नित्यशः ॥ ८ ॥ हानिकाले परित्यज्य मां जनोऽन्यत्र गच्छति ॥ तस्य त्रैकालिकी हानिर्जायते नात्र संशयः ॥ ९ ॥ मां त्यक्त्वा सा ययौ यत्र पय उत्सिक्ततां गतम् ॥ तावन्मया तु दध्यन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुक्त्वा दधि विनाशितम् ॥ १० ॥ गृहीतं नवनीतञ्च नीत्वा क्षिप्तमितस्ततः ॥ एवं हानित्रयं तत्र यशोदायास्तथाऽभवत् ॥ ११ ॥ मामेवं यः परित्यज्य वस्तुनोऽर्थेऽभिधावति ॥ विवेकरहितो मूर्खो दुःखमेवाऽभिपद्यते ॥ १२ ॥ तस्य त्रैकालिकी हानिर्भवत्येवान्यथा नहि ॥ उत्तार्य्य सुश्रृतं दुग्धं यावदायाति सत्वरम् ॥ १३ ॥ दधिभाण्डं भग्नं दृष्ट्वा परितः सा व्यलोकयत् ॥ मामदृष्ट्वा बहिर्गेहाभ्यन्तरेऽपश्यदुद्यतम् ॥ १४ ॥ नवनीतस्य हरणे स्थापयित्वा उलूखलम् ॥ मर्कटेभ्यः प्रयच्छन्तं गव्यं यत्सञ्चितं बहु ॥ १५ ॥ सञ्चयो नहि कर्त्तव्यो मद्भक्तैः कृपणैर्यथा ॥ सञ्चयस्य विनाशो हि जायते निश्चितो बुधैः ॥ १६ ॥ यस्याहञ्च सदा दाता स कथं कृपणो भवेत् ॥ यत्राहं तत्र किं नास्ति भक्तिः किं कृपणायते ॥ १७ ॥ यत्किञ्चिन्मम भक्तस्य तेन प्रीणाति मां सदा ॥ दानैर्भोगैर्ममोक्तैश्च सफलं जीवितं नृणाम् ॥ १८ ॥ सा पश्यन्ती यष्टिहस्ता यशोदा बालकं हि माम् ॥ गृहान्तरे समागत्य शनैर्मे पृष्ठतः स्थिता ॥ १९ ॥ आगतामहमालोक्य समुत्तीर्य्य पलायितः ॥ ग्रहीतुकामा मे पश्चादधावदतिवेगतः ॥ २० ॥ न लेभे स्पर्शनं चापि ग्रहणन्तु कुतो भवेत् ॥ यं योगिनोऽपि स्वमनः प्रयच्छन्ति सदा हि माम् ॥ २१ ॥ ग्रहीतुं बहुकालेन न स्प्रष्टुमपि ते क्षमाः ॥ अतिश्रमाकुलां व्यग्रां धावन्तीं तामितस्ततः ॥ २२ ॥ दृष्ट्वामेऽजायत कृपा ततोऽस्या ग्रहणेऽभवम् ॥ करे गृहीत्वा जननी सयष्टिर्मामभीषयत् ॥ २३ ॥ स्फोटनं दधिभाण्डस्य घृतदुग्धादिनाशनम् ॥ त्वया कथं कृतं मन्द तत्फलन्ते ददाम्यहम् ॥ २४ ॥ नित्यं गोप्यः समागत्य ब्रुवन्ति तव चेष्टितम् ॥ मया प्रतीतिर्न कृता साध्वीनां वचनेष्वपि ॥ २५ ॥ एवमुक्त्वा ततः क्रोधाज्जननी सत्वरा सती ॥ उलूखले तु सा रज्जुं जग्राह मम बन्धने ॥ २६ ॥ बन्धनं तस्य भवति यस्य पूर्व्वाऽपरं भवेत् ॥ पूर्व्वाऽपरञ्च मे नास्ति बन्धनं जायते कथम् ॥ २७ ॥ बृहत्वाद्ब्रह्म चाहं तु विशेषाच्छृणु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारद ॥ तत्कथं वेष्टनं मे स्यादनाद्यन्तस्य रज्जुतः ॥ २८ ॥ यदा बध्नाति दाम्ना सा द्व्यङ्गुलेनमभूत्तदा ॥ तेनान्यत्संदधे माता तदपि न्यूनतां गतम् ॥ २९ ॥ एवं स्वगेहदामानि न्यूनानि ह्यभवँस्तदा ॥ गोपिकास्तत्समाकर्ण्य ममोदूखलबन्धनम् ॥ ३० ॥ समाजग्मुर्गृहद्वारं सर्व्वास्ता ह्यब्रुवन्वचः ॥ यशोदे बहुशोऽस्माभिरुक्तं शिक्षय पुत्रकम् ॥ ३१ ॥ बन्धनात्ताडनाद्बालो भवेद्धि परमं सुधीः ॥ किं त्वस्माकं तव सुतः प्रियः प्राणाधिको ह्यसौ ॥ ३२ ॥ तथापि खलु शिक्षार्थं देव्यब्रूमह्यभीक्ष्णशः ॥ पुत्रस्नेहवशादेव त्वया तन्नावधारितम् ॥ ३३ ॥ आत्मद्रव्यविनाशेन चाधुना कर्त्तुमुद्यता ॥ यथात्मवसुनाशेन क्षोभो मनासि वर्त्तते ॥ ३४ ॥ तथा न चान्यहानौ हि त्वयि प्रत्यक्षतां गतम् ॥ सुतस्य कर्म्म श्रुत्वाऽपि नहि चाक्रोशनं कृतम् ॥ ३५ ॥ इदानीं क्व गतः स्नेहो यत्त्वं बद्धुमिहेच्छसि ॥ बालोऽयं मे न जानाति कथं न प्रोच्यतेऽधुना ॥ ३६ ॥ इति तेषां वचः श्रुत्वा जननी व्याकुलाऽभवत् ॥ अशक्ता बन्धने यत्नपरा परमविस्मिता ॥३७॥ न शशाक तदा बद्धुं श्रमवारिपरिप्लुता ॥ न जाने किं भवत्यत्र जायते नास्य बन्धनम् ॥ ३८ ॥ एवं ब्रुवाणां तां दृष्ट्वा विषण्णां कृपयान्वितः ॥ गतोऽहं बद्धतां तस्या अपि चैकान्तभावतः ॥ ३९ ॥ उलूखलेन बद्धा सा सक्तासीद्गृहकर्म्मसु ॥ मद्बन्धनं विसस्मार मोहिता मायया मम ॥ ४० ॥ तदैवान्या गोपिकाश्च प्रययुर्भवनं स्वकम् ॥ ४१ ॥ ॥ नारद उवाच ॥ भगवन्देवदेवेश लोकनाथ जगत्प्रभो ॥ त्वद्भक्तानां नोचितं यत्तन्मया चेष्टितं हरे ॥ ४२ ॥ यत्कुबेरस्य तनयौ मया शप्तावनागसौ ॥ त्वद्भक्तानां क्रोधहानिः सदैवान्योपकारिता ॥ ४३ ॥ द्वेषो दम्भो मत्सरो वा असूया भ्रम एव च ॥ न भवेत्कर्हिचित्कृष्ण तच्च सर्व्वं ममाऽभवत् ॥ ४४ ॥ त्वद्भक्ताः साधवः शक्ताः सुहृदः सर्व्वदेहिनाम् ॥ अनन्यक्षमिणश्चैव तथा सर्व्वोपकारिणः ॥ ४५ ॥ पश्चात्तापस्तदारभ्य ममाभूत्सततं हृदि ॥ किं मयाचरितं यक्षौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिपु० कथं शप्तौ शिवानुगौ ॥ तन्ममाऽचक्ष्व भगवन्नहं तत्कृतवान्कथम् ॥ ४६ ॥ ॥ श्रीकृष्ण उवाच ॥ कुबेरस्य सुतौ प्रीतं पितरं पृच्छतः
॥५८॥ स्वकम् ॥ कः श्रेष्ठः सर्व्वदेवानां भजनीयो जनैश्च कः ॥ ४७ ॥ निर्भयो जायते मर्त्यः कस्य देवस्य पूजनात् ॥ कं भजन्मुच्यते जन्तुः अ०
सद्यः संसारबन्धनात् ॥ ४८ ॥ इह भोगानवाप्नोति परत्रात्युत्तमां गतिम् ॥ ४९ ॥ ॥ कुबेर उवाच ॥ विष्णुः सर्व्वेश्वरः सर्व्वैः सेव्योऽसौ २९
भक्तवत्सलः ॥ परमात्माऽखिलाधारो योगिध्येयांघ्रिपल्लवः ॥ ५० ॥ स्वभक्तेभ्यः सदा तुष्टः स्वात्मानमपि यच्छति ॥ निष्कामैश्च सकामैश्च
सेवनीयः प्रभुः स हि ॥ ५१ ॥ सर्व्वेधिकारिणो वर्णा आश्रमाः शिशवः स्त्रियः ॥ अन्त्यजा पुलकशा म्लेच्छा ये चान्ये पापयोनयः ॥
॥५२' सर्व्वैः सेव्यो देवदेवः परेशो भक्त्या नित्यं श्रद्धयाऽनन्यवृत्त्या ॥ यस्मिंस्तुष्टे जायते सर्व्वमेव रुष्टनाशं याति चैवं सदैव ॥ ५३ ॥
इति श्रीसकलपुराणसारभूते आदिपुराणे नारदशौनकसंवादे श्रीकृष्णोलूखलबन्धनं नाम अष्टाविंशोऽध्यायः ॥ २८ ॥ श्रीभगवानुवाच ॥
इत्यादिष्टौ कुबेरेण तौ चाऽपि प्रेमभक्तितः ॥ नानापूजाप्रयोगैश्च मदाराधनमीहतुः ॥ १ ॥ कदाचिदलकां यान्तौ पर्य्यटन्तावपश्यताम् ॥
महादेवगणश्रेष्ठं नन्दिनं भक्तवेष्टितम् ॥ २ ॥ ऊचतुस्तौ कुतो नन्दिन्नागतस्ते प्रभुश्च कः ॥ हे साधुवर पश्य त्वं मदाघूर्णितलोचनः ॥ ३ ॥
असत्सम्भाषणे जन्तुर्भ्रष्टो भवति निश्चितम् ॥ ह्रीः श्रीः कीर्त्तिस्तथा कान्तिः सर्वं वै याति संक्षयम् ॥ ४ ॥ ॥ नन्द्युवाच ॥ शृणुतं कुबेर
तनयौ मम नाथो महेश्वरः ॥ यः स्वयं विश्वमखिलं सृजत्यवति हन्ति च ॥ ५ ॥ वयं तत्सेवका नूनं बहवो मत्समाः परे ॥ यत्सेवकाः
सदानन्दमयाः सततनिर्भयाः ॥ ६ ॥ चरन्ति स्वेच्छया लोकान्कर्म्मपाशैर्न संयुताः ॥ भक्ष्याभक्ष्ये तथा येषां पापे तेषां न दूषणम् ॥ ७ ॥ ॥५८॥
आशु तुष्यति विश्वेशः स भक्तैः सेवितो ध्रुवम् ॥ इति नन्दिवचः श्रुत्वा भ्रान्तचित्तौ ततस्तु तौ ॥ ८ ॥ हरिभक्तिं विहायाशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संजातौ शिवसेवकौ ॥ नूनं परोपदेशेन भ्रष्टा भवति धीर्धृता ॥ ९ ॥ भक्तोपि भ्रंशते शीघ्रमितरेषाञ्च का कथा ॥ तत आरभ्य
तौ मत्तौ कुबेरतनयावुभौ ॥ कुकर्म्मकरणोद्युक्तौ चेरतुर्बुद्धिविभ्रमात् ॥ १० ॥ एकदा शैलविपिने रम्ये मन्दाकिनीतटे स्त्रीगणै
रनुगायाद्भिः श्रिया मत्तौ विचेरतुः ॥ ११ ॥ स्त्रीणां सङ्गः प्रहृष्टानां तत्त्वविस्मृतिकारणम् ॥ किं पुनर्मदमत्तानां चित्तभ्रंशमुपे
युषाम् ॥ १२ ॥ विहृत्य वनकुञ्जेषु ततो मन्दाकिनीजले ॥ प्रचक्रतुर्जलक्रीडां सिषिचुस्तौ स्त्रियोभितः ॥ १३ ॥ ततो भवान्समायातो
यदुक्तं यत्कृतं त्वया ॥ तत्स्मर्य्यते न चेद्वच्मि त्वयाहं सकलं मुने ॥ १४ ॥ ॥ श्रीनारद उवाच ॥ मयैतत्स्मर्य्यते कृष्ण कुबे
रतनयावुभौ ॥ सत्सङ्गेन श्रिया युक्तावपि दुस्सङ्गदूषितौ ॥ १५ ॥ कुतो भूतमिदं चित्रं मत्तौ च धनगर्वितौ ॥ अहो श्रीमदमाहात्म्यं
बुद्धिभ्रंशकरं परम् ॥ १६ ॥ न पश्यति जनो नूनमात्मानं हृद्यधिष्ठितम् ॥ कुसङ्गदूषिता बुद्धिर्नहि गच्छति शुद्धताम् ॥ १७ ॥ श्रिया वि
कारतां यातः परलोकं न पश्यति ॥ विशेषेण श्रिया मत्तः पतनाय भवेदलम् ॥ १८ ॥ एतौ कुबेरतनयौ विष्णुधर्म्मपरायणौ ॥ नियतं
भ्रष्टतां प्राप्तौ कुसङ्गफलतः परम् ॥ १९ ॥ श्रीमदेऽतिप्रसक्तानां नूनं नरकयातनाः ॥ यतो भूतानि हन्यन्ते निर्दयैरजितात्मभिः ॥ २० ॥
श्रिया मत्ताश्च जानन्ति विषयं परमार्थतः ॥ व्यवायाहारनिद्रादिष्वासक्ता मूढबुद्धयः ॥२१॥ मन्यन्ते देहमात्मीयं क्रिमिविड्भस्मसंज्ञितम् ॥
भूतद्रोहेण पुष्यन्ति न विरक्ता भवन्ति हि ॥२२॥ न विदंत्यात्मदुःखानि नरकेषु महान्ति वै ॥ अतो धिग्जीवितं तस्य यस्य श्रीमदसम्भवः
॥ २३ ॥ नैतादृशी मतिर्भूयो भवेदिह कथञ्चन ॥ एवमत्र मया कार्य्यमिति मे चिन्तितं हरे ॥ २४ ॥ एतयोस्तरुजन्माशु न यत्र विषयो
स्ति हि ॥ परं महावने रम्येऽतीते दिव्यशरच्छते ॥ २५ ॥ श्रीकृष्णदर्शनं प्राप्य लब्धभक्ती भविष्यतः ॥ श्रीकृष्णदर्शनं यस्मादेतयोर्भविता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्रुवम् ॥ २६ ॥ तरुयोनौ गतावेतौ नान्यत्कर्म्म करिष्यतः ॥ ऋतुधर्म्मसहौ मूढौ भूत्वा द्वौ यमलार्जुनौ ॥ २७ ॥ परोपकारिणौ भूत्वा स्थास्यतो बहुकालतः ॥ इति शप्त्वा गतोऽहं वै सत्यलोकमनामयम् ॥ २८ ॥ श्रीभगवानुवाच ॥ पूर्वभक्तिप्रभावेण विष्णोर्मम महामुने ॥ भवतो दर्शनं जातं न यतोऽसद्गतिस्तयोः ॥ २९ ॥ भोगान्तसमयेऽवश्यं महतां दर्शनं भवेत् ॥ द्रुमयोरन्तरं नूनं दत्त्वोलूखलमाशु च ॥ ॥ ३० ॥ विना वर्षं विना वातं मया तौ पातितौ द्रुमौ ॥ ३१ ॥ तरुणौ रूपसम्पन्नौ सर्वभूषणभूषितौ ॥ दिव्याम्बरधरौ दिव्यपुष्पमाल्यै रलङ्कृतौ ॥३२॥ दण्डवत्पतितौ तौ तु कृताञ्जलिपुटावुभौ ॥ तावूचतुः कृष्णकृष्ण महायोगिञ्जगद्गुरो ॥३३॥ त्वया सृष्टमिदं विश्वं यदेतत्स चराचरम् ॥ तस्मिन्नेवांशभागेनानुप्रविश्यावभाससे ॥ ३४ ॥ त्वमेव पालयस्येतत्त्वय्येवान्ते लयं व्रजेत् ॥ मायागुणैर्भवत्येतत्तुभ्यमधिरोचते ॥ ३५ ॥ त्वद्रोमकूपे ब्रह्माण्डकोटयः परमाणुवत् ॥ ब्रह्मेन्द्राद्याश्च ये देवाः सप्रजापतयोऽखिलाः ॥ ३६ ॥ मनवो भुवि राजानो ये चान्ये त्वद्विभूतयः ॥ नारदानुग्रहादीश जातं नौ दर्शनं तव ॥ ३७ ॥ अन्यथा विषये सक्तचित्तयोर्भविता कुतः ॥ यदेतदखिलं विश्वं क्रीडाभाण्डं तवेश्वर ॥ ३८ ॥ त्वत्तो न भिन्नं किमपि सर्व्वं ब्रह्माण्डगोचरम् ॥ अतश्चावां भगवतः पादाम्बुजसमाश्रयौ ॥ ३९ ॥ प्रार्थयावो वरं शश्वद्भवतो दर्शनं शुभम् ॥ भक्तिं देहि सदा देव निजनिष्ठं मनश्च नौ ॥ ४० ॥ जिह्वा तवार्पितान्नेषु दृष्टिः साधुजनेक्षणे ॥ त्वत्स्थानगमने पादौ गात्रं त्वद्भक्तसङ्गमे ॥४१॥ श्रीभगवानुवाच ॥ एवं सम्प्रार्थितस्ताभ्यामवोचं च कुबेरजौ ॥ यदुक्तं तत्तथैवास्तु स्वलोकं यात मा चिरम् ॥ ४२ ॥ युवयोः सङ्गमं येऽन्ये करिष्यन्ति धरातले ॥ तेषां चाहैतुकी भक्तिर्भविष्यति न संशयः ॥ ४३ ॥ साधुसङ्गाद्धि विमला भक्तिर्भवति नैष्ठिकी ॥ भक्तिरेव परो लाभस्ततोऽन्यन्नास्ति किञ्चन ॥ ४४ ॥ भक्त्यैवाहं भवे वश्यो युवयोः सम्भवत्वलम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तौ तु प्रणम्याशु तथा कृत्वा प्रदक्षिणाम् ॥ ४५ ॥ ममाज्ञया संप्रयातौ कुबेरभवनं पुनः ॥ गोपास्तु निनदं श्रुत्वा द्रुमयोः पतमानयोः ॥ ४६ ॥ तत्रसुः शीघ्रमाजग्मुः पश्यन्तो मां सुविस्मिताः ॥ कथमेतौ निपतितौ तरू चिरतरस्थितौ ॥ ४७ ॥ तत्र नन्दः समागत्य मुक्त्वा बालमुलूखलात् ॥ आनयिाङ्कमथो चुम्बन्वदनं मुदितः परम् ॥ ४८ ॥ अक्षतश्च समालोक्य निजभाग्यमतर्कयत् ॥ गोपाः परस्परं प्रोचुरद्भुतं किमभूदिह ॥ ४९ ॥ द्रुमयोः पतनं कस्मात्सहसा समपद्यत ॥ बालकोऽसौ मृत्युमुखे पतितो विधिनावितः ॥ ५० ॥ इति मीमांसमानेषु गोपेषु पतितौ द्रुमौ ॥ तानूचुर्बालकास्तत्र नन्दादीन्शुद्धबुद्धयः ॥ ५१ ॥ उलूखलं कर्षयता कृष्णेनेमौ निपातितौ ॥ ताभ्यां विनिर्गतौ देवौ कृष्णानुसदृशौ शुभौ ॥ ५२ ॥ स्तुत्वा नत्वा उपामन्त्र्य गतावात्मनिकेतनम् ॥ बालानां वचनं केचिज्जगृहुर्नेति केचन ॥ ५३ ॥ स्मृत्वा पूर्वकृतं कर्म केचित्सत्यं च मेनिरे ॥ सन्दिग्धचेतसः केचिद्बभूवुस्ते व्रजौकसः ॥ ५४ ॥ नन्दाद्या व्रजगोपाश्च यशोदाद्याश्च गोपिकाः ॥ पश्यन्तो मां कुशलिनं मोदमापुरसीमकम् ॥ ५५ ॥ नन्दो महामनास्तत्र द्विजानाहूय श्रद्धया ॥ ददौ दानानि सुभृशं ब्राह्मणेभ्यः समंततः ॥ ५६ ॥ यशोदा पूर्ववत्त्रस्ता रक्षाविधिमकारयत् ॥ ५७ ॥ इदं मया ते कथितं महाद्भुतं बाल्ये वयस्यैश्चरितं मया यत् ॥ शृणोति यः श्रावयते च भक्ति स्तनुग्रहो मे भवतीह तस्मिन् ॥ ५८ ॥ ॥ इति श्रीसकलपुराणसारभूते आदिपुराणे वैयासिके नारदशौनकंसंवादे यमलार्जुनमोक्षवर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ समाप्तश्चेदमादिपुराणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"
मुद्रणालये मुद्रितम्, संवत् १९६४, शके १८२९.

विज्ञप्तिः ।

अत्र च महाभारतादीतिहासाः श्रीमद्भागवतादिपुराणानि सहस्रनामादिस्तोत्राणि तथा च व्याकरणन्यायादिशास्त्रनाटकाख्यायिकादिग्रन्थाश्च सीसकोत्तममहल्लघ्वक्षरैश्च मनोहरं मुद्रिताः योग्यमूल्येन क्रय्यास्सन्ति तत्तांश्च ग्राहका यथासूचीपत्रं मूल्यप्रेषणेन प्राप्नुयुः ।

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस—बम्बई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेयमभ्यर्थना.

अस्माकं मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास-वैद्यक-मंत्र-स्तोत्र-कोश-काव्य-चम्पू-नाटकालंकार-संगीत-नीति-कथाग्रंथाः, बहवः स्त्रीणां चोपयुक्ता ग्रंथाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः संस्कृतभाषया, हिन्दीमार्वाडयन्यतरभाषाग्रन्थास्तत्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्राचित्रितालिखितपत्रवत्पुस्तकानिच; मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय। येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलब्धये एवं नव्यतया स्वस्वपुस्तकानि मुमुद्रयिषुभिः सुलभयोग्यमौल्येन सीसकाक्षरैः स्वच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलब्धये च पत्रिकाद्वारातैः प्रेषणीयोऽस्मि।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम्।

क्षेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः खेतवाडी–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ❋ ॥ इत्यादिपुराणं समाप्तम् ॥ ❋ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu